रं मे महाभुज ॥ ॥ श्रीशुक उवाच ॥ ॥ तया परित्रासविकंपितांगया शुचाऽवशुष्यन्मुखरुद्धकंठया ॥ कातर्यविस्रंसितहेम
मालया गृहीतपादः करुणो न्यवर्त्तत ॥ ॥ ॥ ॥ ॥ ॥ ॥ श्रीगोपीजनवल्लभाय नमः ॥ ॥

वैक्लव्यर रुदित

परित्रासेन विकंपितान्यंगानि यस्याः तया शुचा शोकेन शुष्यन्मुखं यस्याः रुद्धः कंठो यस्याः सा च सा च ॥ कातर्येण वैक्लव्येन श्री रु स
विस्रंसिता हेममयी माला यस्याः तया गृहीतौ पादौ यस्य सः ॥ ॥ ॥ श्रीगोपीजनवल्लभाय नमो नमः ॥ ॥ १५

जरासंधः १

कुहकोनर्त्तयिता तस्येच्छयां दुःखेपीहमानत्वेन पारवश्यं व्यक्तं दर्शितं॥ अत्र चाहमेव दृष्टांत इत्याह जरासंधः शौरेरिति कृष्णात्
सकाशात्॥ एकं संयुगं परं केवलं अतिमंवाजिग्ये जितवानहं॥ दैवमदृष्टं तच्छन्नेन॥ फल्गुतंत्रैः स्वल्पसैन्यैः प्रदक्षिणं॥ अनुकूलं॥

अष्टादशं अनुकूलः४ स्वल्पसैन्यैः कृष्णात२ दुर्गीत१

जितवान२ यथा दारुमयी योषिन्नृत्यते कुहकेच्छया॥ एवमीश्वरतंत्रोयमीहते सुखदुःखयोः॥ शौरेः सप्तदशाहं वै संयुगानि पराजितः॥
त्रयोविंशतिभिः सैन्यैर्जिग्ये एकमहं परं॥ तथाप्यहं न शोचामि न प्रहृष्यामि कर्हिचित्॥ कालेन दैवयुक्तेन जानन्विद्रावितं जितवंतः३
जगत्॥ अधुनापि वयं सर्वे वीरयूथपयूथपाः॥ पराजिताः फल्गुतंत्रैर्यदुभिः कृष्णपालितैः॥ रिपवो जिग्युरधुना काल आ-
त्मानुसारिणि॥ तदा वयं विजेष्यामो यदा कालः प्रदक्षिणः॥ एवं प्रबोधितो मित्रैश्चैद्योगात्सानुगः पुरं॥ हतशेषाः पुनस्तेपि
ययुः स्वं स्वं पुरं नृपाः॥ रुक्मी तु राक्षसोद्वाहं कृष्णद्विडसहन्स्वसुः॥ पृष्ठतोन्वगमत्कृष्णमक्षौहिण्यावृतो बली॥ रुक्म्यम-
प्रतिज्ञां चकार ४ र्षी सुसंरब्धः शृण्वतां सर्वभूभुजां॥ प्रतिजज्ञे महाबाहुर्दंशितः सशरासनः॥ अहत्वा समरे कृष्णमप्रत्यूह्य च रुक्मिणीं॥ कुं-
डिनं न प्रवेक्ष्यामि सत्यमेतद्ब्रवीमि वः॥ इत्युक्त्वा रथमारुह्य सारथिं प्राह सत्वरः॥ नोदयाश्वान्यतः कृष्णस्तस्य मे संयुगं भ-
वेत्॥ अद्याहं निशितैर्बाणैर्गोपालस्य सुदुर्मतेः॥ नेष्ये वीर्यमदं येन स्वसा मे प्रसभं हृता॥ विकत्थमानः कुमतिरीश्वरस्या-
प्रमाणवित्॥ रथेनैकेन गोविंदं तिष्ठ तिष्ठेत्यथाह्वयत्॥ ॥ ॥ ॥ श्रीगोपीजनवल्लभाय नमः॥ ॥

बलात् २

स्यात्॥ गोपालस्य वेहपालकस्येति॥ वास्तवोर्थः॥ तथा सुदुर्मतेरिति शोभनानुग्रहवती दुष्टेष्वपि मतिर्यस्य तस्येति॥ ॥

श्री०
० द०
टी०
६

कुतइत्यतआह॥आत्मनोमोहइति॥परमार्थमाह॥एकएवेति॥परःशुद्धःज्योतिःसूर्यादिर्यथोदकेषुनानायथाघटादिष्विति।कु
तस्तर्हिनचंद्रादिवदात्मानंएकंशुद्धंप्रतीमः।तत्राहदेहइति।द्रव्यमधिभूतंप्राणाइंद्रियाएवध्यात्मगुणाप्राद्यैर्नाधिदैवतंतच्चित
यात्मकः।देहोपाधिनाशुद्धोनप्रतीयतइत्यर्थः।ननुदेहसंबंधेनापिसंसारसतिशुद्धत्वंगतमेवतत्राह॥नात्मनइति।हेसतिअसेन
अधिभूतादिनाआत्मनःसंयोगवियोगौनस्तः।कुतः।असतः।असत्वादन्यस्येत्यर्थः।कुतोसत्वंतत्राहतद्धेतुत्वादिति।तस्मान
स्यसत्तेतेंद्रियादेःप्रसिद्धेःप्रकाशस्यतद्धेतुत्वात्।ननुदेवैरधिष्ठितेष्विंद्रियेसोत्तानांप्रतीतिःप्रसिद्धात्तत्प्रतीत्याचतत्प्रसि

आत्ममोहोनृणामेवकल्पतेदेवमायया॥सुहृद्दुर्हृदुदासीनइतिदेहात्ममानिनां॥एकएवपरोह्यात्मासर्वेषामपिदेहिनां
॥नानेवगृह्यतेमूढैर्यथाज्योतिर्यथानभः॥देहआद्यंतवानेषद्रव्यप्राणगुणात्मकः॥आत्मन्यविद्ययाक्लृप्तःसंसा
रयतिदेहिनम्॥नात्मनोन्येनसंयोगोवियोगश्चासतःसति॥तद्धेतुत्वात्तत्प्रसिद्धेर्दृग्रूपाभ्यांयथारवेः॥ ॥ ॥
हे।

द्धिर्नात्मनइत्यतआह॥दृग्रूपाभ्यांयथारवेः।यथाप्रकाश्यप्रकाशकत्वेनवर्त्तमानयोरपिचक्षुरूपयोःरवेःसकाशात्प्रसिद्धिःद्व
योरपितैजसत्वात्तद्दलेदश्चतथात्रतेंद्रियादीनांपरस्परसिद्धानामपिचैतन्याधीनएवप्रकाशःतत्कार्यत्वात्तद्व्यतिरेकेण
असत्त्वंचेत्यर्थः॥तथाचद्वादशेवक्ष्यति॥दीपश्चक्षुश्चरूपंचज्योतिषोनपृथग्भवेत्॥एवंधीःखानिमात्राश्चनस्युरन्यतमाहृ श्रीकृष्ण
तादिति॥यद्वारवेःप्रसिद्धाभ्यामेवदृग्रूपाभ्यांपरस्परप्रसिद्धिर्यथातद्वदिति॥ ॥श्रीगोपीजनवल्लभायनमोनमः॥ २६

सश्मश्रुकेशसहितानि स्थाने स्थाने अवशिष्टानि श्मश्रूणि केशाश्च यथा भवंति तथा तेनैवासिना प्रवपन्मुंडयन् विरूपमकरोत्॥ तथा
न्तं हतप्रायं इत्युत्तरवाक्येप्यनुषंगः॥ रुक्मिणीं सांत्वयति मैवास्मानिति॥ पुनः कृष्णमाक्षिपति॥ बंधुरिति॥ पुनर्देवीं प्रत्याह॥ क्षत्रि
याणामिति॥ येन धर्मेण भ्राता पित्रा तरं हन्यात् तत्तस्माद्घोरतरः अतिदारुणः धर्मश्च अतश्च कोस्माकमपराध इति भावः॥ पुनस्त्री
कृष्णं प्रत्याह राज्यस्येति॥ तथाप्यस्माकमेतदनुचितमिति भावः॥ पुनर्देवीं प्रत्याह॥ तवेयमिति॥ सर्वभूतेषु दुर्हृदामहितानां भ्रातॄणां २

रुक्मिण्यै वक्ष्यमाणेन सुभीतं

चैलेन बध्वा तमसाधुकारिणं सश्मश्रुकेशं प्रवपन्व्यरूपयत्॥ तावन्ममर्दुः परसैन्यमद्भुतं यदुप्रवीरा नलिनीं यथा गजाः॥ कृष्णान्तिकं
मुपव्रज्य ददृशुस्तत्र रुक्मिणं॥ तथाभूतं हतप्रायं दृष्ट्वा संकर्षणो विभुः॥ विमुच्य बद्धं करुणो भगवान् कृष्णमब्रवीत्॥ असाध्विदं
त्वया कृष्ण कृतमस्मज्जुगुप्सितं॥ वपनं श्मश्रुकेशानां वैरूप्यं सुहृदो वधः॥ मैवास्मान् साध्व्यसूयेथा भ्रातुर्वैरूप्यचिंतया॥ सु
खदुःखदो न चान्योस्ति यतः स्वकृतभुक् पुमान्॥ बंधुर्वधार्हदोषोपि न बंधोर्वधमर्हति॥ त्याज्यः स्वेनैव दोषेण हतः किं हन्यते पुनः
नः॥ क्षत्रियाणामयं धर्मः प्रजापतिविनिर्मितः॥ भ्रातापि भ्रातरं हन्यात् येन घोरतरस्ततः॥ राज्यस्य भूमेर्वित्तस्य स्त्रियो मा
नस्य तेजसः॥ मानिनोऽन्यस्य वा हेतोः श्रीमदांधाः क्षिपंति हि॥ तवेयं विषमा बुद्धिः सर्वभूतेषु दुर्हृदां॥ यन्मन्यसे सदाभद्रं सुहृदां

अभद्रवदभद्रं मन्यसे इच्छसि इयं तव विषमा असमीचीना बुद्धिः॥ कुतः यतस्त्वं देवसुहृदां अभद्रमिति॥ यद्वा सर्वभूतेषु दुर्हृदामपि स्व
सुहृदामभद्रमेव दंडरूपं मुंडनमभद्रं यन्मन्यसे तवेयं विषमा बुद्धिरिति॥ अथवा सर्वभूतेषु मध्ये दुर्हृदां शिशुपालादीनां अभद्रं सु
हृदां भद्रं च यन्मन्यसे तवेयं विषमा बुद्धिः समाना भवति। अभ्रद्भवत अज्ञानामिव॥ ॥ ॥ ॥ श्रीगोपीजनवल्लभाय नमः

श्री०
भा० द०
श०
१७

उत्तंभितैरिंद्रकेतुभिर्ध्वजविशेषैः रूपल्लवानि मंगलानि लाजांकुरपुष्पप्रकारादीनि तैः ॥ आहूताः प्रेष्ठाः सुहृदो भुजगेंद्रैः ॥ पराभृ
ष्टाः उल्लिलताः ॥ रंभाश्च पूगाश्च तैः रूपशोभिता ॥ यद्वा तैरेव गजेः पराभृष्टाः संस्पृष्टाः रंभाश्च पूगाश्च तैः रूपशोभिता ॥ संभ्रमात् औत्सुक्यां
त्परिधावतां बंधूनां मध्ये मिथः समेत्य मुदं यापुः ॥ ॥ इति दशमे पंचाशत्तमः ॥ ॥ पंचपंचाशत्तमे तु प्रद्युम्नोऽजनि कृष्णतः ॥ शं वनुः ३
बरेण हृतः सोऽयं हत्वा तं कांतयागमत ॥ १ ॥ प्रद्युम्नहानिलाभाद्यैः शंबराहरणादिना ॥ कुटुंबिनामपत्यादिसुखदुःखमभ्रसुवत ॥

सा हृष्टा पुर्युत्तभितैरिंद्रकेतुभिर्विचित्रमाल्यांबररत्नतोरणैः ॥ वभौ प्रतिद्वार्युपल्लवृत्त मंगलैः रापूर्णकुंभागुरुधूपदीपकैः ॥ सिक्त
मार्गा मदच्युद्भिर्राहूत प्रेष्ठभूभुजां ॥ गजैर्द्वाः सु पराभृष्टरंभापूगोपशोभिता ॥ कुरुसृंजयकैकयविदर्भयदुकुंतयः ॥ मिथो
मुमुदिरे तस्मिन् संभ्रमात्परिधावतां ॥ रुक्मिण्या हरणं श्रुत्वा गीयमानं ततस्ततः ॥ राजानो राजकन्याश्च वभूवुर्भृशविस्मिताः
द्वारकायामभूद्राजन् महामोदः पुरौकसां ॥ रुक्मिण्या रमयोपेतं हृष्ट्वा कृष्णं श्रियः पतिं ॥ ॥ इति श्रीभागवते महापुराणे
दशमस्कंधे रुक्मिण्युद्वाहो नाम चतुः पंचाशत्तमोऽध्यायः ॥ ॥ श्रीशुक उवाच ॥ ॥ कामस्तु वासुदेवांशो दग्धः प्राग्रु
द्रमन्युना ॥ देहोपपत्तये भूयस्तमेव प्रत्यपद्यत ॥ स एव जातो वैदर्भ्यां कृष्णवीर्यसमुद्भवः ॥ प्रद्युम्न इति विख्यातः सर्वतोऽनव

जांबवत्यादि विवाहेभ्यः प्रागेव प्रद्युम्नजन्म ततो विवाहः ॥ ततः शंबरागारात्प्रद्युम्नप्रत्यागमनं अतः पुत्रकथनप्रस्तावे पिद्वयमं प्र श्रीकृष्ण
द्युम्नस्य जातमात्रस्य शंबरेणाहरणं निरूप्य तेप्रत्यागमनं तदुत्तरकालीनमपि कथापर्यवसानाय अत्रोक्तमिति ॥ वासुदेवांशो वि १७
नवित्तप्रलवत्वात् वासुदेवांशः सृष्टिहेतुत्वाच्च ॥ देहोपपत्तये देहप्राप्तये अनवमः अन्यूनः ॥ ॥ ॥ ॥ ॥

देहसंबंधाभावादेवनात्मनोजन्मादयोपि इतिवक्तुं जन्मादीनां देहधर्मत्वमाह॥ जन्मादयस्त्विति। कथं तर्हि जातोहं वृद्धोहमिति
आत्मनि जन्मादिप्रतीतिः। देहजन्मादिनैवेति सदृष्टांतमाह॥ कलानामेवेति॥ इंदोः कलानामेव जन्मादयो नैवेंदोः। यथा तद्वत्
॥ यथा च कलानाशादेव कुहूरमावास्या इंदुक्षय उच्यते॥ तद्वदस्यात्मनो देहनाशादेव मृतिव्यवहार इत्यर्थः। नत्वात्मनो देहादि
संबंधाभावे कथं भोक्तृभोग्यभोगप्रतीतिरित्याशंक्य स्वप्नदृष्टांतेन समर्थयते। यथाशयान इति॥ आत्मानं भोक्तारं विषयान्

जन्मादयस्तु देहस्य विक्रिया नात्मनः क्वचित्॥ कलानामिव नैवेन्दोर्मृतिर्ह्यस्य कुहूरिव॥ यथा शयान आत्मानं विषयान् फलं
मेव च॥ अनुभुंक्ते ऽप्यसत्यर्थे तथाप्नोत्यबुधो भवं॥ तस्मादज्ञानजं शोकमात्मशोषविमोहनं॥ तत्त्वज्ञानेन निर्हृत्य स्वस्था
भव शुचिस्मिते॥ ॥श्रीशुक उवाच॥ ॥एवं भगवता तन्वी रामेण प्रतिबोधिता॥ वैमनस्यं परित्यज्य मनो बुद्ध्या समादधे॥ प्राणा
वशेष उत्सृष्टो द्विड्भिर्हतबलप्रभः॥ स्मरन्विरूपकरणं वितथात्ममनोरथः॥ चक्रे भोजकटं नाम निवासाय महत्पुरं॥ अह
त्वा दुर्मतिं कृष्णमप्रत्यूह्य यवीयसीं॥ कुंडिनं न प्रवेक्ष्यामीत्युक्त्वा तत्रावसद्रुषा॥ भगवान्भीष्मकसुतामेवं निर्जित्य भू
मिपान्॥ पुरमानीय विधिवदुपयेमे कुरूद्वह॥ तदा महोत्सवो नृणां यदुपुर्यां गृहे गृहे॥ अभूदनन्यभावानां कृष्णे यदुप
तौ नृप॥ नरा नार्यश्च मुदिताः प्रमृष्टमणिकुंडलाः॥ पारिबर्हमुपाजह्रुर्वरयोश्चित्रवाससोः॥ ॥ [illegible]गोपीजनवल्लभाय

भोग्यान् फलं भोगं असत्यप्यर्थे अनुभुंक्ते तथा बुधः संसारं प्राप्नोतीति। आत्मानं शोषयति विमोहयति चेति तथा तं निर्हृत्य
अपाहृत्य समादधे समाहितमकरोत् रुक्मिणः स्ववंशकृतवतोपि नोज्ञानं निवृत्तमिति दर्शयन्नाह॥ प्राणावशेष इति॥ अहत्वा अ
ज्ञात्वा दुर्मतिमिति वा स्तवोर्थः॥ अप्रत्यूह्य अनावर्त्य अघातिवृद्धेति सत्यं॥ यवसीस्वसारं यत्रविरूपितस्तत्रैवावसत्। यत्र भो
जकटं नाम पुरमभवत्॥ वरयोः वरवध्वोर्हृयमुपस्कर॥ ॥ ॥ ॥तिर ॥श्रीगोपीजनवल्लभायनमोनमः॥

श्री० भा० द० शु० १८

नचात्रविलंबः कार्य इत्याह ॥ परिशोचति रोदतीत्यर्थः ॥ वज्रस्य निष्पेषो निर्घातो यथा निष्ठुरस्तीव्रो नादो भवति तथा तं नादं व्यनदत्
॥ सामान्यविशेषतया व्याप्यव्यापकत्वमोदनं पाकं पचतीतिवत् ॥ अतिनिष्ठुरं नादमकरोदित्यर्थः ॥ विहायसः आकाशस्थितः ॥ स

रोदती १ सर्वमिती १ प्रद्यु २ मेरस्य ४ इतिः १ शैवाबचने: २

परिशोचति ते माता कुररीव गतप्रजा ॥ पुत्रस्नेहाकुला दीना विवत्सा गौरिवातुरा ॥ प्रभाष्यैवं ददौ विद्यां प्रद्युम्नाय महात्मने ॥
मायावतीं महामायां सर्वमायाविनाशिनीं ॥ स च शंबरमभ्येत्य संयुगाय समाह्वयत् ॥ अविषह्यैस्ततो वाक्यैः क्षिपन् संजनयन् कलिं ॥
॥ सोऽभिक्षिप्तो दुर्वचोभिः पदाहत इवोरगः ॥ निश्चक्राम गदापाणिरमर्षात्ताम्रलोचनः ॥ गदामाविध्य तरसा प्रद्युम्नाय महात्मने ॥
प्रक्षिप्य व्यनदन्नादं वज्रनिष्पेषनिष्ठुरं ॥ तामापतन्तीं भगवान् प्रद्युम्नो गदया गदां ॥ अपास्य शत्रवे क्रुद्धः प्राहिणोत्स्वगदां नृप ॥
स च मायां समाश्रित्य दैतेयीं मयदर्शितां ॥ मुमुचेऽस्त्रमयं वर्षं कार्ष्णौ वैहायसोऽसुरः ॥ बाध्यमानोऽस्त्रवर्षेण रौक्मिणेयो महारथः ॥
सत्वात्मिकीं महाविद्यां सर्वमायोपमर्दिनीं ॥ ततो गौह्यकगंधर्वपैशाचोरगराक्षसीः ॥ प्रायुंक्त शतशो दैत्यः कार्ष्णिर्व्यधमयत्स ताः ॥
निशातमसिमुद्यम्य सकिरीटं सकुंडलं ॥ शंबरस्य शिरः कायात्ताम्रश्मश्र्वोजसाहरत् ॥ आकीर्यमाणो दिविजैः स्तुवद्भिः कुसु
मोत्करैः ॥ भार्ययांबरचारिण्या पुरं नीतो विहायसा ॥ अंतःपुरवरं राजन् ललनाशतसंकुलं ॥ विवेश पत्न्या गगनाद्विद्युतेव ब
लाहकः ॥ तं दृष्ट्वा जलदश्यामं पीतकौशेयवाससं ॥ प्रलंबबाहुं ताम्राक्षं सुस्मितं रुचिराननम् ॥ सरी ॥ ॥ ॥

मेघः १ शरकं प्रद्युम्नः २ युतं

त्वात्मिकीं सत्त्वगुणमयीं प्रायुंक्ते सूत्तरस्यानुषंगः ताः मायाः व्यधमयत् व्यनाशयत् ॥ ताम्राणि श्मश्रूणि यस्मिन् तत् ओजसा बलेन ॥ विद्यु
तासह बलाहको मेघ इव ॥ ॥

शंबरः ३ निर्घातनी ४ दैत्यः ५ प्रायुंक्त ४ तीक्ष्णं ३ स्थाः २

प्रद्यु प्रनाशयत् ३

श्रीकृष्ण १८

इवैतत्कृत्वकामेनसंदेहःहतः।
इति: शंबरस्यकृतकारी
सत्रसिद्धः कामशत्रुः शंवरस्तमात्मनःशत्रुंविदित्वाहृत्वासमुद्रेप्रास्यगृहमागमदिति। निर्जगारगिलितवान्॥ स्वधितिनाशस्त्रि
कयाअवद्यन्खंडितवंतः॥ तत्त्वंकामोयंतवभर्त्तेति॥ उत्पत्तिंश्रीकृष्णाज्जातमेनंउत्पन्नइति॥ यशस्विनीपतिव्रतानिर्दग्धदेह
प्रद्युम्नं १ देत्यः। मायामी। बालं देत्यः। धीवराः समुद्रे गिलितवान् खंडितवंतः २
तंशंवरःकामरूपीहृत्वातोकमनिर्दशं॥ संविदित्वात्मनःशत्रुंप्रास्योदन्वत्यगाद्गृहं॥ तंनिर्जगारवलवान्मीनःसोप्य शास्त्रे ए २
परैःसह॥ वृतोजालेनमहतागृहीतोमत्सजीविभिः॥ तंशंवरायकैवर्त्ताउपजह्रुरुपायनं॥ सूदामहानसंनीत्वाऽवद्यन्स्वधितिनो
रतेः २ ऽद्भुतं॥ दृष्ट्वातदुदरेबालंमायावत्यैन्यवेदयत्॥ नारदोऽकथयत्सर्व्वंतस्याःशंकितचेतसः॥ बालस्यतत्वमुत्पत्तिंमत्स्योदर
निवेशनं॥ साचकामस्यवैपत्नीरतिर्न्नामयशस्विनी॥ पत्युर्न्निर्दग्धदेहस्यदेहोत्पत्तिंप्रतीक्षती॥ निरूपिताशंवरेणसा
संमोहं ६ सूपौदनसाधने॥ कामदेवंशिशुंवुध्वाचक्रेस्नेहंतदाऽर्भके॥ नातिदीर्घेणकालेनसकार्ष्णीरूढयौवनः॥ जनयामा
सनारीणांवीक्षंतीनांचविभ्रमं॥ सातंपतिंपद्मदलायतेक्षणंप्रलंववाहुंनरलोकसुंदरं॥ सव्रीडहासोत्तभितभ्रुवेक्षती
प्रीत्योपतस्थेरतिरंगसौरतैः॥ तामाहभगवान्कार्ष्णिर्मातस्तेमतिरन्यथा॥ मातृभावमतिक्रम्यवर्त्तसेकामिनीयथा॥ ॥
रतिरुवाच॥ ॥भवान्नारायणसुतःशंवरेणाहृतोगृहात्॥ अहंतेऽधिकृतापत्नीरतिःकामोभवान्प्रभो॥ एषत्वानिर्दशं शंवरः २
सिंधावक्षिपच्छंवरोऽसुरः॥ मत्स्योग्रसीत्तदुदरादिहप्राप्तोभवान्प्रभो॥ तमिमंजहिदुर्द्धर्षंदुर्ज्जयंशत्रुमात्मनः॥ मायाशत
शंवर
प्रातिंप्रतीक्षमाणा। तंशिशुंकामदेवंवुध्वाविस्रंभंसंमोहं॥ अंगहेराजन्। सौरतैर्भावैःउपतस्थेभजत। अधिकृतापत्नी
भवद्धेतुःरतिरहंभवान्कामइति॥ दुर्जयत्वेहेतुः मायाशतविदमिति॥ कथंतर्हिहंतव्यस्तत्राह। मायासिरिति॥ ॥

श्री०
भा० द०
श०
१९

प्रष्ठं १

अतिसौंदर्येण प्रद्युम्नमनुवर्णयति यमिति ॥ पिताश्रीकृष्णस्तत्स्वरूपे प्रद्युम्ने निज आत्मीय ईशः भर्तेति भावो भावनाया सांतास्तन्मातरः ॥ कृष्णपत्न्योपि रहसि निरूढभावाः सत्योऽयमस्मज्जन्मिति यदा न खलु चित्रं ॥ कथं सति स्मरे स्मर्यमाणत्वेनैव त्वौपचके कामेऽक्षविषये सति किं चरे मास्पदं श्रीकृष्णस्तस्य बिंबप्रतिबिंबे पुत्रे तदा किं नु वक्तव्यं अन्यनार्यो भेजुरिति ॥ ॥ इति दशमे पंचपंचाशत्तमः ॥ ॥ षट्पंचाशत्तमे मिथ्याभियोगमणिमाहरत् ॥ कन्यां जांबवतः प्राप कृष्णः सत्राजितस्ततः ॥ ॥ ॥ पुत्रादि

मल्युग्म दानस्त्यदे अयु सत्त्वा

यं वै मुहुः पितृसरूपनिजेशभावास्तन्मातरो यदभजन्रहरूढभावाः ॥ चित्रं न तत्खलु रमास्पदबिंबबिंबे कामे स्मरेऽक्षविषये किमुतान्यनार्यः ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे विंशोत्तरि त्रिवर्षे नेपंचपंचाशत्तमोऽध्यायः ॥ ॥ ॥ ॥ श्रीशुक उवाच ॥ ॥ सत्राजितः स्वतनयां कृष्णायकृतकिल्बिषः ॥ स्यमंतकेन मणिना स्वयमुद्यम्य दत्तवान् ॥ ॥ राजोवाच ॥ ॥ सत्राजितः किमकरोत्ब्रह्मन्कृष्णस्य किल्बिषं ॥ स्यमंतकः कुतस्तस्य कस्माद्दत्ता सुता हरेः ॥ ॥ ॥ ॥ श्रीशुक उवाच ॥ ॥ आसीत्सत्राजितः सूर्यो भक्तस्य परमः सखा ॥ प्रीतस्तस्मै मणिं प्रादात्सूर्यस्तुष्टः स्यमंतकं ॥ स तं बिभ्रन्मणिं कंठे भ्राजमानो यथा रविः ॥ प्रविष्टो द्वारकां राजन्तेजसा नोपलक्षितः ॥ ॥ ॥ ॥

कामसौख्यस्य निष्ठामुक्त्वाति चंचलं ॥ अर्थस्यानर्थतामाह स्यमंताहरणादिना ॥ १ ॥ सत्यभामा जांबवत्योर्द्विवाहप्रस्तावाय स्यमंतकाख्यानमाह ॥ सत्राजित इत्सकारान्तः ॥ क्वचिद्व्रतकारांतोप्यन्वयानुसारेणद्रष्टव्यः ॥ कृतापराधस्तच्छांतये स्वयमेवोद्यमं कृत्वा मणिना सह प्रादादिति ॥ तत्कस्य सत्राजितः सूर्यः स्वाम्यपि सखेवासीदित्यर्थः ॥ स च तुष्टस्तस्मै स्यमंतकं नाम मणिं प्रादात प्रीतः स्निग्धः नोपलक्षितः सत्राजितोऽसावित्य विज्ञातः ॥ ॥ ॥ ॥ ॥ ॥ श्रीकृष्ण १९

भ्रमराः १

नीलाश्चवक्राश्चयेलकाः एवालिमंत्येः ॥ ह्रीताः लज्जिताः ॥ श्रीकृष्णोनरवतीत्यवधार्यसस्त्रीरत्नंश्रेष्ठारतिस्तत्सहितं ॥ सुतंस्म
रंत्याह ॥ कोन्वयमिति ॥ नरवैडूर्यः पुरुषश्रेष्ठः ॥ एतेनतुल्यंवयोरूपंचयस्यसः ॥ भवेदिति । तस्यस्वपुत्रत्वंसंभावयंत्याह ॥ कथं

कपित्थ एवीर

स्वलंकृतमुखांभोजंनीलवक्रालकालिभिः ॥ कृष्णंमत्वास्त्रियोह्रीतानिलिल्युस्तत्रतत्रह ॥ अवधार्यशनैरीषद्वैलक्ष्याएप
नयोषितः ॥ उपजग्मुः प्रमुदिताः सस्त्रीरत्नंसुविस्मिताः ॥ अथतत्रासितापांगीवैदर्भीवल्गुभाषिणी ॥ अस्मरत्स्वसुतंनष्टं
स्नेहस्नुतपयोधरा ॥ कोऽन्वयंनरवैडूर्यः कस्यवाकमलेक्षणः ॥ धृतः कयावाजठरे केयंलब्धात्वनेनवा ॥ ममचाप्यात्मजोनष्टो
नीतोयः सूतिकागृहात् ॥ एतत्तुल्यवयोरूपोयदिजीवतिकुत्रचित् ॥ कथंत्वनेनसंप्राप्तंसारूप्यंशार्ङ्गधन्वनः ॥ आकृत्यावय
वैर्गत्यास्वरहासावलोकनैः ॥ सएववाभवेन्नूनंयोमेगर्भेधृतोऽर्भकः ॥ अमुष्मिन्प्रीतिरधिकावामः स्फुरतिमेभुजः ॥ एवंमी
मांसमानायांवैदर्भ्यांदेवकीसुतः ॥ देवक्यानकदुंदुभ्यामुत्तमश्लोकआगमत् ॥ विज्ञातार्थोपिभगवांस्तूष्णीमासजनार्दनः ॥
नारदोऽकथयत्सर्वंशंबराहरणादिकं ॥ तच्छ्रुत्वामहदाश्चर्यंकृष्णांतःपुरयोषितः ॥ अभ्यनंदन्बहूनब्दान्नष्टंमृतमिवागतम् ॥
देवकीवसुदेवश्चकृष्णरामौतथास्त्रियः ॥ दंपतीतौपरिष्वज्यरुक्मिणीचययुर्मुदं ॥ नष्टंप्रद्युम्नमायातमाकर्ण्यद्वारकौक
कसः ॥ अहोमृतइवायातोबालोदिष्ट्येतिहाब्रुवन् ॥ ॥ ॥ ॥ श्रीगोपीजनवल्लभायनमोनमः ॥ ॥

त्विति ॥ तदेवाधिकंसंभावयति ॥ सएवेति ॥ देवक्यानकदुंदुभ्यादेवक्यानकदुंदुभिभ्यामित्यर्थः ॥ ॥ श्रीगोपीजनवल्लभायनमः ॥

श्री० भा० द० श० २०

आछिद्य आक्षिप्यगृहीत्वा अजपत उपांस्ववोचत। क्रव्यार्थे आमिषार्थे। अष्टाविंशाहं अष्टाविंशतिश्चादिनानियस्मिंस्तत्॥ अष्टाविं

प्रसेनं४ मणिग्रीवः अपयशो दारयितुं४ जांबवान१ पुत्रस्य

प्रसेनंसहयंहत्वामणिमाछिद्यकेसरी॥ गिरिंविशन्जांबवतानिहतोमणिमिछता॥ सोपिचक्रेकुमारस्यमणिंक्रीडन
कंबिले॥ अपश्यन्भ्रातरंभ्रातासत्राजित्पर्यतप्यत॥ प्रायःकृष्णेननिहतोमणिग्रीवोवनंगतः॥ भ्राताममेतितछ्रुत्वाक
र्णेकर्णेजपन्जनाः॥ भगवांस्तदुपश्रुत्यदुर्यशोलिप्तमात्मनि॥ मार्ष्टुंप्रसेनपदवीमन्वपद्यतनागरैः॥ हतंप्रसेनमश्वंचवी
क्ष्यकेसरिणावने॥ तंचाद्रिपृष्ठेनिहतमृक्षेणददृशुर्जनाः॥ ऋक्षराजबिलंभीममंधेनतमसावृतम्॥ एकोविवेशभगवा
नवस्थाप्यबहिःप्रजाः॥ तत्रदृष्ट्वामणिप्रेष्ठंबालक्रीडनकंकृतं॥ हर्तुंकृतमतिस्तस्मिन्नवतस्थेर्भकान्तिके॥ तम जांबवान् समीपे५
पूर्वंनरंदृष्ट्वाधात्रीचुक्रोशभीतवत्॥ तछ्रुत्वाभ्यद्रवत्क्रुद्धोजांबवान्बलिनांवरः॥ सवैभगवतातेनयुयुधेस्वामिना
त्मनः॥ पुरुषंप्राकृतंमत्वाकुपितोनानुभाववित्॥ द्वंद्वयुद्धंसुतुमुलमुभयोर्विजिगीषतोः॥ आयुधाश्मद्रुमैर्दोर्भिः
क्रव्यार्थेश्येनयोरिव॥ आसीत्तदष्टविंशाहमितरेतरमुष्टिभिः॥ वज्रनिष्पेषपरुषैरविश्रममहर्निशं॥ कृष्ण
मुष्टिविनिष्पातनिष्पिष्टांगोरुबंधनः॥ क्षीणसत्वःस्विन्नगात्रस्तमाहातीवविस्मितः॥ ॥ ॥ ॥ ॥

संधि२ पुष्ट२ जांबवान् कृष्णं निर्घात२

शस्यहंविंशतिशब्देतिलोपःचार्षः वज्रस्यनिष्पेषोनिर्घातस्तद्वत्परुषैर्निष्ठुरैः श्रीकृष्णस्यमुष्टीनांविनिष्पातैराघातैर्विनिष्पि श्री कृष्ण
ष्टानिविश्लथानिअंगानांऊरूणिबंधनानिसंधिस्थानानियस्यसः॥ ॥श्रीगोपीजनवल्लभायनमोनमः॥ ॥ २०

रथ्यागमनं

दीव्यते क्रीडते सूर्योयमिति शंकिताः संतः कथयामासुरिति॥ सूर्यं नमस्कारायागतं कल्पयित्वोद्दिक्षु तत्स्त्रीणां संबोधनानि नारायणेत्य
पादीनि॥ गभस्तिचक्रेण रश्मिजालेन मुष्णन् प्रतिघ्नन्॥ तिग्माः तीक्ष्णा गावो रश्मयो यस्य सः॥ न चेदं मघवमानमित्याह न चिंति
। अन्विच्छंति मृगयंते। अजः भर्यः बालानामज्ञानां वचनं ज्वलन् विद्योतमानः कृतानि कौतुकेन उत्सवेन मंगलानि यस्मिन् तत्र॥ विप्रैः कृ

दामोदरं विलोक्य जना दूरात्तेजसा मुष्टदृष्टयः॥ दीव्यतेक्षैर्भगवते शशंसुः सूर्यशंकिताः॥ नारायण नमस्तेस्तु शंखचक्रगदाधर॥ दामो
दरारविंदाक्ष गोविंद यदुनंदन॥ एष आयाति सविता त्वां दिदृक्षुर्जगत्पते॥ मुष्णन् गभस्तिचक्रेण नृणां चक्षूंषि तिग्मगुः॥ नन्व
न्विच्छंति ते मार्गं त्रिलोक्यां विबुधर्षभाः॥ ज्ञात्वाद्य गूढं यदुषु द्रष्टुं त्वां यात्यजः प्रभो॥ ॥श्रीशुक उवाच॥ ॥निशम्य बालवचनं प्र
हस्यांबुजलोचनः॥ प्राह नासौ रविर्देवः सत्राजिन्मणिना ज्वलन्॥ सत्राजित्स्वगृहं श्रीमत्कृतकौतुकमंगलं॥ प्रविश्य देवसदने
मणिं विप्रैर्न्यवेशयत्॥ दिने दिने स्वर्णभारानष्टौ स सृजति प्रभो॥ दुर्भिक्षमार्यरिष्टानि सर्पाधिव्याधयोशुभाः॥ न संति मा
यिनस्तत्र यत्रास्तेभ्यर्चितो मणिः॥ स याचितो मणिं क्वापि यदुराजाय शौरिणा॥ नैवार्थकामुकः प्रादाद्याच्ञाभंगमतर्कयन्॥
यन्॥ तमेकदा मणिं कंठे प्रतिमुच्य महाप्रभं॥ प्रसेनो हयमारुह्य मृगयां व्यचरद्वने॥ ॥श्रीगोपीजनवल्लभायनमः॥ ॥

त्यान् प्रमाणं॥ चतुर्भिर्व्रीहिभिर्गुंजं गुंजान् पंच पणं पणान्॥ अष्टौ धरणमष्टौ च कर्षं तांश्चतुरः पलं॥ तुलां पलशतं प्राहुर्भारः स्या
द्विंशतिस्तुलाः इति॥ मारी नाम अकालमृत्युः अरिष्टमतद्भुतं अशुभा दुःखहेतवः क्वापि कदाचित्॥ अनेन भगवत्समर्पणस्य यम
ग्रतो नोजितः सर्वारिष्टनिवर्तकमपि अरिष्टहेतुरेव भवतीति सूचितं तद्दर्शयितुमाह तमेकदेति प्रतिमुच्य बद्ध्वा प्रसेनः सत्रा

श्री० भा० द० श० २१ सह मणिना समर्पयामास ॥ श्रीकृष्णप्राप्तये चंद्रभागां नाम दुर्गामभजन् ॥ स च कृष्णस्तेषां प्रादुर्बभूव श्यामवर्ड्डतिपाठे श्यमवर्ड्ढिंद्रियाणि ते
षां श्रेष्ठ इत्यर्थः ॥ कदाचिद्देव्या उपस्थानात याताभृति आदिष्टा दत्ता या आसीः कृष्णं इत्यं यति तया सहैव यदि लोके जनाः कथंचिन्मृतं
बंधुं पुनरागतमुपलभंते ॥ तद्वदुपलभ्य सर्वे जातमहोत्सवा आसन्निति ॥ पाप्मना अपराधेनानुतप्यमानः अघं दोषं ॥ आत्मनो रजः
५ स्वकः प्रादुर्बभूव सिद्धार्थः सदारो हर्षयन् हरिः ॥ उपलभ्य हृषीकेशं मृत्वा पुनरिहागतं ॥ ४४

इत्युक्तः स्वां दुहितरं कन्यां जांबवतीं मुदा ॥ अर्हणार्थं स मणिना कृष्णायोपजहार ह ॥ अदृष्ट्वा निर्गमं शौरेः प्रविष्टस्याबिलं
जनाः ॥ प्रतीक्ष्य द्वादशाहानि दुःखिताः स्वपुरं ययुः ॥ निशम्य देवकी देवी रुक्मिण्यानकदुंदुभिः ॥ सुहृदो ज्ञातयः शोचन् बिला
त्कृष्णमनिर्गतं ॥ सत्राजितं शपन्तस्ते दुःखिता द्वारकौकसः ॥ उपतस्थुश्चन्द्रभागां दुर्गां कृष्णोपलब्धये ॥ तेषां तु देव्युपस्था
नात् प्रत्यादिष्टाशिषां स ह ॥ सहपत्न्या मणिग्रीवं सर्वे जातमहोत्सवाः ॥ सत्राजितं समाहूय सभायां राजसन्निधौ ॥ प्राप्तिं चा
ख्याय भगवान् मणिं तस्मै निवेदयत् ॥ प्रादुर्बभूव सिद्धार्थः सदारो हर्षयन् हरिः ॥ उपलभ्य हृषीकेशं मृत्वा पुनरिहागतं ॥
स चातिव्रीडितो रत्नं गृहीत्वा वाङ्मुखस्ततः ॥ अनुतप्यमानो भवनमगमत्स्वेन पाप्मना ॥ सोनुध्यायंस्तदेवाघं बलवद्विग्रहा
कुलः ॥ कथं मृजाम्यात्मरजः प्रसीदेद्वा पुनः कथं ॥ किं कृत्वा साधु मह्यं स्यान्न शपेद्वा जनो यथा ॥ अदीर्घदर्शनं क्षुद्रं मूढं द्रविणलो
लुपं ॥ दास्ये दुहितरं तस्मै स्त्रीरत्नं रत्नमेव च ॥ उपायोयं समीचीनस्तस्य शांतिर्न चान्यथा ॥ ॥ ॥ ॥ ॥ ॥

मलं अपराधमिति ॥ किं कृत्वा कस्मिन्कृते इत्यर्थः ॥ साधु तदं अदीर्घदर्शनं अविचारकं मां क्षुद्रं कृपणं ॥ मूढं मंदमति ॥ एवं ध्यायन् श्रीकृष्ण
उपायं निश्चिनोति ॥ दास्य इति ॥ स्त्रीरत्नं दुहितरं तावद्दास्यामि ॥ तदनंतरं पारिबर्हत्वेन रत्नमपीति ॥ ॥ ॥ ॥ ॥ ॥ २१

लोके कोवायं मत्तो वली यानिति विस्मितः सन्निममाह ॥ जाने इति ॥ सर्व्वभूतानां यः प्राणः तत्र च यदोजः सहो वलं इंद्रियहृदयदेहवलानि तत्
सर्व्वं त्वमित्यहं जाने कथं तथा त्वमत आह विष्णुमित्यादि ॥ पुराणत्वे हेतुः त्वं हीति ॥ स्रष्टा निमित्तं यच्च सत् तु उपादानं । अतः पुराणः प्रभवि
ष्णुत्वे हेतुः । अधीश्वरत्वमप्यत एवेत्याह ॥ ईशः पर इति । न च तदस्य इत्याह । आत्मनामात्मेति ॥ यत एवंभूतः । अतो मम इष्टदेवं रघु
नाथमेव त्वमित्याह ॥ यस्येति । ईषदुत्कलितउद्दीपितो यो रोषस्तेन ये कटाक्षमोक्षास्तैस्त्रासिता नक्रा ग्राहा तिमिंगिला महामत्स्या य

ईक्षित १ हृदय ३ रामरूपस्य तव २ उत्थित २ छिन्नानि ३ क्षिप्तैः १

२ उपादानं
गताद्‌१
मनामस्य२
उतेवानद१

जाने त्वां सर्व्वभूतानां प्राण ओजः सहो बलं । विष्णुं पुराणपुरुषं प्रभविष्णुमधीश्वरं ॥ त्वं हि विश्वसृजां स्रष्टा सृज्यानाम
पि यच्च सत् ॥ कालः कलयतामीशः पर आत्मा तथात्मनां ॥ यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्माऽदिशत् क्षुभित
नक्रतिमिंगिलोब्धिः ॥ सेतुः कृतः स्वयश उज्वलिता च लंका रक्षःशिरांसि भुवि पेतुरिषुक्षतानि ॥ इति विज्ञातविज्ञानमृक्षरा
जानमच्युतः ॥ व्याजहार महाराज भगवान् देवकीसुतः ॥ अभिमृश्यारविंदाक्षः पाणिना शंकरेण तं ॥ कृपया परया
भक्तं प्रेमगंभीरया गिरा ॥ मणिहेतोरिह प्राप्ता वयमृक्षपते विलं ॥ मिथ्याभिशापं प्रमृजन् आत्मनो मणिनामुना ॥ ॥

अपवादं १ [illegible]रयन् १

यस्मिन् सोब्धिः वर्त्मादिशत् दत्तवान् । तथापि तस्मिन् येन स्वयं वौ स्वयश एव सेतुः कृतः उज्वलिता दग्धा यस्येषुभिः छिन्ना
निछिन्ना निरक्षमो दशग्रीवस्य शिरांसि भुवि पेतुः स एव त्वमिति जाने । इति विज्ञातं विज्ञानं येन तं विज्ञानशब्दः करणसाध
नः कर्म्मसाधनो वा । ऋक्षराजं प्रति उक्तवान् वयं त्विह वक्षो विलद्वारं प्राप्तास्तत्र मिथ्याभिशापममुना मणिना प्रमृजन् प्रमार्ष्टु
महमेक एवान्तर्विलमिह प्राप्त इत्यर्थः ॥ ॥

जघ्निवानुजगाम॥ हेलनं श्रुतिकुलं। वृजिनं अपराधं॥ अपीतो मृतः सप्तदशसंख्याकान् संयुगान्॥ तौ रामकृष्णावेकमेव तत्वमित्यति

शतधन्वा१ अक्रूरकृतवर्माणौ१ रामकृष्णतः२ कृ०१६ कं०४

एवं भिन्नमतिस्ताभ्यां सत्राजितमसत्तमः॥ शयानमवधील्लोभात्स पापः क्षीणजीवितः॥ स्त्रीणां विक्रोशमानानां क्रंदन्तीनामनाथवत्॥ हत्वा पशून्सौनिकवन्मणिमादाय जग्मिवान्॥ सत्यभामा च पितरं हतं वीक्ष्य शुचार्पिता॥ व्यलपत्तात तातेति हा हतास्मीति मुह्यती॥ तैलद्रोण्यां मृतं प्रास्य जगाम गजसाह्वयं॥ कृष्णाय विदितार्थाय तप्ताचख्यौ पितुर्वधं॥ तदाकर्ण्येश्वरौ राजन् अनुसृत्य नृलोकताम्॥ अहो नः परमं कष्टमित्यास्राक्षौ विलेपतुः॥ आगत्य भगवांस्तस्मात्सभार्यः साग्रजः पुरं॥ शतधन्वानमारेभे हंतुं हर्तुं मणिं ततः॥ सोपि कृतोद्यमं ज्ञात्वा भीतः प्राणपरीप्सया॥ साहाय्ये कृतवर्माणं अयाचत स चाब्रवीत्॥ नाहमीश्वरयोः कुर्यां हेलनं रामकृष्णयोः॥ को नु क्षेमाय कल्पेत तयोर्वृजिनमाचरन्॥ कंसः सहानुगोपीतो यद्द्वेषात्त्याजितः श्रिया॥ जरासंधः सप्तदशसंयुगान्विरथो गतः॥ प्रत्याख्यातः स चाक्रूरं पार्ष्णिग्राहमयाचत॥ सोप्याह को विरुध्येत विद्वानीश्वरयोर्बलं॥ य इदं लीलया विश्वं सृजत्यवति हन्ति च॥ चेष्टां विश्वसृजो यस्य न विदुर्मोहिताजया॥ यः सप्तहायनः शैलमुत्पाट्यैकेन पाणिना॥ दधार लीलया बाल उच्छिलींध्रमिवार्भकः॥ नमस्तस्मै भगवते कृष्णायाद्भुतकर्मणे॥ अनन्तायादिभूताय कूटस्थायात्मने नमः॥ प्रत्याख्यातः स तेनापि शतधन्वा महामणिं॥ तस्मिन्न्यस्याश्वमारुह्य शतयोजनगं ययौ॥ गरुडध्वजमारुह्य रथं रामजनार्दनौ॥ अन्वयातां महावेगैरश्वै राजन्गुरुद्रुहम्॥ ॥ ॥ ॥ श्रीगोपीजनवल्लभाय नमः॥ ॥

अक्रूरादयः३ ततस्तेन

प्रत्याह॥ य इदमिति॥ अजया मायया मोहिता अजयेति संधिरार्षः॥ अंतर्यामि कृष्णनिवृत्तं तस्मिन्नक्रूरे मणिं न्यस्य पयो पलायत॥ गुरुद्रु

बद्भुतिः कृतवर्म्मादिभिर्म्मणिं न प्रतीच्छामः न स्त्रीं कुर्म्मः। देवः सूर्य्यस्तद्भक्तस्येति। कदा नः फलभागिन इति॥ तु वा पुत्रत्वात्त्वदीयं धनं
स्माकमेवेति गूढोभिप्रायः॥ ॥इति दशमे षट्पंचाशत्तमः॥ ॥सप्तपंचाशत्तमे तु पुनः शतधन्वनो वधे॥ प्राप्तं स्वदुर्यशो मा बस्कं १
र्ष्टिं कृष्णो नाक्रूराहृतान्मणेः॥२॥ अक्रूरमुख्यैः कृतमंत्रणैः पात्रमयाच्युतः॥ उपमंत्र्य तमेकांते सरामो गाङ्गजाह्वयं॥२॥ सत्राजितः
॥ वं ३ वानुदग्धान्ज्ञातवानपि ४ निर्लाचारार्थं ४

एवं व्यवसितो बुद्ध्या सत्राजित्स्वसुतां शुभां॥ मणिं च स्वयमुद्यम्य कृष्णायोपजहार ह॥ तां सत्यभामां भगवानुपयेमे य
थाविधि॥ बहुभिर्याचितां शीलरूपौदार्य्यगुणान्वितां॥ भगवानाह न मणिं प्रतीच्छामो वयं नृप॥ तवास्तां देवभक्तस्य वयं
च फलभागिनः॥ ॥इति श्रीभागवते महापुराणे दशमस्कंधे स्यमंतकोपाख्याने षट्पंचाशत्तमोऽध्यायः॥ ॥ ॥
श्रीशुक उवाच॥ ॥विज्ञातार्थोपि गोविंदो दग्धानाकर्ण्य पांडवान्॥ कुंतीं च कुल्यकरणे सहरामो ययौ कुरून्॥ भीष्मं कृ
पं सविदुरं गांधारीं द्रोणमेव च॥ तुल्यदुःखैः सहागम्य हा कष्टमिति होचतुः॥ लब्ध्वैतदंतरं राजन् शतधन्वानमूचतुः॥ अ
क्रूरकृतवर्म्माणौ मणिः कस्मान्न गृह्यते॥ योस्माकं संप्रतिश्रुत्य कन्यारत्नं विगर्ह्य नः॥ कृष्णायादात्सत्राजित्कस्माद्भ्रात
पादबौ १

कृष्णाज्ञाभंगफलं व्यक्तीकर्तुमाह॥ विज्ञातार्थोपीति। पांडवा बिलद्वारेण जतुगृहान्निर्गता इत्येवं विज्ञातार्थोपि नः सः कुंती च दग्धा
माकर्ण्य कुल्यकरणे कुलोचितसंव्यवहारार्थं। अन्येषां तद्दुःखदुःखाभावात् भीष्मादीन्सगम्येत्युक्तं। ननु जीवत्सत्राजित्कथं
मणिं दास्यति॥ तत्राहतुः॥ योस्मभ्यमिति भ्रातरं प्रसेनं मृतं कस्मान्नान्वियात् गच्छेन् मृयतामित्यर्थः॥ ॥ ॥ ॥

श्री भा० द० शा० २३

ऊषतुः द्वारकायाः सकाशात् क्वापि पलायितौ प्रयोजकौ मणिहरणे शतधन्वनः प्रवर्त्तकौ ॥ तत्राक्रूरः कृष्णानुमतेनैव गतः कृ-
तवर्म्मा तु तत्पक्षपातप्राकट्यभयादिवोपेक्षित इति गम्यते कथमन्यथा सर्वज्ञेश्वरवंचनं तयोः संभवतीति ॥ तदेव श्रीवाराण-
स्यां दानपतिं समीक्षया मणिहस्तेऽक्रूरे रुक्मवेदिकैर्महाध्वरैर्यजमाने निवसति पुनः श्रीकृष्णेनैव प्रस्थापितोऽक्रूर इति कृष्णस्य क-
र्णेजपति जने स्वसभामारामादीनामप्यविश्वासे जनसंग्रहायाक्रूरमाहूय मानेपयं श्रीकृष्णः प्राह ॥ इदं च भगवन्मतं सारोप्यं ।

गते पलायितौ

अक्रूरः कृतवर्म्मा च श्रुत्वा शतधनोर्वधं ॥ व्यूषतुर्भयवित्रस्तौ द्वारकायाः प्रयोजकौ ॥
अक्रूरे प्रोषितेऽरिष्टान्यासन्वै द्वारकौकसां ॥ शारीरा मानसास्तापा मुहुर्दैविकभौतिकाः ॥
इत्यंगोपदिशंत्येके विस्मृत्य प्रागुदाहृतं ॥ मुनिवासनिवासे किं घटेतारिष्टदर्शनम् ॥

हे राजन् कृष्णमाहात्म्यं कथं

केचन कृष्णयोऽन्यत्कारणमक्रूरानयने वर्णयंति ॥ तद्यथा ॥ कृतं दूषयितुमनुवदति । अक्रूरे प्रोषित इति । दूषयति । इतीति ॥
अंग हे राजन् ॥ श्रीकृष्णमाहात्म्यं विस्मृत्येति ॥ तदेवाह ॥ मुनिवास इति ॥ मुनीनां निवासो यस्मिन् सः मुनिवासः श्रीकृष्ण- श्रीकृष्ण
स्तस्य निवासे सति अक्रूरायगमनमात्रेणारिष्टदर्शनं किं घटते । तदिच्छां विना न घटते एवेत्यर्थः ॥ ॥ ॥ ॥ २३

शतयोजनमात्रंगामित्वाततःपरंगंतुमशक्तःपतितस्तंहयंविसृज्याव्यचिनोतमृगयामास॥अक्रूरेमणिरस्तीतिसर्वज्ञतयाविदित्वापि
रामवंचनायतघातितवानितिभावः॥अन्वेष अन्विछ्सर्वज्ञस्यैवं चेष्टितंमद्वंचनायेतिमत्वाप्ररूढमन्युराह॥अहमिति॥कतिचित्समाः

वनुषीः　वस्त्रयोः　शतधन्वा　पश्चात्　रामः२　जनकं३

५ता२ मिथिलायामुपवनेविसृज्यपतितंहयं॥पद्भ्यामधावत्संत्रस्तःकृष्णोप्यन्वद्रवद्रुषा॥पदातेर्भगवांस्तस्यपदातिस्तिग्मनेमिना॥ वस्त्रयोः२
वक्रेणशिरउत्कृत्यवाससोर्व्यचिनोन्मणिं॥अलब्धमणिरागत्यकृष्णआहाग्रजान्तिकं॥वृथाहतःशतधनुर्मणिस्तत्रनविद्य
रामः३ ते॥ततआहबलोनूनंसमणिःशतधन्वना॥कस्मिंश्चित्पुरुषेन्यस्तस्तमन्वेष्टुंपुरंव्रज॥अहंविदेहमिच्छामिद्रष्टुंप्रियतरंमम॥
जनकेः४ इत्युक्त्वामिथिलांराजन्विवेशयदुनंदनः॥तंदृष्ट्वासहसोत्थायमैथिलःप्रीतमानसः॥अर्हयामासविधिवत्अर्हणीयं रामः
समार्हणैः॥उवासतस्यांकतिचिन्मिथिलायांसमाविभुः॥ततोशिक्षद्गदांकालेधार्त्तराष्ट्रःसुयोधनः॥मानितःप्रीतियुक्तेन सत्यभामातः३
जनकेनमहात्मना॥केशवोद्वारकामेत्यनिधनंशतधन्वनः॥अप्राप्तिंचमणेःप्राहप्रियायाःप्रियकृद्विभुः॥ततःसकार
यामासक्रियाबंधोर्हतस्यवै॥साकंसुहृद्भिर्भगवान्ययास्युःसांपरायिकाः॥　॥श्रीगोपीजनवल्लभायनमोनमः॥ ॥

पितुः　सत्यभामायाः

संवत्सरानुषासंगिकमाह॥ततइतिसत्यभामामप्येवंवंचयदितिसूचयन्नाह॥केशवइति॥बंधोःसत्राजितःसांपरायिकाःपारलौ
किक्यः॥

श्री०
भा० द०
श०
२४

यतः अप्युछिन्ना संततामस्वावर्त्तेत इति मूलप्रयुक्तः हृदिस्पष्टइतिवा। रजः मिथ्याभिशापं संमृजपन्नमे दुर्धर इत्यादिभिः षुण्प्रतीत्या भूयस्तस्मै प्र
त्यर्पितवानिति। दुःकीर्त्तिं तन्मूलं दुरितं चेति॥ ॥इतिदशमेसप्तपंचाशत्तमः॥ ॥अष्टपंचाशत्तमे तु कृष्णः पंचकरे गृहीत। कालिंदीमित्र
विंदां च सत्यां भद्रां च लक्ष्मणां। कालिंदी निजलाभाय तपः परमुपेयुषी। परित्रेण स्त्रिया वा समिंद्रप्रस्थमेयोगमते॥ भा। प्रतीतान्नष्टान्
अप्युछिन्नमरवास्त्वद्यवर्त्ततेरुकमवेदयः॥ एवं सामभिरालब्धः स्वफल्कतनयामणिं॥ आदायवाससाछन्नं ददौ सूर्यसमप्रभं॥ स्यमं
तकं दर्शयित्वा ज्ञातिभ्यो रंज आत्मनः॥ विमृज्यमणिना भूयस्तस्मै प्रत्यर्प्पयत्प्रभुः॥ यस्त्वेतद्भगवत ईश्वरस्य विष्णोर्वीर्याढ्यं वृजिन
हरं सुमंगलं च॥ आख्यानं पठति शृणोत्यनुस्मरेद्वा दुःकीर्त्तिं दुरितमपोह्ययाति शांतिं॥ ॥इतिश्रीभागवते महापुराणे दशमस्कंधे
स्यमंतकोपाख्याने सप्तपंचाशत्तमोध्यायः॥ ॥श्रीशुक उवाच॥ ॥एकदा पांडवान्द्रष्टुं प्रतीतान्पुरुषोत्तमः॥ इंद्रप्रस्थं गतः
श्रीमान्युयुधानादिभिर्वृतः॥ दृष्ट्वा तमागतं पार्था मुकुंदमखिलेश्वरं॥ उत्तस्थुर्युगपद्वीराः प्राणा मुख्यमिवागतं॥ परिष्वज्या
च्युतं वीरा अंगसंगहतैनसः॥ सानुरागस्मितं वक्त्रं वीक्ष्य तस्य मुदं ययुः॥ युधिष्ठिरस्य भीमस्य कृत्वा पादाभिवंदनं॥ फाल्गुनं प
रिरभ्याथ यमाभ्यां चाभिवादितः॥ परमासन आसीनं कृष्णा कृष्णमनिंदिता॥ नवोढा व्रीडिता किंचिच्छनैरेत्याभ्यवंदत॥
तथैव सात्यकिः पार्थैः पूजितश्चाभिवंदितः॥ निषसादासनेन्येपि च पूजिताः पर्युपासत॥ ॥ ॥ ॥ ॥

पितृष्वसारं गत्वा पुनः सर्वैर्हि स्मानं युयुधानः सात्यकिः॥ प्राणा इंद्रियाणि मुख्यं पंचवृत्तिं प्राणमिव॥ ज्येष्ठयोः प्रणामं कृत्वा अर्जुनेना श्रीकृष्ण
लिंगितः कनिष्ठाभ्यामभिवंदितो बभूव॥ कृष्णा द्रौपदी वधूः भार्यासत्यपि निंदारहिता पार्थैर्न्नवं अचिरं। ऊढापरिणीता॥ ॥ २४

पुनस्तन्मतमेवानुवर्त्स्यति॥ काशिदेशेषु देवे मघवति अवर्षति सति इत्येवं स्वतमक्रूरमहिमाप्रतिपादनपरं वृद्धानां वाक्यं स्मृत्वा सम
समेतं तथाप्येतावदेव कारणं न भवति। किंतु मणेरपगम इति मत्वेसेतदेतं परमतं विज्ञातमखिलं येन स चासौ अत एव वचित्तज्ञश्च॥ अयंभावः
महाभागवतस्यास्य मयादत्तेपि मणावपेक्षा नास्त्येव॥ यस्माद् आहूतो मणिना सहैवागत इति। ज्ञात्वेति॥ ततः किमत आह॥ सत्राजित इति

काशिदेशराजः १ इन्द्रः २ देवः १ देशेषु १ स्वफल्क। ...

देवे वर्षति काशीशः श्वफल्काय गताय वै॥ स्वसुतां गांदिनीं प्रादात् ततोऽवर्षत् स काशिषु॥ तत्सुतस्तत्प्रभावोऽसावक्रूरो यत्र
यत्र ह॥ देवोऽभिवर्षति तत्र नोपतापा न मारिकाः॥ इति वृद्धवचः श्रुत्वा नैतावदिह कारणम्॥ इति मत्वा समानाय्य प्राहाक्रूरं जनार्द
नः॥ पूजयित्वाऽभिभाष्यैनं कथयित्वा प्रियाः कथाः॥ विज्ञाताखिलचित्तज्ञः स्मयमान उवाच ह॥ ननु दानपते न्यस्तस्त्वय्यास्ते श
तधन्वना॥ स्यमंतको मणिः श्रीमान् विदितः पूर्वमेव नः॥ सत्राजितोऽनपत्यत्वाद् गृह्णीयुर्दुहितुः सुताः॥ दायं निनीयापः पिंडान्
विमुच्यर्णं च शेषितं॥ तथापि दुर्धरस्त्वन्यैस्त्वय्यास्तां सुव्रते मणिः॥ किंतु मामग्रजः सम्यक् न प्रत्येति मणिं प्रति॥ दर्शयस्व महा
भाग बंधूनां शान्तिमावह॥ ॥

रामः सत्यभामायाः २ गृहीता २ न विश्वसिति।
कुरु मणिः २

अपः पिंडांश्च निनीय दत्त्वा ऋणं च विमुच्य पापक्षयशेषितमवशिष्टं दायं दुहितुः सत्यभामायाः सुता गृह्णीयुरिति शास्त्रं तथा च स्म
रंति। पत्नी दुहितरश्चैव पितरो भ्रातरस्तथा॥ तत्सुतस्तस्य गोत्रजा बंधुः शिष्याः सब्रह्मचारिण इति। अग्रजोपि न प्रत्येति न विश्वसिति नास्ती
तिं न च वक्तव्यं॥ ॥

श्री० भा० द० शा० २५

वीतत्कुरर्ज्जुनः। सर्वथा श्रीकृष्णेन॥ अयं मां कामये यदिति शंकयाह॥ नान्यमिति॥ आदावेव तद्विद्वान् प्रसंगात्तत्कालीनं चरित्रांतरमा
ह॥ यदैवेति॥ पार्थैर्यदैव संदिष्टो विज्ञापितः श्रीकृष्णः। तदैव तेषां विश्वकर्म्मणा देवशिल्पिना नगरं कारयामास॥ किंच॥ भगवान्त्रि

अर्जुनः १ पार्थैर्विज्ञापितः १ कृष्णेन २ अर्जुनः २ कृष्णार्जुनौ १

सुदंती २ तृषुरीतः परिश्रांतो वीभत्सुर्यमुनामगात्॥ तत्रोपस्पृश्य विशदं पीत्वा वारि महारथौ॥ कृष्णौ ददर्शतुः कन्यां चरंतीं चारुदर्शनां॥
तामासाद्य वरारोहां सुद्विजां रुचिराननां॥ पप्रच्छ प्रेषितः सख्या फाल्गुनः प्रमदोत्तमां॥ कात्वं कस्यासि सुश्रोणि कुतोवा किं चिकी
र्षसि॥ मन्ये त्वां पतिमिच्छंतीं सर्वं कथय शोभने॥ ॥कालिंद्युवाच॥ ॥ अहं देवस्य सवितुर्दुहिता पतिमिच्छती॥ विष्णुं वरेण्यं वर
[illegible] दं तपः परमम् आस्थिता॥ नान्यं पतिं वृणे वीर तमृते श्रीनिकेतनं॥ तुष्यतां मे स भगवान्मुकुंदो नाथसंश्रयः॥ कालिंदीति समाख्या
ता वसामि यमुनाजले॥ निर्म्मिते भवने पित्रा यावदच्युतदर्शनं॥ तथावदद्गुडाकेशो वासुदेवाय सापि तां॥ रथमारोप्य तद्विद्वा
[illegible] न्धर्म्मराजमुपागमत्॥ यदैव कृष्णः संदिष्टः पार्थानां परमाद्भुतं॥ कारयामास नगरं विचित्रं विश्वकर्म्मणा॥ भगवांस्तत्र नि
कवचं वसन्स्वानां प्रियचिकीर्षया॥ अग्नये खांडवं दातुमर्ज्जुनस्यास सारथिः॥ सोग्निस्तुष्टो धनुरदाद्धयान्श्वेतान्रथं नृ
प॥ अर्ज्जुनायाक्षयौ तूणौ वर्म्म चाभेद्यमस्त्रिभिः॥ मयश्च मोचितो वह्नेः सभां सख्य उपाहरत्॥ यस्यां दुर्योधनस्यासीज्जल
स्थलदृशिभ्रमः॥ स तेन समनुज्ञातः सुहृद्भिश्चानुमोदितः॥ आययौ द्वारकां भूयः सात्यकिप्रमुखैर्वृतः॥ ॥ ॥ ॥

खांडवनदाहार्थम् [illegible] अर्जुनेन [illegible] सुहृद्भिः [illegible]

१ कृष्णः अर्जुनेन १ ॥ [illegible] ततः [illegible] ॥ २ ॥ ॥

रतिशयैश्वर्यगुणवानपि अर्ज्जुनस्य धनुरादिलाभाय सारथिरासं॥ खांडवं नाम इंद्रस्य वनं। अग्नये [illegible] खांडवदाहकव श्रीकृष्ण
स्याने हुः। सख्ये अर्ज्जुनाय यः अक्षय्यौ इति सामान्यतो निर्देशः। यस्यामिमर्थः॥ जलस्थलयोर्दृशो दृष्टेर्भ्रमः। यत्र जले स्थलवद्दृक् दृष्टिर्य २५
स्मिंस्तज्जले स्थलदृक् तस्मिन्भ्रम आसीदिति॥ ॥ ॥ ॥ श्रीगोपीजनवल्लभाय नमः॥

॥ [illegible] ॥ [illegible] मानेन मयेन वह्नितो मोचितः॥ [illegible]
[illegible] ॥५॥ ॥

अतिहार्द्देनस्नेहेनसार्द्धंसजलेदृशौयस्यास्तयापरिष्वक्तः तयापरिष्टष्टावांधवायस्यसः । प्रेम्णावैक्लव्यंतेनरुद्धः कंठोयस्याः क्लेशापायेआत्म
निदर्शनंयस्यतं । नजतांनक्तानांक्लेशापायआत्मानंदर्शयतीतिवा ॥ ज्ञातीन्वंधूंश्चनः अस्मान् । यदाभ्राताअक्रूरप्रेषितः । ज्ञातीनिति
अक्रूरः ३ वदिष्वक्तः नाशर देवकेशं
कुंती १२ दृष्टांसमागत्यकृतामिवादनस्तुयातिहार्दार्द्रदृशाभिरंभितः ॥ आष्टष्टवांस्तान्कुशलंसहस्नुषांपितृष्वसारंपरिष्टष्टबांधवः ॥ तमा
हप्रेमवैक्लव्यरुद्धकंठाश्रुलोचना ॥ स्मरंतीतान्बहून्क्लेशान्क्लेशापायात्मदर्शनं ॥ तदेवकुशलंनोभूत्सनाथास्तेकृतावयं ॥
ज्ञातीन्नःस्मरताकृष्णभ्रातामेप्रेषितस्त्वया ॥ नतेस्तिस्वपरभ्रांतिर्विश्वस्यसुहृदात्मनः ॥ तथापिस्मरतांशश्वत्क्लेशान्हं
४ युधिष्ठिरउवाच सिहृदिस्थितः ॥ ॥ किंनआचरितंश्रेयोनवेदाहमधीश्वर ॥ योगेश्वराणांदुर्दर्शोयन्नोदृष्टःकुमेधसां ॥ इतिवैवार्षिकान्मासा गमर्जुनः
युधि० ३ १२ ८५ न्राज्ञासोभ्यर्थितःसुखं ॥ जनयन्नयनानंदमिंद्रप्रस्थौकसांविभुः ॥ एकदारथमारुह्यविजयोवानरध्वजं ॥ गांडीवंधनुरा
दायतूणौचाक्षयसायकौ ॥ साकंकृष्णेनसन्नद्धोविहर्तुंविपिनंमहत् ॥ बहुव्यालमृगाकीर्णंप्राविशत्परवीरहा ॥ तत्राविध्य
च्छरैर्व्याघ्रान्सूकरान्महिषान्रुरून् ॥ शरभान्गवयान्खड्गान्हरिणान्शशशल्लकान् ॥ तान्निन्युःकिंकराराज्ञेमेध्यान्पर्वण्युपागते ॥
युधिष्ठिराय

वचनातप्राप्तंमोहंवारयतीतिनित्रहेतुः ॥ विश्वस्येति ॥ सुहृच्चआत्माचतस्य । हंसिनाशयसिकुमेधसांविषयासक्तचित्तानांदृष्टोसि ॥
सुखंअवसदितिशेषः ॥ सुखंअभ्यर्थितइतिवासमाप्तिः ॥ कालिंदीदर्शनप्रसंगमाह ॥ एकदेति ॥ अक्षयासायकाययोस्तौतूणौ
इषुधीराज्ञेयुधिष्ठिरायमेध्यान्कर्म्मार्हान् ॥ ॥ ॥ ॥ श्रीगोपीजनवल्लभायनमोनमः ॥ ॥

श्री० हेनरेंद्रराजन्यवंधोः क्षत्रियस्य शुल्कदा द्रव्यादिप्रदाः॥ गुणानामेकमेव धाम स्थानं त्वं तथापि तस्य तवांगे दुर्दांताः अशिक्षिताः दुरवग्र
भा० द० हाः अपरायत्ताः कुतस्त्वदाह॥ एतैरिति॥ भग्नाः भंगं प्राप्ताः॥ एतान्यो निगृह्णाति तस्मै कन्येति समयः कृतः॥ यद्यपि दिइमे गोवृषाः सप्तधा
श०

प्रतिज्ञा १ दशा:४ अशिक्षिता:२

२६ श्रीभगवानुवाच॥ ॥नरेंद्र याच्ञा कविभिर्विगर्हिता राजन्यवंधोर्निजधर्म्मवर्त्तिनः॥ तथापि याचे तव सौहृदेच्छया कन्यां त्वदीयां
26 नहि शुल्कदा वयं॥ ॥राजोवाच॥ ॥कोन्यस्तेभ्यधिको नाथ कन्यावर इहेप्सितः॥ गुणैकधाम्नो यस्यांगे श्रीर्वसत्यनपायिनी॥ ॥ गनधीना १
दवे:४ किंत्वस्माभिः कृतः पूर्वं समयः सात्वतर्षभ॥ पुंसां वीर्यपरीक्षार्थं कन्यावरपरीप्सया॥ सप्तैते गोवृषा वीर दुर्दांता दुरवग्रहाः॥
प्रतिज्ञा ५ एतैर्भग्नाः सुवहवो भिन्नगात्रा नृपात्मजाः॥ यदिमे निगृहीताः स्युस्त्वयैव यदुनंदन॥ वरो भवानभिमतो दुहितुर्म्मे श्रियःपते॥ एवं
समयमाकर्ण्य वद्ध्वा परिकरं प्रभुः॥ आत्मानं सप्तधा कृत्वा न्यगृह्णाल्लीलयैव तान्॥ वद्ध्वा तान्दामभिः शौरिर्भग्नदर्पान्हतौजसः
॥व्यकर्षल्लीलया वद्धान्वालो दारुमयान्यथा॥ ततः प्रीतः सुतां राजा ददौ कृष्णाय विस्मितः॥ तां प्रत्यगृह्णाद्भगवान्विधिवत्सदृशीं
प्रभुः॥ राजपत्न्यश्च दुहितुः कृष्णं लब्ध्वा प्रियं पतिं॥ लेभिरे परमानंदं जातश्च परमोत्सवः॥ शंखभेर्यानका नेदुर्गीतवाद्यद्विजा
शिषः॥ नरा नार्यः प्रमुदिताः सुवासःस्रगलंकृताः॥ दशधेनुसहस्राणि पारिवर्हमदाद्विभुः॥ युवतीनां त्रिसाहस्रं निष्कग्रीवसुवाससं॥

राजा १

हत्वेति॥ वह्वीनां योषितां सपूर्त्ति एवाहं संभोगयोग्यः स्यामिति मत्वा पत्यसापत्न्यप्रदर्शनार्थमात्मनः सप्तधाकरणं निष्कग्रीवाश्चताः सु श्री ह..
वाससश्चतासां युवतीनां च दासीनाम्॥ ॥ ॥ ॥ ॥ ॥श्रीगोपीजनवल्लभाय नमो नमः॥ ॥ २६

सुपुण्यकृतुः॥ कृत्तं चयस्मिन् पंचमं मित्रविंदाविवाहमाह। विंदानुविंदा वितिद्वाभ्यां। आवंत्यौ अवन्तीराजानौ॥ षष्ठमाह॥ नग्नजिदि
ति॥ कौशल्यः अयोध्यापतिः सत्यानामकन्या आसवस्ता देवी कांतिमती॥ नाग्नजितीति। पितृनाम्ना प्रसिद्धेत्यर्थः॥ वीरस्यगंधमपिनमहं

अयोध्यापती। पूर्वं अधिके काले। रक्षैन २ अवंतीनृपौ

अथोपयेमे कालिंदीं सुपुण्यर्त्वृक्ष ऊर्जिते॥ वितन्वन् परमानंदं स्वानां परममंगलं॥ विंदानुविंदावावंत्यौ दुर्योधनवशानुगौ॥
स्वयंवरे स्वभगिनीं कृष्णे सक्तां न्यषेधतां॥ राजाधिदेव्यास्तनयां मित्रविंदां पितृष्वसुः। प्रसह्य हृतवान् कृष्णो राजन् राज्ञां प्र
पश्यतां॥ नग्नजिन्नाम कौशल्य आसीद्राजातिधार्मिकः॥ तस्य सत्याभवत्कन्या देवी नाग्नजिती नृप॥ नतां शेकुर्नृपा वोढुमजि
त्वा सप्तगोवृषान्॥ तीक्ष्णशृंगान् सुदुर्धर्षान् वीरगंधासहान् खलान्॥ तां श्रुत्वा वृषजिल्लभ्यां भगवान् सात्वतां पतिः॥ जगा
म कौशल्यपुरं सैन्येन महता वृतः॥ स कोशलपतिः प्रीतः प्रत्युत्थानासनादिभिः॥ अर्हणेनापि गुरुणा पूजयन् प्रतिनंदितः॥ वरं
विलोक्याभिमतं समागतं नरेंद्रकन्या चकमे रमापतिं॥ भूयादयं मे पतिराशिषोऽमलाः करोतु सत्या यदि मे धृतो व्रतः॥ यत्पादपंक
जरजः शिरसा बिभर्त्यश्रीरब्जजः सगिरिशः सहलोकपालैः॥ लीलातनुः स्वकृतसेतुपरीप्सयेशः॥ काले दधत्स भगवान्म
मकेन तुष्येत्॥ अर्चितं पुनरित्याह नारायण जगत्पते॥ आत्मानंदेन पूर्णस्य करवाणि किमल्पकः॥ ॥श्रीशुक उवाच॥
॥ तमाह भगवान् हृष्टः कृतासनपरिग्रहः॥ मेघगंभीरया वाचा सस्मितं कुरुनंदन॥ ॥ ॥ ॥

राजा २ धर्ममर्यादारक्षणार्थं ३ सत्याप्तितार्थं

तइतितयोः॥ खलान् दुर्धर्षान् जयतीति पः तेन लभ्यां प्रतिनंदितस्तं प्रतिनंदितवान् श्रीकृष्णेन वा सम्प्रतिनंदितः॥ ॥ ॥

वैवाहिकं १ पिता २ कालयवलिङ

श्री०
भा० द०
श०
२७
27

कृष्णेन घष्टितेन भौमं हत्वा तेनाहृता हरिः॥ कन्याः सहस्रशः प्राप्य पारिजातं दिवो हरत्॥१॥ परिणीय ततस्ताभिस्तन्मनोरथपूरणैः॥ अ॥
त्मारामोऽप्यसौ रेमे तन्गृहेषु गृहस्थवत्॥ येन ताः स्त्रियो निरुद्धाः स भौमः चकारापि घेन कारणेन हतः॥ तदा च द्वाते॥ इंद्रेण भौमवि
चेष्टितं ज्ञापितः सन् प्राग्ज्योतिषपुरं भौमनगरं ययाविसन्वयः॥ कथं भूतेन कृतं छत्रं यस्य तेन लोकपालप्रधानत्वादिंद्रस्य वरुणछ
त्रहरणेऽपि तस्यैवमानभंग इति तथोक्तं॥ कृतेकुंडले यस्याः सादितिर्बंधुमाता यस्य तेन सत्यभामा या गृहे भगवंतमिंद्र आगत्य वि
॥ भौमेन वरुणस्य छत्रं हृतं॥ इंद्रमातुरदितेः कुंडले हृ
ते॥२॥ ॥ नरकासुरः॥ भौमेन॥ हरिः॥२ सत्यभामा हरेः॥ भौमपुरनाम
॥ राजोवाच॥ ॥ यथा हतो भगवता भौमो येन च ताः स्त्रियः॥ निरुद्धा एतदाचक्ष्व विक्रमं शार्ङ्गधन्वनः॥ ॥ श्रीशुक उवाच॥ ॥
इंद्रेण हृतछत्रेण हृतकुंडलबंधुना॥ हृतामराद्रिस्थानेन ज्ञापितो भौमचेष्टितं॥ सभार्यो गरुडारूढः प्राग्ज्योतिषपुरं ययौ॥ गि
वैद्रे द४ रिदुर्गैः शस्त्रदुर्गैर्जलाग्न्यनिलदुर्गमं॥ मुरपाशायुधैर्घोरैर्दृढैः सर्वत आवृतं॥ गदया निर्बिभेदाद्रीन् शस्त्रदुर्गाणि
सायकैः॥ चक्रेणाग्निं जलं वायुं मुरपाशांस्तथासिना॥ शंखनादेन यंत्राणि हृदयानि मनस्विनाम्॥ प्राकारं गदया गुर्व्या
निर्बिभेद गदाधरः॥ पांचजन्यध्वनिं श्रुत्वा युगांताशनिभीषणं॥ मुरः शयान उत्तस्थौ दैत्यः पंचशिरा जलात्॥ ॥ ॥

ज्ञापितवान्॥ तदा तस्याः कौतुकाय तया भार्यया सह ययाविति॥ यद्वा त्वदनुज्ञयैव त्वत्पुत्रं हनिष्यामीति प्रार्थितो भूम्या वरं दत्तं
सत्यं कर्तुं सत्यभामाया भूम्यंशत्वात्तया सह ययौ॥ यद्वा नारदानीतपारिजातैककुसुमे रुक्मिण्यै दत्ते सति कुपितां सत्यभामां त्वयि तातु
भ्यं पारिजातमेव दास्यामीति श्रीकृष्णेन प्रतिज्ञातमिति हरिवंशे प्रसिद्धं॥ तद्दर्शितं॥ तद्वानितिज्ञेयं॥ गरुडेन यानेकारणाद्गिरि
दुर्गैरित्यादि तैरुपलक्षितं जलाग्न्यनिलैश्च सर्वतो वर्तमानैर्दुर्गमं युगांताशनेर्ध्वनिवद्भीषणं परिखाया जलात्॥ ॥ ॥ श्रीकृष्ण
२७

नागान्नागेभ्यः शतगुणान् नवलक्षाणि ॥ रथाद्रथेभ्यः शतगुणान् नव कोटीः ॥ अश्वादश्वेभ्यः शतगुणान्नव पद्मानि ॥ यदुभिर्गो
हैबैर्भग्नवीर्या अपि सुदुर्मर्षा असह्याः ॥ अस्यतः क्षिपतः प्रयुंजानानिति यावत् । सप्तमं विवाहमाह ॥ श्रुतकीर्त्तिर्नाम या पितृष्व

गाः ह्रिपवनः १

नवनागसहस्राणि नागाच्छतगुणान्रथान् ॥ रथाच्छतगुणानश्वानश्वाच्छतगुणान्नरान् ॥ दंपती रथमारोप्य महत्या
सेनया वृतौ ॥ स्नेहप्रक्लिन्नहृदयो यापयामास कौशलः ॥ श्रुत्वैतद्रुरुधुर्भूपा नयन्तं पथि कन्यकां ॥ भग्नवीर्याः सुदुर्म
र्षा यदुभिर्गोहैबैः पुरा ॥ तानस्यतः शरव्रातान्बंधुप्रियकृदर्जुनः ॥ गांडीवी कालयामास सिंहः क्षुद्रमृगानिव ॥ पा
द.भा.२ रिवर्हमुपागृह्य द्वारकामेत्य सत्यया ॥ रेमे यदूनामृषभो भगवान्देवकीसुतः ॥ श्रुतकीर्त्तेः सुतां भद्रामुपयेमे पितृ
ष्वसुः ॥ कैकेयीं भ्रातृभिर्दत्तां कृष्णः संतर्दनादिभिः ॥ सुतां च मद्राधिपतेर्लक्ष्मणां लक्षणैर्युताम् ॥ स्वयंवरे जहारैकः
स सुपर्णः सुधामिव ॥ अन्याश्चैवंविधा भार्याः कृष्णस्यासन्सहस्रशः ॥ भौमं हत्वा तन्निरोधादाहृताश्चा
रुदर्शनाः ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधेऽष्टपंचाशत्तमोऽध्यायः ॥ ॥ ॥ ॥

सा तस्याः सुतां तद्भद्रां नाम केकेयी तद्देशजां ॥ अष्टममाह ॥ सुतां चेति ॥ एक एव श्रीकृष्णो लक्ष्मणां जहार ॥ तस्य निरोधो तः पुरं
तस्मात् ॥ भैष्मी जांबवती नामा भसा भद्रा च लक्ष्मणा कालिंदी मित्रविंदा चेत्यष्ट पट्टमहिष्यः ॥ इति दशमेऽष्टपंचाशत्तमः ॥ ॥

श्री०
भा० द०
प्रा०
२८॥
गरुडेन २
शत्रुघातात् ४
शिरः ५
देवाः २

अत्पाश्चर्यं कुरूद्वहेति संबोधनं॥ तथाहि ते यानि प्रयुक्तानि शस्त्रास्त्राणि तत्प्राप्तेः पूर्वमेव॥ तत्सैन्यं संवीहत्वा पश्चात्तानि शस्त्रा
णि चिच्छेद॥ तत्राप्येकैकं शस्त्रमस्त्रं च तुर्भिस्त्रिभिः शरैरित्याश्चर्यं किंच गरुत्मते ति॥ यतः यथाशक्त्या वज्रः प्रतिक्षिप्तः॥ असो गरु

गदाशक्तिः १ गरुडः २ इक्षस्य २ पपात ३ भौमः

यानि यानि प्रयुक्तानि शस्त्रास्त्राणि कुरूद्वह॥ हरिस्तान्यच्छिनत्तीक्ष्णैः शरैरेकैकशस्त्रिभिः॥ उह्यमानः सुपर्णेन पक्षा
भ्यां निघ्नता गजान्॥ गरुत्मता हन्यमानास्तुण्डपक्षनखैर्गजाः॥ पुरमेवाविशन्नार्त्ता नरको युध्ययुध्यत॥ दृष्ट्वा विद्राव्य गरुडः १
तं सैन्यं गरुडेनार्दितं स्वकं॥ तं भौमः प्राहरच्छक्त्या वज्रः प्रतिहतो यतः॥ नाकंपत तया विद्धो मालाहत इव द्विपः॥ शूलं
भौमोऽच्युतं हन्तुमाददे वितथोद्यमः॥ तद्विसर्गात्पूर्वमेव नरकस्य शिरो हरिः॥ अपाहरद्गजस्थस्य चक्रेण क्षुरनेमिना
॥ सकुण्डलं चारुकिरीटभूषणं बभौ पृथिव्यां पतितं समुज्ज्वलत्॥ हाहेति साध्वित्यृषयः सुरेश्वरा माल्यैर्मुकुन्दं विकिरन्त वरुणस्त्र २
तईडिरे॥ ततश्च भूः कृष्णमुपेत्य कुण्डले प्रतप्तजाम्बूनदरत्नभास्वरे॥ सवैजयन्त्या वनमालयार्पयत्प्राचेतसं छत्रमथो
महामणिम्॥ अस्तौषीदथ विश्वेशं देवी देववरार्चितं॥ प्रांजलिः प्रणता राजन्भक्तिप्रवणया धिया॥ ॥ ॥

भैरवभगं गदितेहितेर स्वर्ग १ भूः १

डस्तुनाकंपतं गरुडे वितथोद्यमः सन्प्रतप्तजाम्बूनदे यानि रत्नानि तैर्भास्वरे॥ मेरुर्वै शभ्रतां शिखरं महामणिं चार्पयदिति॥ श्रीकृष्ण

भूदेवी

२८

आविध्यात्रतोऽल्पसमहान्नादद्रुत्पन्नयः॥ तस्मै श्रीह्रस्व सायगदां च मुंचत॥ इंद्रतेजसा वज्रेण प्रतिक्रियया हेतुभूतया॥ अमर्षजुषः पीठं
पीठनामानं। निरगान् निरगमन्। निकृंतानि शीर्षादीनि येषां तान् शतघ्नी शक्तिविशेषं। विचित्रवाजाः पत्राणि येषां तैर्बाणैर्न्निकृत्ता

कुरः।१ शक्तिर्वर उकेलप कुरे२ रूमायुर गरुः।१

गालोल्पर त्रिशूलमुद्यम्य सुदुर्न्निरीक्षणो युगांतसूर्यानलरोचिरुल्बणैः॥ ग्रसंस्त्रिलोकीमिव पंचभिर्मुखैरभ्यद्रवत्तार्क्ष्यसुतं यथोरगः॥
अरू लं३ आविध्य शूलं तरसा गरुत्मते निरस्य वक्त्रैर्व्यनदत्स पंचभिः॥ सरोदसी सर्वदिशोऽम्बरं महानापूरयन्नंडकटाहमावृणोत्॥
रू भः।४ तदाऽऽपतद्वै त्रिशिखं गरुत्मते हरिः शराभ्यामभिनत्त्रिधोजसा॥ मुखेषु तं चापि शरैरताडयत्तस्मै गदां चापि रुषा व्यमुंचत॥ तामा
कुरः पतंतीं गदया गदां मृधे गदाग्रजो निर्बिभिदे सहस्रधा॥ उद्यम्य बाहूननिधावतोऽजितः शिरांसि चक्रेण जहार लीलया॥ व्यसुः पपा
तांभसि हतशीर्षो निकृत्तशृंगोऽद्रिरिवेंद्रतेजसा॥ तस्यात्मजाः सप्त पितुर्वधातुराः प्रतिक्रियामर्षजुषः समुद्यताः॥ ताम्रोंऽतरि
रिक्षः श्रवणो विभावसुर्वसुर्नभस्वानरुणश्च सप्तमः॥ पीठं पुरस्कृत्य चमूपतिं मृधे भौमप्रयुक्ता निरगन्धृतायुधाः॥ प्रायुंज
उ तासाद्य शरानसीन्गदाः शक्त्यृष्टिशूलान्यजिते रुषोल्बणाः॥ तच्छस्त्रकूटं भगवान्स्वमार्गणैरमोघवीर्यस्तिलशश्चकर्त भौमाकुरः३
समर्तं४ ह॥ तान्पीठमुख्याननयद्यमक्षयं निकृत्तशीर्षोरुभुजांघ्रिवर्मणः॥ स्वानीकपानच्युतचक्रसायकैस्तथा निरस्तान्नरको ध
रासुतः॥ निरीक्ष्य दुर्म्मर्षण आस्रवन्मदैर्गजैः पयोधिप्रभवैर्न्निराक्रमत्॥ दृष्ट्वा सभार्यं गरुडोपरिस्थितं सूर्योपरिष्टात्सतडि
द्घनं घनम्॥ हसं स तस्मै व्यसृजच्छतघ्नीं योधाश्च सर्वे युगपत्स्म विव्यधुः॥ तद्भौमसैन्यं भगवान्गदाग्रजो विचित्रवाजैर्न्नि १२२
शितैः शिलीमुखैः॥ निकृत्तबाहूरुशिरोध्रविग्रहं चकार तत्रैव हताश्वकुंजरम्॥ ॥ ॥ श्रीगोपीजनवल्लभाय नमः॥ ॥

बाहुः।१ रत्तिः।२

बाहवः शिरोध्राः कंधरा विग्रहा देहाश्च यस्य तत्॥ तत्रैव तं यदा विव्यधुस्तस्मिन्नेव क्षणे॥ ॥ ॥ ॥ ॥ ॥

श्री० भा० द० श० ५९

ननुगुणविश्लेषत्वस्यादिहेतवः॥तेचप्रधानस्यैवतस्यचपुरुषसंक्षोभकः।तत्रचकालोनिमित्तमितिप्रसिद्धं॥किमत्राहंतत्राह॥त्वंवाइति
तमसोधारणेप्यसंहृतएवंस्थानायपालनाय।जगतःसृष्ट्याद्यर्थंउत्कटंरजआदित्वमेवविभर्षिसृजसीत्यर्थः॥कालप्रधानपु
रुषाश्चत्वद्व्यतिरिक्तानभवंतित्वंतुपरःसर्वव्यतिरिक्तः।अतस्त्वमेवजनयितेत्यर्थः॥कार्यकारणप्रपंचस्यतदव्यतिरेकंतस्यचसर्व
व्यतिरेकमुपपादयति॥अहंभ्रमः॥मात्राणीति॥देवामनइति॥इंद्रियाणीतिचत्रिविधाहंकारकार्याणि॥कर्त्ताअहंकारः॥ए

विभर्षि१ प्रभुः२ अहंकारः१ पालनाय ननुयोपस्मात्३ माया१ पृथिवी जले१

त्वंवैसिसृक्षूरजउत्कटंप्रभोतमोनिरोधायबिभर्ष्यसंवृतः॥स्थानायसत्वंजगतोजगत्पतेकालःप्रधानंपुरुषोभवान्परः॥अहंपयोज्यो
तिरथानिलोनभोमात्राणिदेवामनइंद्रियाणि॥कर्त्तामहानित्यखिलंचराचरंत्वय्यद्वितीयेभगवन्नयंभ्रमः॥तस्यात्मजोयंतवपा
दपंकजंभीतःप्रपन्नार्त्तिहरोपसादितः॥तत्पालयैनंकुरुहस्तपंकजंशिरस्यमुष्याखिलकल्मषापहं॥ ॥श्रीशुकउवाच॥ ॥
इतिभूम्यर्थितोवाग्भिर्भगवान्भक्तिनम्रया॥दत्वाभयंभौमगृहंप्राविशत्सकलर्द्धिमत्॥तत्रराजन्यकन्यानांषट्सहस्राधिकायु
तंभौमाहृतानांविक्रम्यराजभ्योददृशेहरिः॥तंप्रविष्टंस्त्रियोवीक्ष्यनरवर्यंविमोहिताः॥मनसावव्रिरेभीष्टंपतिंदैवोपसादि
तम्॥भूयात्पतिरयंमह्यंधातातदनुमोदतां॥इतिसर्वाःपृथक्कृष्णेभावेनहृदयंदधुः॥ ॥ ॥ ॥ ॥

वंस्त्वाप्रार्थयते।तस्येति।हेप्रपन्नार्त्तिहर।तस्यनरकस्यअयंभगदत्तोनामभीतःअतएवमयातवपादपंकजमुपसादितः॥अभयं
दत्वाशताधिकमित्यपिज्ञातव्यं।यथाहश्रीपराशरः॥कन्यापुरेसःकन्यानांषोडशातुलविक्रमः।शताधिकानिददृशेसहस्राणिमहा
मनाइतिराजन्यइत्युपलक्षणं।सिद्धादिभ्यश्चेति।तथाहि।तेनैवोक्तं।देवसिद्धासुरादीनांनृपाणांचजनार्द्दनःहृत्वाहिसोसुरःकन्यांरुरोध

ऐश्वर्यं ज्ञात्वा भूमिः स्तौति ॥ नमस्त इति ॥ परमात्मन् देवाद्यंतर्यामिन् ॥ येन मंत्रेण कुंत्याः प्रसन्नः पूर्वमासीत्तेन मंत्रेण नमस्यति ॥ नमइ
ति ॥ पंकजं नाभौ यस्य तस्मै ॥ जगत्कारणायेत्यर्थः ॥ अत एव मत्कीर्त्तिमयी ॥ पंकजमाला विद्यते यस्य तस्मै ॥ एवंभूतं ध्यायतां ॥ पंकज
वत् सुप्रसन्ने तापोपशमने नेत्रे यस्य तस्मै । पंकजवत्सुमेखौ पंकजांकितावंघ्री यस्य तस्मै नम इति ॥ किंच भगवते निरतिशयैश्वर्याय
वासुदेवाय सर्वभूताश्रयाय ॥ अत एव विष्णवे व्यापिने ॥ नहि सर्वभूताश्रयत्वं परिछिन्नस्य संभवतीति कुतः सर्वाश्रयत्वं पुरुषाय स
र्वस्मात्कार्यात्पूर्वमेवासते ॥ पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वमिति श्रुतेः ॥ एतदपि कुतः आदिबीजाय ॥ आदेर्जगत

देवाद्यंतर्यामिन् कुमल

॥ ॥ भूमिरुवाच ॥ ॥ नमस्ते देवदेवेश शंखचक्रगदाधर ॥ भक्तेछोपात्तदेहाय परमात्मन्नमोस्तु ते ॥ नमः पंकजनाभाय न
मः पंकजमालिने ॥ नमः पंकजनेत्राय नमस्ते पंकजांघ्रये ॥ ॐ नमो भगवते तुभ्यं वासुदेवाय विष्णवे ॥ पुरुषायादिबीजा
य पूर्णबोधाय ते नमः ॥ अजाय जनयित्रेस्य ब्रह्मणेनंतशक्तये ॥ परावरात्मन् भूतात्मन् परमात्मन्नमोस्तु ते ॥ ॥ ॥

ह्मणे

कारणस्यापि कारणाय ॥ एवमपि न मृदादिवज्जाड्यमित्याह ॥ पूर्णबोधायेति ॥ नन्वेवमपि स्वकारणात्पूर्वं सत्त्वं न स्यात ॥ अत आह ॥
अजायेति स्वयमजाय ॥ अस्य च जनयित्रे उभयत्रापि क्रमेण हेतुद्वयं ब्रह्मणे बृहते ॥ अनंतशक्तये इति च ॥ बृहत्त्वादजत्वं अनन्त
शक्तित्वाज्जनयितृत्वमित्यर्थः ॥ ननु पित्रादयः पुत्रादीनां जनकास्तेषां च तत्पूर्वं तेषां च भूतानि तेषां च स्वकर्म्मद्वारेण जीवाः कि
मत्राहं तत्राह ॥ परावरात्मन्नित्यादि ॥ पित्राद्यात्मत्वात्त्वमेव जनक इत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्री० भा० द० श० ३० अनुरागहाससहितमवलोकं च तत्पूर्वकं नवसंगमं च तदुक्तं जल्पं च ॥ तस्मिन्सलज्जां चेलेजुः ॥ विश्रमणं संवाहनं केशाः प्रसारणं केशप्रसा
धनं ॥ दासीनां शतानि विद्यंते यासां तथाभूता अपि स्वयं विभोर्हरेः संविदधुरिति ॥ ॥ इति दशमे एकोनषष्टितमः ॥ ॥ अथ षष्टितमे हा
स्यः परिहासेन रुक्मिणीं ॥ कोपयित्वा ततः प्रेमकलहे तामसांत्वयत् ॥ १ ॥ रामरामजनानंदमनोदयविडंवनैः ॥ रुक्मिण्याः प्रेमकलह
छद्मनैश्वर्यमीर्यते ॥ २ ॥ स्वतल्पस्थं स्वपर्यंकस्थं ॥ वक्ष्यमाणं रुक्मिण्याः प्रियः श्रीकृष्णो परमं प्रेमसंख्यापयितुं तस्यो क्तमेव तत्त्वमनु

संगमहनं १ हरेः १ रुक्मिणी ४

इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोपि न विदुः पदवीं यदीयां ॥ भेजुर्मुदाविरतमेधितयानुरागहासावलोकनवसंग
मजल्पलज्जाः ॥ प्रत्युद्गमासनवरार्हणपादशौचतांबूलविश्रमणवीजनगंधमाल्यैः ॥ केशप्रसार शयनस्नपनोपहार्यैर्दासी
रुक्म ४ शता अपि विभोर्विदधुः स्म दास्यं ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे एकोनषष्टितमोध्यायः ॥ ॥ श्रीबादरायणिरु
धर्मिधर्विकार सालखडु वाच ॥ ॥ कर्हिचित्सुखमासीनं स्वतल्पस्थं जगद्गुरुं ॥ पतिं पर्यचरद्भैष्मी व्यजनेन सखीजनैः ॥ यस्त्वेतल्लीलया विश्वं सृजत्यत्त्यव
तीश्वरः ॥ स हि जातः स्वसेतूनां गोपीथाय यदुष्वजः ॥ तस्मिन्नंतर्गृहे राजन्मुक्तादामविलंविना ॥ विराजिते वितानेन दीपैर्मणि चंदीया
मयैरपि ॥ मल्लिकादामभिः पुष्पैर्द्विरेफकुलनादिते ॥ जालरंध्रप्रविष्टैश्च गोभिश्चंद्रमसोमलैः ॥ पारिजातवनामोदवायुनोद्यान
शालिना ॥ धूपैरगुरुजै राजन्जालरंध्रविनिर्गतैः ॥ ॥ टीका ॥ स्मारयति ॥ यस्त्विति ॥ आदौ तावत्त्रिभिः श्लोकैर्मंदिरमनुवर्ण

वहुना १ वितानैतन्दैः २ कुरखेः २

यति ॥ तस्मिन्निति ॥ तच्छब्देनातिप्रसिद्धमाह ॥ भ्राजंति मुक्तादामानि येषां विलंबाः संति यस्मिन् तेन वितानेन विराजिते । तृतीयां तानां वि श्री रुस
राजितपदेनान्वयः ॥ सुगंधतया द्विरेफकुलैर्नादिते प्रविशद्भिश्चंद्ररश्मिभिः निर्गच्छद्भिः ॥ चागुरुसंभवैर्धूपैश्चातिमनोहरत्वं दर्शितम् ॥ ३०

प्राहिणोच्च प्रस्थापयामास॥ सुमृष्टाः कमनीयाश्चताः बिरजांबराश्चताः नरयानैः शिविकाभिः॥ अपिच महाकोशानिति॥ सप्रियः सत्यभा
मासहितः गृहोद्यानं निःकूटमुपशोभयतियः॥ सेंद्रान् विबुधान् निर्ज्जित्येतीइन्द्रकृष्णयोः संग्राम उक्तस्तत्र॥ ननु कथं प्रसादितस्वमनोरथे
नकृष्णेन सह इंद्रस्य संग्राम इत्याशंक्याह॥ यथाचइति॥ अमृतमर्थसाधनमितिचकर्म्मद्वयं याचतिधमतोर्द्विगृह्यते विग्रहं करोति। मह

ताः प्राहिणोद्धारवतीं सुमृष्टबिरजांबराः॥ नरयानैर्म्महाकोशान् रथाश्वान् द्रविणं महत्॥ ऐरावतकुलेभांश्च चतुर्द्दन्तान् तरस्विनः॥
पांडुरांश्च चतुःषष्टिं प्रेषयामास केशवः॥ गत्वा सुरेंद्रभवनं दत्वादित्यैच कुंडले॥ पूजितस्त्रिदशेंद्रेण महेंद्राण्या च सप्रियः॥ नोदितो
भार्ययोत्पाट्यपारिजातं गरुत्मति॥ आरोप्य सेंद्रान् विबुधान्निर्ज्जित्योपानयत्पुरं॥ स्थापितः सत्यभामाया गृहोद्यानोपशोभितः॥ अन्व
पारजात युस्तमराः स्वर्गात्तद्गंधासवलंपटाः॥ ययाच आनम्यकिरीटकोटिभिः पादौ स्पृशन्नमृतमर्थसाधनम्॥ सिद्धार्थ एतेनविगृह्यते महा कर्वनाक्रि १२
नहोसुराणां चतमोधिगाद्युतां॥ अथोमुहूर्त्त एकस्मिन्नानागारेषु ताः स्त्रियः॥ यथोपयेमे भगवांस्तावद्रूपधरोव्ययः॥ गृहेषु तासा
मनपाय्यतर्क्यकृन्निरस्तसाम्यातिशयेष्ववस्थितः॥ रेमेरमाभिर्न्निजकामसंप्लुतो यथेतरोगारहमेधिकांश्चरन्॥ ॥ ॥

नपितमः क्रोधः॥ आद्युतांधनिकृतां॥ यथायथावत्॥ अनेनदेवकयादिबंधुजनसमागमोपिप्रतिगृहं यौगपद्येन सूचितः॥ अव्ययः सर्वशक्ति
पिसंपूर्णएव॥ अहोनाग्पनारीणामित्याहत्रिभिः॥ गृहेष्विति॥ अतर्क्याणि कर्म्माणि करोतितथासः॥ निरस्तंसाम्यमतिशयश्चयैरन्येषां
तेषुगृहेषु॥ अनपायी॥ अवस्थितः॥ रमाभिर्लक्ष्म्या अंशभूताभिर्न्निजकामसंप्लुतः॥ आनंदपरिपूर्णः गारहमेधिकान् गृहस्थधर्म्मान्॥ ॥

किंच॥प्रायशःराजन्योजरासंधादिभ्योविभ्यतःसयंशश्वदनुव्रतः॥अस्पष्टवर्त्मनां॥अविज्ञाताचाराणां॥अलोकपथंअस्त्रीपारतंत्र्यंपदवीं
मार्गं॥आस्थिता॥अनुसृताः॥किंचनिःकिंचना इति॥आत्मासमंपरस्परमनुरूपं॥जन्मैश्वर्याभ्यांसहिता॥आकृतिःरूपं॥जातिर्भवःसमाभवः
कालः॥आयतिःनदीर्घासमीक्षाविचारोयस्याःतया॥अथइदानीमपि॥तर्हिकिमित्यानीताहमितिचेत्साशंक्याह॥चैद्येति॥मममा॥

राजभ्योविभ्यतःसुभ्रुसमुद्रंशरणंगतान्॥बलवद्भिःकृतद्वेषान्प्रायस्त्यक्तनृपासनान्॥अस्पष्टवर्त्मनांपुंसामलोकपथमी
युषां॥आस्थिताःपदवींसुभ्रुप्रायःसीदंतियोषितः॥निःकिंचनावयंशश्वन्निःकिंचनजनप्रियाः॥तस्मात्प्रायेणनह्याढ्यामां
भजंतिसुमध्यमे॥ययोरात्मसमंवित्तंजन्मैश्वर्याकृतिर्भवः॥तयोर्विवाहोमैत्रीचनोत्तमाधमयोःक्वचित्॥वैदर्भ्येतदविज्ञाय
त्वयादीर्घसमीक्षया॥वृतावयंगुणैर्हीनाभिक्षुभिःश्लाघितामुधा॥अथात्मनोनुरूपंवैभजस्वक्षत्रियर्षभम्॥येनत्वयाशि
षःसत्याइहामुत्रचलप्स्यसे॥चैद्यशाल्वजरासंधदंतवक्त्रादयोनृपाः॥ममद्विषंतिवामोरुरुक्मीचापितवाग्रजः॥तेषांवी
र्यमदांधानांदृप्तानांस्मयनुत्तये॥आनीतासिमयाभद्रेतेजोपहरतासतां॥उदासीनावयंनूनंनस्त्र्यपत्यार्थकामुकाः॥आ
त्मलब्ध्यास्महेपूर्णागेहयोर्ज्योतिरक्रियाः॥ ॥श्रीबादरायणिरुवाच॥ ॥एतावदुक्त्वाभगवानात्मानंवल्लभामिव॥मन्यमाना
मविश्लेषात्तद्दर्पघ्नउपारमत्॥इतित्रिलोकेशपतेस्तदात्मनःप्रियस्यदेव्यश्रुतपूर्वमप्रियम्॥आश्रुत्यभीताहृदिजातवेप

द्विषंतिस्मयनुत्तयेगर्वापनयनायास्त्री॥त्वमतिदुःसहमोदासीन्यमकामत्वंचाह॥उदासीनइति॥गेहयोर्देहगेहयोरुदासीनाअतए
वज्योतिरक्रियाज्योतिःप्रदीपादितद्वत्साक्षिमात्रतयाक्रियारहिताआस्महेवार्त्तमहइति॥अविश्लेषाद्धेतोःआत्मानमिवेत्यर्थःशंकाः॥ ३१

पयसः क्षीरस्य फेनइव मृदुनि पर्यंकस्थे कशिपूत्तमे हंसतूलिकायां उपतस्थे असेवत॥ तदेवाह तेन यतिः॥ वालव्यजनमिति॥ उपाच्युतमच्यु
तस्य समीपे सा मणिनूपुरास्पारं रेजे॥ क्वणयती मणिमयौ नूपुरौ कूजयंती तथा अंगुलीयवलयव्यजनानि॥ अग्रहस्ते हस्ताग्रे यस्याः सा ब
स्त्रान्तेन गूढौ स्तनगतौ कुचौ तयोः कुंकुमं तेन शोणो हारस्य भासः प्रभा यस्याः सा॥ तथा नितम्बे धृतया परार्ध्या अमूल्या कांच्या तया च रेजे॥ तां श्रि
यं प्रीतः सन् स्मयमानो हरिराबभाषे॥ कथंभूतां याः लीलया धृतनरतनो तस्य अनुरूपरूपा अनुरूपं रूपं यस्याः सा॥ यथोक्तं श्रीपराशरेण

पयःफेननिभे शुभ्रे पर्यंके कशिपूत्तमे॥ उपतस्थे सुखासीनं जगतामीश्वरं पतिम्॥ वालव्यजनमादाय रत्नदंडं सखीकरात्॥ तेन वी
मतिशयेनाह॥यस्येतिहेभुवनानांमंगलरूपदिविपातालेभूमौचप्रथितंयस्ययशोविश्वंपुनाति।कथंप्रथितं॥दिग्वितानं
दिग्भवानांवितानवदलंकरणं॥तथाचरणांबुजप्रथितंपुनाति।कथंतत्प्रथितंदिविमंदाकिनीति अधश्चभोगवतीति इह

दर्शनस्पर्शनैः वेनागमिष्यंतिते दिदृक्षवः विश्वंपुनातीर यादवेषु श्रवात्
राजसूये

तस्मिन्देवक्रतुवरेभवंतंवैसुरादयः।दिदृक्षवःसमेष्यंतिराजानश्चयशस्विनः॥४३॥श्रवणात्कीर्त्तनाद्ध्यानात्पूयंतेंतेव
सायिनः॥तवब्रह्ममयस्येशकिमुतेक्षाभिमर्शिनः॥४४॥यस्यामलंदिवियशःप्रथितंरसायांभूमौचतेभुवनमंगलदिग्वि
तानं॥मंदाकिनीतिदिविभोगवतीतिचाधोगंगेतिचेहचरणांबुपुनातिविश्वं॥४५॥तत्रतेष्वात्मपक्षेष्वगृणत्सुविजिगीषया
।वाचःपेशैःस्मयन्भृत्यमुद्धवंप्राहकेशवः॥४६॥त्वंहिनःपरमंचक्षुःसुहृन्मंत्रार्थतत्त्ववित्॥तथात्रब्रूह्यनुष्ठेयंश्रद्दध्मःक
रवामतत्॥४७॥इत्युपामंत्रितोभर्त्रासर्वज्ञेनापिमुग्धवत्॥निदेशंशिरसाधायउद्धवःप्रत्यभाषत॥ ॥इतिश्रीभा
गवतेमहापुराणेदशमस्कंधेभगवदुद्धवसंवादेराजमंत्रोनामसप्ततितमोऽध्यायः॥७०॥ ॥ ॥ ॥

कृष्णेन श्रीकृष्णेर

दिग्भवालंकरणं
चातुर्यैः
जरासंधं

चभूमौगंगेतितस्यतवागमनात्सर्वंमंगलंपवित्रंचभविष्यतीतिभावः॥तत्रैवंनारदेनोक्तेषुतत्रवर्त्तमानेषुआत्मीयपक्षेषु
यादवेषुजरासंधस्यजिगीषयाअगृणत्सुअनंगीकुर्वत्सुवाचःपेशैःपेशलवाग्भिरित्यर्थः॥चक्षुरिवेत्युक्तः॥मंत्राधीनो श्रीकृष्ण
मंत्रसाध्यानांतत्त्ववित् परिपाकवेत्ता॥४८॥ ॥इतिदशमेसप्ततितमोऽध्यायः॥ ॥ ॥ ॥ ॥ ५८

फलो

एवमत्र विदुषैव सर्वज्ञेन जरासंधवधार्थमेव पांडवचिकीर्षितं पृष्टो नारदो मायेयमिति ज्ञात्वाह ॥ दृष्टा इति त्रिभिः ॥ विश्वसृज
श्च ब्रह्मणोऽपि मायिनो मोहकस्य ते । स्वशक्तिभिर्विद्यादिभिर्भूतेष्वंतर्यामितया चरतो वर्त्तमानस्य । यद्यहं भूतेषु वर्त्तितर्हि भूतानि
मां किं न पश्यंति । तत्राह । वह्नेरिव छन्नरुच इति स्वशक्तिभिरेव छन्ना रुक् प्रकाशो यस्य तस्य । अतस्तवेदं प्रश्नादि न मेऽद्भुतं ॥ इ
दं जगत्कथंभूतं ॥ असदेव यत्तव मायया विद्यमानात्मतयावभासते तज्जगत्सृजतः किंतु केवलं तेतुभ्यं नमनमेव शक्यमित्या

ते त्वयाद्दि २ अर्चिं त्वाय ३ ... विद्यादिभिः ...

॥ नारद उवाच ॥ दृष्टा मया ते बहुशो दुरत्यया माया विभो विश्वसृजश्च मायिनः ॥ भूतेषु भूमंश्चरतः स्वशक्तिभिर्वह्नेरिव छ
न्नरुचो न मेऽद्भुतं ॥ ३८ ॥ तवेहितं कोऽर्हति साधु वेदितुं स्वमाययेदं सृजतो नियच्छतः ॥ यद्विद्यमानात्मतयावभासते तस्मै
नमस्ते स्वविलक्षणात्मने ॥ ३९ ॥ जीवस्य यः संसरतो विमोक्षणं न जानतोऽनर्थवहाच्छरीरतः ॥ लीलावतारैः स्वयशः प्रदी
पकं प्राज्वालयत्त्वां तमहं प्रपद्ये ॥ ४० ॥ अथाप्याश्रावये ब्रह्म नरलोकविडंबनं ॥ राज्ञः पैतृष्वस्रेयस्य भक्तस्य च चिकीर्षि
तं ॥ ४१ ॥ यक्ष्यति त्वां मखेन्द्रेण राजसूयेन पांडवः ॥ पारमेष्ठ्यकामो नृपतिस्तद्भवाननुमोदतां ॥ ४२ ॥ ॥ ॥

युधिष्ठिरः वृणितं

हा तस्मै नम इति कुतः । स्वेन रूपेण सर्वतो विलक्षणात्मने अचिंत्यायेत्यर्थः ॥ नन्वेवंभूतस्य किं मायाचेष्टितैरित्यत आह ॥ जी
वस्येति ॥ अविद्यातमसा हतत्वेन अनर्थप्रापकाच्छरीरतः संसरतः तेनैव तमसा तस्माच्छरीराद्विमोक्षोपायमजानतः ॥ प्रा
ज्वालयत् ॥ संदीपितवान् ॥ तं त्वा त्वां यशःश्रवणादिभिर्जीवस्य मोक्षार्थमित्यर्थः ॥ आश्रावये श्रावयिष्यामि ॥ नरलोकं विडंब
नं ब्रह्मन्निति पाठे हे ब्रह्मन् परमात्मन् नरलोकानुकारिणं त्वां श्रावयिष्यामीति ॥ ॥ ॥ ॥ ॥

प्रकाशः संदीपितवान्

तवमायया कथाद् युधिष्ठिरस्य

...दे(व्यः) पत्न्यः पित्रोः ... विषद कर्म गृहेषु स्थितास्सत्यः तेत्वत्तः स्वपाकृत्वा वस्वशत्रुवधं पतीनां विमो
क्षणं च गुत्रलोललनो गायंति ॥ ... सादिना ... विदिष्वागा दिषु ... जनशयना दौनिकर्माणि ये कुर्वते गृहेषु ॥ नवत्सा मर्थ्य ज्ञानवत्स द्योतना यदे
नीपदम ॥ किं च तास्पत्न्यः । त मेवलब्धोरक्षकः शत्रुहंता वा यासि त जगवन्दिः ॥ स्त्रीणां ... प्रीति सत्य ... तथैव गायंति । मुनयश्च तथैव गायंति । वयं च तथैव गायाम इत्येव इति ॥ २ ॥

ननु चाकिंचित्कुर्वतो मम संनिधानात्किं स्यादत आह निमित्तमिति । अयमर्थः । यथा तवारूपिणः कालात्मनो विश्वसर्गनिमित्तं
केवलं हिरण्यगर्भस्तथा शर्वश्च तत्तिरोधे । तथा सान्निधिमात्रेण त्वमेव हंता भीमो निमित्तमात्रमिति ॥ अतोनेनोपायेन त्वया
शीघ्रं हंतव्य इत्याशयेनाह । गायंतीति जरासंधघृतानां राज्ञां देव्यः पत्न्यः । ते विशदं कर्म स्वगृहेषु बालकलालनादौ गायंति
किं तत्कर्म । स्वशत्रोर्जरासंधस्य वधं आत्मनः पतीनां विमोक्षणं च । वत्समारोदीः श्रीकृष्ण एवं करिष्यतीति ॥ अत्र दृष्टांताः ।
गोप्यश्चेसादृश्यः । यथा गोप्यः शंखचूडवधं स्वमोक्षणं च गायंति तेते । एवनीरां तरगतं च कुंजरपतेर्जनकात्मजायाश्च रा
घोतनशीला देव्यः ॥ पतिव्रतानां पतिविमोक्षणयतपोविधानेन देवीतुल्यत्वाद्देवीत्वम् ॥ तथा च तासां तव ज्ञानं भवतु वेति जावः ॥ अत एव पत्नीपदं विहाय देवीपदोपादानम् ॥ २ ॥

निमित्तं परमीशस्य विश्वसर्गनिरोधयोः । हिरण्यगर्भः शर्वश्च कालस्यारूपिणस्तव ॥ ९ ॥ गायंति ते विशदकर्म
गृहेषु देव्यो राज्ञां स्वशत्रुवधमात्मविमोक्षणं च । गोप्यश्च कुंजरपतेर्जनकात्मजायाः पित्रोश्च लब्धशरणा मुन
यो वयं च ॥ १० ॥ जरासंधवधः कृष्ण भूर्यर्थायोपकल्पते ॥ प्रायः पाकविपाकेन तव चाभिमतः क्रतुः ॥ ११ ॥
इत्युद्धववचो राजन्सर्वतोभद्रमच्युतम् ॥ देवर्षिर्यदुवृद्धाश्च कृष्णश्च प्रत्यपूजयन् ॥ १२ ॥ ॥

नारदः १ राज्ञीनां २ ॥ कुंजरपतेर्दिंग्राहमोक्षणरूपव्याख्याने । श्रीकृष्णकृते नहननाज्जावात ॥ शंखचूडवधस्तु ... तत्रमेवधनन्तरम् १
वणात । पित्रोश्च कंसगृहान्मोक्षणं । अत एवं भूतानां नो मा कृपया कृत्वा तथैव कर्त्तव्यमिति भावः ॥ किंच जरासंधवध
इति । भूर्यर्थायेति । ततः ॥ शिशुपालवधादयोपि सुखसाध्या भविष्यंतीति भावः । एतच्च सर्वं भविष्यत्येवेति संभावयन्ना
ह ॥ प्राय इति पच्यत इति पाकः कर्म तस्य विपाकः फलं तेन राज्ञां पुण्यविपाकेन जरासंधादीनां पापविपाकेन ॥ पाठांतरे
जरासंधस्य पापविपाकेनेति । तेनायं क्रतुस्तवाभिमतः । तत्र गतेत्वयि सर्वं भविष्यतीत्यर्थः ॥ अच्युतं उपपत्त्या हृद्यं य
दुवृद्धं इति वदता अनिरुद्धादयस्तथा नापूजयन्निति सूचितं ॥ ॥ ॥ ॥

॥ जरासंधशिशुपालादिवधः ॥ राज्ञां विमोचनं १ ॥

वद्ने

श्री० भा० द० उ० ७१

श्रीकृष्ण वर्ण्य नावात समपमतिकर्त्तव्यतानि ॥ ननु राज्ञा मम श स्तापा जानंतीत्या शक्याह ॥ देव्य इति

श्रीकृष्ण पि धतेना मौरक्षत वरूपमिति वकृतम् ॥ ३ ॥

देवकीवसुदेवयो ॥ ११ ॥

॥ लब्धशरणा इत्यु चतुर्णां विशेषणं लब्धविधाकाद र्थः ॥ ... त्यपि केचित् ॥ २ ॥ गृहेषु ॥

जरासंधहननं ॥ जरासंधधंर मेध

तमेवल ब्धोरक्षको वासीः २

जरासंधहननं राज्ञां तिमोक्षणं च श्रीकृष्णस्य सुखसाध्यकर्म १

नेकृतएव ॥ ३ ॥

श्रीकृष्ण वर्ण्य

६२

त्रयेथेकमपततितमेत इन्द्रप्रस्थं तु मंत्रतः॥ इंद्रप्रस्थं गते कृष्णे पार्थानां परमोत्सवः॥ राजसूयं कृत्वा भीमदुर्योधनादिषु कलिमुत्पा
द्य तेन द्वारा भूभारमहरत्प्रभुः॥ १॥ देवर्षेर्मतं राजसूयगमनं सभ्यानां मतं राजरक्षा कृष्णस्य उभयं यद्यतः यागं करिष्यतः पैतृष्व
स्रेयस्य पितृष्वसुः पुत्रस्य साचिव्यं साहाय्यं तत्र च कार्यं तथा शरणार्थिनां राज्ञां रक्षा च कार्या॥ तत्र प्रथमं राजसूयार्थं गंतव्यं त
तो राजरक्षा कर्तव्येत्याह॥ यष्टव्यमित्याद्यष्टभिः। अतः दिग्विजयहेतोः। उभयार्थः। शरणागतरक्षार्थश्च। अस्तु सुकतया स
राज २ * पूर्वैर्गतयश्च ऋषिभिरिंद्रप्रस्थमितः प्रभो॥ तत्रैव तदनुज्ञातस्तास्यधि जहि मागधं ॥२॥

॥श्रीशुक उवाच॥ ॥इत्युदीरितमाकर्ण्य देवर्षेरुद्धवोऽब्रवीत्॥ सभ्यानां मतमाज्ञाय कृष्णस्य च महामतिः॥१॥ ॥
मंत्रित्वं २ ॥श्रीउद्धव उवाच॥ ॥यदुक्तमृषिणा देव साचिव्यं यक्ष्यतस्त्वया॥ कार्यं पैतृष्वस्रेयस्य रक्षा च शरणैषिणां॥ २ ॥
॥यष्टव्यं राजसूयेन दिक्चक्रजयिना विभो॥ अतो जरासुतजय उभयार्थो मतो मम॥ ३॥ अस्माकं च महानर्थो ह्येतेनैव जरासंधात् ४
॥भविष्यति॥ यशश्च तव गोविंद राज्ञो बद्धान्विमुंचतः॥ ४॥ स वै दुर्विषहो राजा नागायुतसमो बले॥ बलिनामपि ॥
समबलो भीमः २ ॥चान्येषां भीमं समबलं विना॥ ५॥ द्वैरथे स तु जेतव्यो मा शताक्षौहिणीयुतः॥ ब्रह्मण्योऽभ्यर्थितो विप्रैर्न प्रत्याख्याति॥
॥कर्हिचित्॥ ६॥ ब्रह्मवेषधरो गत्वा तं भिक्षेत वृकोदरः॥ हनिष्यति न संदेहो द्वैरथे तव संनिधौ॥ ७॥ ॥ ॥

द्वंद्वयुद्धे २ जरासंधः ३ जरासंधस्य २ जरासंधः न निराकरोति २

ह्य एव जरासंधं हन्तुमिच्छतो यादवान् ॥लस्याह॥ स वा इति॥ अन्येषां तेनो बलिनामपि यद्यपि समबल एव भीमस्तथापि तं वि
ना भीमादेव तस्य मृत्युर्विहित इति भावः॥ ननु स्वबलसाम्येऽपि सेनाबलं तस्याधिकमिति चेद्दत आह॥ द्वैरथ इति॥ द्वंद्वयुद्धे
शतेनाक्षौहिणीभिर्युतो मा। न जेतव्य इत्यर्थः॥ नन्वसौ स्वसैन्यमेव युद्धाय नियुंजीत कुतस्तेन द्वैरथमिति तत्राह॥ ब्र
ह्मण्य इति॥ न प्रत्याख्याति न निराकरोति॥ भिक्षेत द्वंद्वयुद्धं याचनां॥ तथापि समबलत्वात्साम्यमेव स्यादत आह॥ तव सांनिधाविति॥

जरासंधः २

मुनिर्नारदो विहायसा ययाविति शेषः ॥ माभैष्टेति बहुत्वं गजाभिप्रायेण प्रस्थेन्त्तन प्रस्थेन्त्तंत । पलयस्मान्मुमुक्षवः ॥ आनर्त्तादि
योमार्गस्य देशाः । तीर्त्वा अतिक्रम्य । विनशनं कुरुक्षेत्रं अतीयाय अतिक्रम्य ययौ ॥ शक्रप्रस्थं इंद्रप्रस्थं । प्राणैर्इंद्रियाणि प्रा

नारदः । प्रीतः । हरिं । गतः । कृष्णनिश्चयं । गतः । नारदः ।

अथो मुनिर्यदुपतिना सभाजितः प्रणम्य तं हृदि विदधद्विहायसा निशम्य तद्व्यवसितमाहृतार्हणो मुकुंदसंदर्शननिर्वृतेंद्रियः ॥ १८ ॥
राजदूतमुवाचेदं भगवान्प्रीणयन्गिरा माभैष्ट दूत भद्रं वो घातयिष्यामि मागधं ॥ १९ ॥ इत्युक्तः प्रस्थितो दूतो यथावदवदन्नृपान्ते ९२
पि संदर्शनं शौरेः प्रत्यैक्षन्यन्मुमुक्षवः ॥ २० ॥ आनर्त्तसौवीरमरूंस्तीर्त्वा विनशनं हरिः । गिरीन्नदीरतीयाय पुरग्रामव्रजाकरान् ॥ नृपाः २
२१ ॥ ततो दृषद्वतीं तीर्त्वा मुकुंदोथ सरस्वतीं ॥ पंचालानथ मत्स्यांश्च शक्रप्रस्थमथागमत् ॥ २२ ॥ तमुपागतमाकर्ण्य प्रीतो दुर्दर्श अतिक्रम्य
नं नृणां ॥ अजातशत्रुर्निरगात्सोपाध्यायः सुहृद्वृतः ॥ २३ ॥ गीतवादित्रघोषेण ब्रह्मघोषेण भूयसा ॥ अभ्ययात्स हृषीकेशं प्रा इंद्रियाणि ५
णाः प्राणमिवादृतः ॥ २४ ॥ दृष्ट्वा विक्लिन्नहृदयः कृष्णं स्नेहेन पांडवः ॥ चिराद्दृष्टं प्रियतमं सस्वजेथ पुनः पुनः ॥ २५ ॥ दोर्भ्यां परिष्व परिरेभे ६
ज्य रमामलालयं मुकुंदगात्रं नृपतिर्हताशुभः ॥ लेभे परां निर्वृतिमश्रुलोचनो हृष्यत्तनुर्विस्मृतलोकविभ्रमः ॥ २६ ॥ तं मातुले अवतारः ३
यं परिरभ्य निर्वृतो भीमः स्मयन्प्रेमजलाकुलेंद्रियः ॥ यमौ किरीटी च सुहृत्तमं मुदा प्रवृद्धबाष्पाः परिरेभिरेच्युतं ॥ २७ ॥ अर्जु
नेन परिष्वक्तो यमाभ्यामभिवंदितः ॥ ब्राह्मणेभ्यो नमस्कृत्य वृद्धेभ्यश्च यथार्हतः ॥ २८ ॥ मानिनो मानयामास कुरुसृंजयकैके
यान् ॥ सूतमागधगंधर्वा वंदिनश्चोपमंत्रिणः ॥ २९ ॥ ॥ ॥ ॥

णां मुख्यं प्राणमिव ॥ सस्वजे परिरेभे रमाया अमलं निर्दोषमालयं । विस्मृतो लोकविभ्रमो लोकव्यवहारो येन सः ॥ अर्जुनेन श्री कृ०
समंतात्परिष्वक्त एव केवलं । पादौ नमस्कुर्वन्नर्जुनः कृष्णेन भुजाभ्यां धृत इति भावः ॥ यमाभ्यां त्वभिवादितश्चेति ॥ २९ ॥ ॥ ६०

श्री० भा० द० उ०
६०
कृ०प्रस्थ
युधिष्ठिरः ५

अनुज्ञाप्य अनुज्ञां प्रार्थयित्वा।।गुरून् वसुदेवादीन्।अवरोधान् दारान् निर्गम्य प्रयाणं कारयित्वा।।भटाः पदातयः।सादिनः अश्वा
रोहाः रथादिनायकैः करालया तीव्रया आत्मसेनया परिवृतो निराक्रमत निरगात्।।कुतः सकाशात्।।मृदंगादिभिर्वाद्यैः प्रघोषेण
घोषिता याः ककुभः।।नृवाजीति।।नरयानैः अश्वैः कांचनशिविकाभिश्च युतं पतिमनुप्रययुः।सुव्रताः पतिव्रताः।वराण्येवं वरादीनि यासां
ताः।नरोष्ट्रादिभिर्यानैः।।अश्वतरी गर्दभ्यामश्वाज्जाता।।अनः शकटं।करेणुर्गजी।।परिजनयोषितो वारयोषितश्च कटाः कुटयः

अश्वारोह३ तीव्रया३१ उग्रसेनं२ सारथी१ प्रार्थयित्वा वसुदेवादीन्१ दारान्२

प्रती अथादिशत्प्रयाणाय भगवान्देवकीसुतः।।भृत्यान्दारुकजैत्रादीन् अनुज्ञाप्य गुरून्विभुः।।१२।।निर्गमय्यावरोधान्स्वा गज
न्ससुतान्सपरिच्छदान्।।संकर्षणमनुज्ञाप्य यदुराजं च शत्रुहन्।।१३।।सूतोपनीतं स्वरथमारुहद्गरुडध्वजः।।ततो रथद्वि
नरयान४ पभटसादिनायकैः करालया परिवृत आत्मसेनया।।१४।।मृदंगभेर्यानकशंखगोमुखैः प्रघोषघोषितककुभो निरक्रमत्।।
नृवाजिकांचनशिबिकाभिरच्युतं सहात्मजाः पतिमनुसुव्रता ययुः।।१५।।वरांबराभरणविलेपनस्रजः सुसंवृता नृभिरसि ह०ग्०ह३
सेना चर्मपाणिभिः।।नरोष्ट्रगोमहिषखराश्वतर्यनः करेणुभिः परिजनवारयोषितः।।स्वलंकृताः कटकुटिकंबलांबराद्युपस्क बल२
रा ययुरधियुज्य सर्वतः।।१७।।बलं बृहद्ध्वजपटछत्रचामरैर्वरायुधाभरणकिरीटवर्मभिः।।दिवांशुभिस्तुमुलरवं बभौ र
वेर्यथार्णवः क्षुभिततिमिंगिलोर्मिभिः।।१८।। शकट ।। ।।श्रीगोपीजनवल्लभाय नमः।।।।

मत्स्य१ रविकिरणै

उशीदितृण निर्मितगृहाः कंबलांबरादयश्चोपस्कराः कुड्यादिरूपा यासां ताः।अधियुज्य बलीवर्दादिषु तानुपस्करान् दृढं सं
नह्य।।रवेरंशुभिश्च तद्बलं दिवा बभौ कथंभूतं।।तुमुलरवं आकुलस्वनं क्षुभितास्तिमिंगिला ऊर्म्मिभिः।।१८।। ।। ।। ।।

श्री० भा० द० उ० ६१ 61

अभ्युपेतः अभिगमनेनेन सत्कृतः। मस्कृष्णा द्रौपदी सहिता॥ कृत्स्नं प्रकारविशेषं। प्रमोदेनोपहृतोभिभूतः॥ गुरुस्त्रीणां च कृष्णया द्रौ
पद्या भगिन्या सुभद्रया॥ आनर्च्छ अर्च्चितवती॥ अन्याभ्यः कृष्णपत्न्योऽभ्यागताः। ता अपि प्रत्यहं नवं यथा भवति तथा सुखं निवास
यामास॥ कथं भूतस्य प्रेम्णा नित्यं फाल्गुनेन संयुतः अत एव तस्य सहायेन सतापेन खांडवेन वह्निं तर्प्पयित्वा तत्र च मयं मोचयि

श्रीपद्या ३ सुभद्रया ३ कृत्स्ना ३

अन्तःपुरजनैः प्रीत्या मुकुंदः फुल्ललोचनैः॥ ससंभ्रमैरभ्युपेतः प्राविशद्राजमंदिरं॥ पृथा विलोक्य भ्रात्रेयं कृष्णं त्रिभुवनेश्वरं॥ श्वरः ३
प्रीतात्मोत्थाय पर्यंके सस्नुषा परिषस्वजे॥ गोविंदं गृहमानीय देवदेवेशमादृतः॥ पूजायां नाविदत्कृत्स्नं प्रमोदोपहतो नृपः॥ पितृस्व
सुर्गुरुस्त्रीणां कृष्णश्चक्रेभिवादनं॥ स्वयं च कृष्णया राजन् भगिन्या चाभिवंदितः॥ श्वश्र्वा संचोदिता कृष्णा कृष्णपत्नीश्च सर्वशः॥
आनर्च्च रुक्मिणीं सत्यां भद्रां जांबवतीं तथा॥ कालिंदीं मित्रविंदां च सैव्यां नाग्निजितीं सतीं॥ अन्याश्चाभ्यागता यास्तु वासः
स्रग्मंडनादिभिः॥ सुखं निवासयामास धर्मराजो जनार्द्दनं॥ ससैन्यं सानुगामात्यं सभार्यं च नवं नवं॥ तर्प्पयित्वा खांडवेन वह्निं
फाल्गुणसंयुतः॥ मोचयित्वा मयं येन राज्ञे दिव्या सभा कृता॥ उवास कतिचिन्मासान् राज्ञः प्रियचिकीर्षया॥ विहरन् रथमारु
ह्य फाल्गुणेन भटैर्वृतः॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे इंद्रप्रस्थगमने एकसप्ततितमोऽध्यायः॥ ॥७१॥

कृतेन १ कृत्स्नाः १

त्वा। तं मयं च प्रयाज्ञ युधिष्ठिराय दिव्या सभा कृतीतं श्रीजनार्द्दनं॥ अनेन राज्ञः कृष्णोपकारानुस्मरणं। दिव्यत्वात्। सभायाः यथा श्रीकृष्ण
मनोरथं सर्वावकाशसंपादनं च दर्शितं॥ ॥ ॥ इति दशमे एकसप्ततितमः॥ ॥ ॥ ॥ ॥ ६१

चित्रध्वजाभिर्विराजमानं। प्रतिसद्म उद्दीप्तैः बलिः पुष्पादिभक्तैः युक्तैः॥ तेभ्यो गवाक्षेभ्यो निर्गतैः धूपैः रुचिरं। विलसंत्यः पता
कायस्मिन् तत्॥ मूर्द्धन्याः मूर्द्धिभवाः हेमकलशा येषां तैः। रजतमयानि रूप्यमयानि स्थूलानि शृंगाणि कलशा। धस्तनभूमिका

१२२

मृदंगशंखपटहवीणावेणुप्रणवगोमुखैः॥ ब्राह्मणाश्चारविंदाक्षं तं तुष्टुवुर्नन्नृतुर्जगुः॥ एवं सुहृद्भिः पर्यस्तः पुण्यश्लोकशि
१२३ खामणिः॥ संस्तूयमानो भगवान् विवेशालंकृतं पुरं॥ संसिक्तवर्त्म करिणां मदगंधतोयैः चित्रध्वजैः कनकतोरणपू
र्णकुंभैः॥ मृष्टात्मभिर्नववदुकूलविभूषणस्रग्गंधैर्नृभिर्युवतिभिश्च विराजमानं॥ उद्दीप्तदीपबलिभिः प्रतिसद्मजालनिर्यात
१२४ धूपरुचिरं विलसत्पताकं॥ मूर्द्धन्यहेमकलशैः रजतोरुशृंगैर्जुष्टं ददर्श भवनैः कुरुराजधाम॥ प्राप्तं निशम्य नरलोचनपा १२०
नपात्रमौत्सुक्यविश्लथितकेशदुकूलबंधाः॥ सद्यो विसृज्य गृहकर्म पतींश्च तल्पे द्रष्टुं ययुर्युवतयः स्म नरेंद्रमार्गे॥ तस्मि
न् सुसंकुलइभाश्वरथद्विपद्भिः कृष्णं सभार्यमुपलभ्य गृहाधिरूढाः॥ नार्यो विकीर्य कुसुमैर्मनसोपगुह्य सुस्वागतं वि
दधुरुत्स्मयवीक्षितेन॥ ऊचुः स्त्रियः पथि निरीक्ष्य मुकुंदपत्नीस्तारा यथोडुपसहाः किमकार्यमूभिः॥ यच्चक्षुषां पुरुषमौ १२५
लिरुदारहासलीलावलोककलयोत्सवमातनोति॥ तत्र तत्रोपसंगम्य पौरा मंगलपाणयः॥ चक्रुः सपर्यां कृष्णाय श्रेणीमुख्या

चं१२

येषां तैर्भवनैर्जुष्टं कुरुराजस्य धाम पुरं ददर्श [illegible] नराणां लोचनानि तेषां पानस्य स्वादस्य वीक्ष्यमाणस्य पात्रं विषयं किंपुन
र्त्तीणामित्यर्थः॥ सुष्टुस्वागतं तत्पुष्पादिकैः प्रियं उत्स्मयवीक्षितेनैव विदधुः॥ उडुपसहाः चंद्रसहचरा इत्यर्थः॥ अमूभिः
किं पुण्यमकारि॥ श्रेण्यः एव शिल्पोपजीविनां संघाते मुख्याश्च॥ ॥ ॥ ॥ ॥ ॥

श्री
भा० द०
उ०
६२

ननु रागादिरहिते मयि कथमिदं वैषम्यं स्यात्तत्राह नेति॥ स्वः परइति भेदमतिस्तव नस्यादेव। कुतः ब्रह्मणो निरुपाधेः किंच॥ सर्वस्यात्मनः
अतः समदृशः किंच॥ स्वसुखानुभूतेः॥ अतो रागाद्यभावादिति भावः॥ तथापि सेवमानानामेव त्वत्प्रसादो नान्येषां तच्चापि सेवा
नुरूपमुदयः फलं न त्वत्र विपर्ययोऽन्यथाभावः॥ यथा कल्पद्रुमस्य रागादिरहितस्यापि सेवकेष्वेव फलजनकत्वं नान्येषु॥ सत्सम
द्भक्तानामेव वैकल्पादिनान्येषामिसनुमोदमान आह॥ सम्यगिति। शत्रुकर्शनेति संबोधयन्सर्वराजविजयशक्तिं संस्मारयति॥ अ

विभूते २ राजसूयः ३ तव २ फले १

नं ब्रह्मणः त्वपरभेदमतिस्तव स्यात्सर्वात्मनः समदृशः स्वसुखानुभूतेः॥ संसेवतां सुरतरोरिव ते प्रसादः सेवानुरूपमुदयो प्राप्स्यति २
न विपर्ययोऽत्र॥ ॥श्रीभगवानुवाच॥ ॥सम्यग्व्यवसितं राजन्भवता शत्रुकर्शन॥ कल्याणी येन कीर्तिर्लोकाननुभविष्य
ति॥ ऋषीणां पितृदेवानां सुहृदामपि नः प्रभो॥ सर्वेषामपि भूतानामीप्सितः क्रतुराड्यं॥ विजित्य नृपतीन्सर्वान्कृत्वा च
जगतीं वशे॥ संभृत्य सर्वसंभारानाहरस्व महाक्रतुं॥ एते ते भ्रातरो राजन्लोकपालांशसंभवाः॥ जितोऽस्म्यात्मवता तेऽहं
दुर्जयो योऽकृतात्मभिः॥ न कश्चिन्मत्परं लोके तेजसा यशसा श्रिया॥ विभूतिभिर्वाभिभवेद्देवोऽपि किमु पार्थिवः॥ तथा॥

मह्यं १ सफल २ श्रेष्ठेन २

सर्वपृथ्वीं
अहं वशीकृतस्त्वमने
...ः १

नुभविष्यति द्यां तिसर्वतो व्याप्ता भविष्यंतीत्यर्थः॥ किमत्र मयान्येन वा संपादनीयं तव सुकर एव राजसूय इत्याह विजित्येति॥ जग
तीं सर्वां पृथ्वीं संभारान् यज्ञोपस्करान् संभृत्य संपाद्य आहरस्व आहर अनुतिष्ठेत्यर्थः॥ ननु नृपतिविजयादिकं मम शक्यं स्याद
तत्राह। एतदृ ति॥ किंच आत्मवता जितेन्द्रियेण तेत्वया अहं च जितोऽस्मि वशीकृतोऽस्मि॥ अकृतात्मभिः अजितेन्द्रियैः॥ श्रीकृष्ण
आस्तां तावदेवं भूतस्य तव परैरभिभवशंका अपि किंचन मम परं कोऽपि नाभिभवितुं प्रभवतीत्याह॥ न कश्चिदिति॥ तेजसा प्र ६२

तत्कृतेः १

ततोद्भिस्सततितमेराज्ञाकार्येनिवेदिते॥दुर्जयंमागधंवुध्वाभीमेनाघातयद्धरिः॥ ॥ आस्थितः आसनमितिशेषः॥शृण्वता
मेवैवेप्रसन्नः हृष्टःकरोति।नतदस्यःकश्चिदपिकर्त्तुंसमर्थइतिनिश्चित्यसर्व्वानेवतानर्न्नाद्दत्यइदमुवाचेत्यर्थः॥आभाष्य
मोमोहृस्मभक्तवत्सलेत्सेवंसंवोध्यविभूतीः॥ ॐशान्तएवचक्रवर्त्तिनांमनोरथःकथंत्वयाक्रियतइतिचेत्।अतआह॥त्वत
पादुकेति॥परियेचरंतीतियच्छब्दस्यवधानमाधर्ययेपरिचरंतिदेहेनध्यायंति॥मनसाअभद्रस्यनशनेनाशकेगृणंतिवाचाते

तत्त्वमेवमर्वकंतुतिकः॥नान्यः॥इत्युक्तोसर्वजिनादृत्यर२ श्रीरंतरं३

॥श्रीशुकउवाच॥ ॥एकदातुसभामध्येआस्थितोमुनिभिर्वृतः॥ब्राह्मणैःक्षत्रियैर्वैश्यैर्भ्रातृभिश्चयुधिष्ठिरः॥
आचार्यैःकुलवृद्धैश्चज्ञातिसंबंधिबांधवैः॥शृण्वतामेवचैतेषांआभाष्येदमुवाचह॥ ॥युधिष्ठिरउवाच॥ ॥
क्रतुराजेनगोविंदराजसूयेनपावनीः॥यक्ष्येविभूतीर्भवतस्तत्संपादयनःप्रभो॥त्वत्पादुकेअविरतंपरियेचरंति
ध्यायंत्यभद्रनशनेशुचयोगृणंति।विंदंतितेकमलनाभभवापवर्गमाशासतेयदितआशिषईशनान्ये॥तं
द्देवदेवभवतश्चरणारविंदसेवानुभावमिहपश्यतुलोकएषः॥येत्वांभजंतिनभजंत्युतवोभयेषांनिष्ठांप्रदर्शयविभोकु

पजंत ये३०पदेते लमंते२

क्रतुरंवेति१

भवस्यापवर्गंमोक्षंविदंति॥यथाशासतेतर्हिआशिषोपितएवविदंतिनान्येचक्रवर्त्तिनोपि॥भगवतोभक्तपक्षपातमाविष्का
रमन्नाह॥तद्देवदेवेति॥तंतस्मात्पश्यतुसाक्षात॥एवंनिश्चितेपियेकर्म्मादिप्रधानाकेचित्कुरुसंजयाभवद्भक्तिंनकुर्वन्ति
तेतेषांमोहनिवृत्तयेयेत्वांभजंतियदिवानभजंतितेषामुभयेषांनिष्ठांस्थितिंप्रदर्शय॥ ॥ ॥ ॥

लम्बुरुनामके नर्इत्र

सेवंते३

श्रीति म

श्री० भा० द० उ० ६३

किंच अर्थिने धीरेण सुजनादिवस्त्वाणा अपि न वंचनीयाः इत्याशयेनाह ॥ यो नित्येनेति । नाचिनोति न संपादयति स वाच्यः स निंद्यः ॥ विश्वा
मित्रार्थे हरिश्चंद्रो भार्यात्मजादिमहीं विक्रीय स्वयं चांडालतां प्राप्तो यन्निर्विलः सहायो धावामिभिज्जनैः स्वर्गं गतैः ॥ रंतिदेवः सकु
टुंबोऽष्टचत्वारिंशद् दत्तनि अलब्धान्नोदकोऽपि कपंचित् लब्धान्नोदकाद्यर्थिभ्यो दत्वा ब्रह्मलोकं गतः । उंछवृत्तिर्मुद्गलः षण्मासं
सीदत्कुटुंबो यातिथ्यदानेन ब्रह्मलोकं गतः ॥ शिबिः शरणागतकपोतरक्षणाय स्वमांसं श्येनाय दत्वा दिवं गतः ॥ बलिः सर्व
स्वं ब्राह्मणवेषधारिणे हरये दत्वा तमेवात्मसात् चकार ॥ कपोतश्चातिथये व्याधाय कपोत्या सहात्ममांसं दत्वा विमानेन दिवं ग

दे० ४ हेनर नसंपादयति क्षेयः । गम्यैः २

योऽनित्येन शरीरेण सतां गेयं यशो ध्रुवं ॥ नाचिनोति स्वयं कल्पः स वाच्यः शोच्य एव सः ॥ २० ॥ हरिश्चंद्रो रंतिदेव उंछवृत्तिः
शिबिर्बलिः ॥ व्याधः कपोतो बहवो ह्यध्रुवेण ध्रुवं गताः ॥ ॥ श्रीशुक उवाच ॥ ॥ स्वैरैतैः कृतिभिस्तांस्तु लक्षयको हैर्जया हतैरपि
॥ राजन्यबंधून् विज्ञाय दृष्टपूर्वान् अचिंतयत् ॥ २२ ॥ राजन्यबंधवो ह्येते ब्रह्मलिंगानि बिभ्रति ॥ ददामि भिक्षितं तेभ्य आत्मा
नमपि दुस्त्यजं ॥ २३ ॥ बलेर्नु श्रूयते कीर्तिर्वितता दिक्ष्वकल्मषा ॥ ऐश्वर्याद्भ्रंशितस्यापि विप्रव्याजेन विष्णुना ॥ २४ ॥ ॥
श्रियं जिहीर्षतेंद्रस्य विष्णवे द्विजरूपिणे ॥ जानन्नपि महीं प्रादाद् वार्यमाणोऽपि दैत्यराट् ॥ २५ ॥ ॥ ॥ ॥ ॥

बले ॥

तः ॥ व्याधस्तयोः सत्त्वं वीक्ष्य स्वयमति निर्विण्णो महाप्रस्थानेन वाग्निना दग्धदेहो निःकल्मषो दिवमारुरोह ॥ एवमन्ये च बहवो श्रीकृष्ण
ऽध्रुवेण शरीरेण ध्रुवं लोकं गता इति ॥ अपाहतैः अपाघातकिरणांकितैः ॥ दृष्टपूर्वान् द्रौपदीस्वयंवरादिषु ॥ इंद्रस्य श्रियं ६३
जिहीर्षता विप्रव्याजेन विष्णुना भ्रंसितस्यापि बलेर्नु अहो नेति पावेन श्रूयते किं अपि तु श्रूयत इति तं श्लाघते ॥ विष्णु
नेति ॥ शुक्रेण वार्यमाणोऽपि अत एव विष्णुरिति जानन्नपि ॥ ॥

ऽयुंक्त नियुक्तवान्। विष्णुस्तेजसा उपबृंहितान् संवर्द्धितान् तेजोपबृंहितानिति संधिरार्षः॥ नकुलं मत्स्यादिभिः सहायैर्यथासंख्येन
संबंधः॥ कथंभूता यययत्नतेजागं करिष्यतो। आद्यो हरिः श्रीकृष्णः ब्रह्मलिंगधराः ब्रह्मलिंगधारिणः। यतः यत्र बृहद्रथसुतो जरासंधः
गृहेषु वर्त्तमानं। समयाचेरन् सम्यग्याचंतेस्पर्धाः॥ नन्विदं कामयामह इति विशेषो निर्द्दिश्यतां॥ अस्य यापस्य पुत्रादेर्वियोगो दुःसहः

जरासंधः ४

युधिष्ठिरः १ यक्ष्यते ३

उद्धवः ये उपायं

श्रीशुक उवाच॥ निशम्य भगवद्गीतं प्रीतः फुल्लमुखांबुजः॥ भ्रातॄन् दिग्विजयेऽयुंक्त विष्णुतेजोपबृंहितान्॥ १२॥ सहदेवं दक्षिणस्या
मादिशत्सह सृंजयैः॥ दिशि प्रतीच्यां नकुलमुदीच्यां सव्यसाचिनं॥ १३॥ प्राच्यां वृकोदरं मत्स्यैः केकयैः सह मद्रकैः॥ ते विजित्य नृपान्
वीरा आजह्रुर्दिग्भ्य ओजसा॥ १४॥ अजातशत्रवे भूरि द्रविणं नृप यक्ष्यते॥ श्रुत्वाऽजितं जरासंधं नृपतेर्ध्यायतो हरिः॥ आहोपायं त
मेवाद्य उद्धवो यमुवाच ह॥ भीमसेनोऽर्जुनः कृष्णो ब्रह्मलिंगधरास्त्रयः॥ जग्मुर्गिरिव्रजं तात बृहद्रथसुतो यतः॥ ते गत्वाऽऽतिथ्यवेलायां
गृहेषु गृहमेधिनं॥ ब्रह्मण्यं समयाचेरन् राजन्या ब्रह्मलिंगिनः॥ राजन् विद्ध्यतिथीन् प्राप्तानर्थिनो दूरमागतान्॥ तन्नः प्रयच्छ भ
द्रं ते यद्वयं कामयामहे॥ किं दुर्मर्षं तितिक्षूणां किमकार्यमसाधुभिः॥ किं न देयं वदान्यानां कः परः समदर्शिनां॥ ॥ ॥ ॥

जरासंधं

दुःसहं

अकृपणानां

सकथं देयः। तथा राजमंडनं किरीटाद्यदेयं यत तत। भिक्षुभ्यः कथं देयं तथाऽतिरम्यं रत्नाभरणादि पुत्रादियोगं कथं परस्मै देयमिति व
दत आहुः। किं दुर्मर्षमित्याहुः। अत्र दृष्टान्तत्वेनार्थान्तरमाहुः किमकार्यमिति॥ यथाऽसाधूनामकार्यं नास्ति। तथा तितिक्षूणां दुर्मर्षं दुःसहं
नास्ति। वदान्यानामनुदाराणामदेयं नास्ति। समदर्शिनां परः स्वः नास्ति। अतः किं विशेषण निर्द्देशेन तत्पर्धाः॥ ॥ ॥

श्री० भा० द० उ०

तावदुत्थायेत्यस्यायमभिप्रायः॥एवमस्तापार्षदोमत्तुल्यबलोयंसर्वानेतान्हन्यात्अतोमयैवशीघ्रंहंतव्यइतितत्क्षणमेवो
त्थायशिरोजहारेति॥शब्दइति॥नन्वेवंनिंदकस्यकथंवासुदेवप्रवेशस्तत्राह जन्मत्रयेति॥जन्मत्रयेअनुगुणितप्रावर्त्ति

निंदांभगवतःश्रुत्वातत्परस्यजनस्यवा॥ततोनापैतियःसोपियात्वधःसुकृताच्युतः॥४१॥ततःपांडुसुताःकुद्धामत्स्याकै
कयसृंजयाः॥उदायुधाःसमुत्तस्थुःशिशुपालजिघांसवः॥४२॥ततश्चैद्यस्त्वसंभ्रांतोजगृहेखड्गचर्मणी॥भर्त्सयन्कृष्णप
क्षीयान्राज्ञःसदसिपार्थिवः॥४३॥तावदुत्थायभगवान्स्वान्निवार्यस्वयंरुषा॥शिरःक्षुरांतचक्रेणजहारापततोरिपोः
॥४४॥शब्दःकोलाहलस्थासीत्शिशुपालेहतेमहान्॥तस्यानुयायिनोभूपादुद्रुवुर्विजयेषिणः॥४५॥चैद्यदेहोत्थितंज्यो जीवितै४
तिर्वासुदेवमुपाविशत्॥पश्यतांसर्वभूतानांउल्केवभुविखाच्युता॥४६॥जन्मत्रयानुगुणितवैरसंरब्धयाधियाध्या
यंस्तन्मयतांयातोभावोहिभवकारणं॥४७॥ऋत्विग्भ्यःससदस्येभ्योदक्षिणांविपुलामदात्॥सर्वान्संपूज्यविधिवच्चक्रे
वभृथमेकराट्॥४८॥साधयित्वाक्रतुंराज्ञःकृष्णोयोगेश्वरेश्वरः॥उवासकतिचिन्मासान्सुहृद्भिरभियाचितः॥४९॥
जा ततोनुज्ञाप्यराजानमनिच्छंतमपीश्वरः॥ययौसभार्यःसामात्यःस्वपुरंदेवकीसुतः॥५०॥वर्णितंतदुपाख्यानंमयातेब
हुविस्तरं॥वैकुंठवासिनोर्जन्मविप्रशापात्पुनःपुनः॥५१॥राजसूयावभृथ्येनस्नातोराजायुधिष्ठिरः॥ब्रह्मक्षत्र
सभामध्येशुशुभेसुरराडिव॥५२॥

तद्वैरंतेनसंविष्टयाआविष्टयातन्मयतांतत्स्वरूपतांयातः॥पुनःपार्षदोबभूवेत्यर्थः॥अत्रहेतुः॥भावोहीति॥भावोभाव श्रीकृष्ण
नानुध्यानंभवस्यधेयाकारजन्मनःकारणं॥पेशस्कारीध्यानेनकीटादैतयादृष्टत्वादित्यर्थः॥ ॥ ॥ ॥ ॥

वर्णाश्रमकुलेभ्योऽपेतो बृहन्तत्वात् । अनामगोत्रमिति श्रुतेः ।। अतएवानाधिकारित्वात्सर्वैर्धर्म्मैर्वहिःकृतः ।। स्वैरवर्त्ती परमे
श्वरत्वात् ।। अतएव निर्गुणः ।। तमआदिरहितः ।। एवंभूतो जीवानां यो युष्मत्तुच्छं सपर्यामात्रं कथमर्हतीत्यर्थः ।। अपिच । कथं व
र्त्तनीयो माहृशैरेतेषां यदूनां महिमा ।। तस्मादेषां कुलं ययातिना शापतमपि किं सज्जिर्वहिःकृतं ।। अपि तु शिरसा धृतं । किं
च अस्मदादिकुलवत् किंतु पापानरतं अपि त्वनियताचारमित्यर्थः । अहो यदूनामेतावदीदृशं माहात्म्यं यत्कुलहेयं ययाति स्य
तः शापोन प्राभूदित्यादि ।। अयं तु साक्षादीश्वरः ।। अतः सपर्यामात्रं कथमर्हतीत्यर्थः ।। किंच । ये राजानो दुष्टान्तु घातयंति ते तद

टी॰ शु॰पा॰ ३

वर्णाश्रमकुलोपेतः सर्वधर्म्मवहिःकृतः ।। स्वैरवर्त्ती गुणैर्हीनः सपर्यां कथमर्हति ।। ३५ ।। ययातिनैषां हि कुलं शापसंसद्भि
र्वहिःकृतं ।। वृथा पापानरतं शश्वत्सपर्यां कथमर्हति ।। ३६ ।। ब्रह्मर्षिसेवितान्देशान्हित्वैते ब्रह्मवर्चसं ।। समुद्रं दुर्ग
माश्रित्य बाधन्ते दस्यवः प्रजाः ।। ३७ ।। एवमादीन्यभद्राणि वभाषे नष्टमंगलः ।। नोवाच किंचिद्भगवान् यथा सिंहः शि
वारुतं ।। ३८ ।। भगवन्निंदनं श्रुत्वा दुःसहं तत्सभासदः ।। कर्णौ पिधाय निर्जग्मुः शपंतश्चेदिपं रुषा ।। ३९ ।। ।।

टी॰ शु॰पा॰ १

दीर्घकीकटादिदेशान्यथाश्रयंति ।। एतेतु ब्रह्मर्षिसेवितानेव देशानाश्रित्य अब्रह्मवर्चसं समुद्रं दुर्गं हित्वा तापयित्वेत्यर्थः
।। बाधंते यथा दस्यवः प्रजास्तास्च ।। अयमर्थः । चेदृतदर्थाभियोगे ब्रह्मवर्चसं । तद्विरुद्धमब्रह्मवर्चसं । मुद्रालिंगं तत्स
हितं समुद्रं वेदविरुद्धलिंगधारिणं पाषंडमित्यर्थः ।। तेतल्लिंगं तापजयित्वा बाधंते दंडयंति । कथंभूतं । दुर्गं । धर्मवि
प्रतीतेरधर्मं तया दुर्ज्ञेयमित्यर्थः ।। तथा दस्यूनपि प्रजावेषेण वर्त्तमानान्दंडयंति । अतो यदुभ्यः को नाम ।। धार्मिको
स्तीति । पारुष्यं नृत्तानार्थमेव । शिवा फेरुः तस्या रुतं श्रुत्वा यथा सिंहो न किंचिद्वत्तद्वत् ।। ।। ३८ ।। ।।

श्री० भा० द० उ० ७० ऋत्विजश्च सदस्याश्च सभासदः। बहुविदश्च तेषु स्विष्टेषु सम्यक् पूजितेषु सूनृतं प्रियवाक् समर्हणं अलंकारादि दक्षिणाश्च प्र
सिद्धाः ताभिः। द्युनद्यां गंगायां। चित्राणि ध्वजपताकाग्राणि येषु तैः। इभेन्द्रैः स्यन्दनैः रथैः। अर्वभिः अश्वैः भटैश्च एवं चतुरंगैः सैन्यै
र्निर्ययुः। यजमानो युधिष्ठिरः पुरःसरो येषां ते। गंधादिभिः स्वलंकृता नरा नार्यश्च मिथो विजह्रुः रसानेवाह। तैलेति। किंच।

गंगायां।२ सम्यक्पूजितेषु।१ ध्वजकाभे।१ मृदलादि।१ तिभुवाते रते।१

ऋत्विक्सदस्यबहुवित्सु सुहृत्तमेषु स्विष्टेषु सूनृतसमर्हणदक्षिणाभिः। चैद्ये च सात्वतपतेश्चरणं प्रविष्टे चक्रुस्ततस्त्व
वभृथस्नपनं द्युनद्यां॥८॥ मृदंगशंखपणवधुंधुर्यानकगोमुखाः। वादित्राणि विचित्राणि नेदुरावभृथोत्सवे॥९॥ नर्त्त
क्यो ननृतुर्हृष्टा गायका यूथशो जगुः। वीणावेणुतलोन्नादस्तेषां स दिवमस्पृशत्॥१०॥ चित्रध्वजपताकाग्रैरिभेन्द्रस्यं
दनार्वभिः। स्वलंकृतैर्भटैर्भूपा निर्ययू रुक्ममालिनः॥११॥ यदुसृंजयकांबोजकुरुकेकयकोशलाः। कंपयंतो भुवं सै
न्यैर्यजमानपुरःसराः॥१२॥ सदस्यर्त्विग्द्विजश्रेष्ठा ब्रह्मघोषेण भूयसा। देवर्षिपितृगंधर्वास्तुष्टुवुः पुष्पवर्षिणः॥१३॥
स्वलंकृता नरा नार्यो गंधस्रग्भूषणांबरैः। विलिंपंत्योऽभिषिंचंत्यो विजह्रुर्विविधै रसैः॥१४॥ तैलगोरसगंधोदहरिद्रासां गा ८
द्रकुंकुमैः। पुंभिर्लिप्ताः प्रलिंपंत्यो विजह्रुर्वारयोषितः॥१५॥ गुप्ता नृभिर्निरगमन्नुपलब्धुमेतद्देव्यो यथा दिवि विमा
नवरैर्नृदेव्यः। ता मातुलेयसखिभिः परिसिंच्यमानाः सव्रीडहासविकसद्वदना विरेजुः॥१६॥ ॥ ॥ ॥

राजपत्न्यः सेचा।१ वेश्याः।२ लेपनादि।१ राजपत्न्यः।२

सान्द्रकुंकुमादिभिः पुंभिर्लिप्तास्तान् प्रतिलिंपंत्यो वारयोषितश्च विजह्रुः। नृभिर्गुप्ता रथादिभिर्नृदेव्यो राजपत्न्यो निरगमन् स्त्रीकृतम्
निरगुः। एतदुपलब्धुं विमानवरैर्देव्यो यथा तद्वत्। मातुलेयैः सखिभिश्च परितः सिंच्यमानाः सव्रीडेन हासेन विकसंति वदनानि ७०
यासां ताः॥

यज्ञमहोदयोत्सवं ३

सुरामानवाःखेचराश्चमयाश्च॥पापंधर्म्मक्षिपं।अत्रहेतुः।कलिंकलेरंसं।अतएवकुरुकुलस्यामयंव्याधिंनाशकं॥५१॥वितानं यज्ञंच॥ ॥इतिदशमेचतुःसप्ततितमः॥ ॥पंचषुकुसप्ततितमेयज्ञावभृथसंभ्रमः॥सुयोधनस्यचात्रोत्पामानभंगोहृ शिभ्रमात्॥१॥दुर्योधनस्यैवएकस्यैवदुःखेकारणंप्रष्टुमुक्तमनुवदति।अजातशत्रोरिति॥इतिश्रुतंत्वन्मुखादेवेत्यर्थः

कुपिष्ठरस्य　　कलाविः ५　दुर्योधनोघ्रमोदे ५

राज्ञासभाजिताःसर्वेसुरमानवखेचराः॥क्रतुंसंक्रतुंचवंशसंतःस्वधामानियथुर्मुदा॥५२॥दुर्योधनमृतेपापंकलिंकुरुकुला मयं॥योनसेहेश्रियंस्फीतांदृष्ट्वापांडुसुतस्यतां॥५३॥यइदंकीर्त्तयेद्विस्नोःकर्मचैद्यवधादिकं॥राज्ञांमोक्षंवितानं चसर्वपापैःप्रमुच्यते॥५५॥ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंदेशिशुपालमोक्षोनामचतुःसप्ततितमोध्या यः॥ ॥राजोवाच॥ ॥अजातशत्रोस्तंदृष्ट्वाराजसूयमहोदयं॥सर्वेमुमुदिरेब्रह्मन्नृपेशायेसमागताः॥१॥दुर्योधनं वर्जयित्वाराजानःऋषयःसुराः॥इतिश्रुतंनोभगवंस्तत्रकारणमुच्यतां॥२॥श्रीशुकउवाच॥ ॥पितामहस्यतेयज्ञेराजसू यमहात्मनः॥बांधवाःपरिचर्यायांतस्यासन्प्रेमबंधनाः॥३॥भीमोमहानसाध्यक्षोधनाध्यक्षःसुयोधनः॥सहदेवस्तुपूजा यांनकुलोद्रव्यसाधने॥४॥सतांशुश्रूषणेजिष्णुःकृष्णःपादावनेजने॥परिवेषणेद्रुपदजाकर्णोदानेमहात्मनः॥५॥युयुधानो विकर्णश्चहार्दिक्योविदुरादयः॥बाल्हीकपुत्राभूर्याद्यायत्रसंतर्दनादयः॥निरूपितामहायज्ञेनानाकर्मसुतेतदा॥प्रवर्त्ततेस्म

चंदनालेपनादौ २　　पकस्थाने ३　नियुक्ताः १

दुर्योधनस्यासहनकारणत्वेनयाज्ञमहोत्सवमेवसिंहावलोकनेनैवनिरूपयति।पितामहस्येत्यादिना।एकदांतःपुरंतस्येत्यतःप्र न्थग्रंथेन॥प्रेमबंधनाःप्रेमयंत्रिताः।पूजायासंमानने॥शुश्रूषणेचंदनालेपनादौ।निरूपितानियुक्ताःसंतोनानाकर्मसु प्रवर्त्ततेस्म॥

यज्ञस्य ६
संमानने २

राजेंद्रराज्ञःप्रियाचिकीर्षया॥७१॥

श्री० भा० द० पु० ७१ गत२

गतह्वरः॥ निश्चिंतः॥ अच्युते आत्मा यस्य॥ नरेंद्रादीनां लक्ष्मीः लक्ष्म्यः विभूतयः विश्वसृजा मयेन उपक्लृप्ताः विरचि
ताः ताभिः सह॥ कुरुराट् दुर्योधनो ऽतप्यत॥ महिषीसहस्रमितिवाकुलोत्पलन्नत्ना ं। क्वणद्भिरंघ्रिभिः शोभा यस्य॥ मध्ये
सुचारु सुचारुमध्यमितिस पदः॥ कुचकुंकुमैः शोणा हारा यस्य तत्॥ श्रीमंतिमुखानि यस्य तत्॥ चलैः कुंडलैः कुंतलैश्च

युधिष्ठिरे ४ निश्चिंतः ३ विभूतयः ४ युधिष्ठिरस्य मयेनरचिताः विभूतिभिः ४ गतत्रपः २

ततो युधिष्ठिरो राजा सुहृत्संबंधिबांधवान्॥ प्रेम्णा निवासयामास सख्यं च त्यागकातरः॥ २९॥ भगवानपि तत्रैव न्यवा
त्सीत्तत्प्रियंकरः॥ प्रसृष्टाप्यपदुर्वीरांश्च संवादी श्वकुशस्थलीं॥ ३०॥ इत्थं राजा धर्म्मसुतो मनोरथं महत्सर्वं॥ सुदु
स्तरं समुत्तीर्य कृष्णेनासीद्गतज्वरः॥ ३१॥ एकदांतःपुरे तस्य वीक्ष्य दुर्योधनः श्रियं॥ अतप्यद्राजसूयस्य महित्वं चाच्यु
तात्मनः॥ ३२॥ तस्मिन्नरेंद्रदितिजेंद्रसुरेंद्रलक्ष्मीर्नानाविभांति किल विश्वसृजोपक्लृप्ताः॥ ताभिः पतिं द्रुपदराजसु
तोपतस्थे यस्यां विषक्तहृदयः कुरुराडतप्यत्॥ ३३॥ यस्मिंस्तदा मधुपतेर्महिषीसहस्रं श्रोणीभरेण शनकैः क्वण
दंघ्रिशोभं॥ मध्ये सुचारु कुचकुंकुमशोणहारं श्रीमन्मुखं च चलकुंडलकुंतलाढ्यं॥ ३४॥ सभायां मयक्लृप्तायां क्वा
पि धर्म्मसुतोऽधिराट्॥ वृतोऽनुजैर्बंधुभिश्च कृष्णेनापि स्वचक्षुषा॥ ३५॥ आसीनः कांचने साक्षादासने मघवानिव॥ ३६॥
पारमेष्ठ्यश्रिया जुष्टः स्तूयमानश्च वंदिभिः॥ तत्र दुर्योधनो मानी परीतो भ्रातृभिः सह॥ किरीटमाली न्यविशदसिहस्तः
क्षिपन्रुषा॥ स्थलेऽभ्यगृह्णाद्वस्त्रांतं जलं मत्वा स्थले पतत्॥ जले च स्थलवद्भ्रांत्या मयमायाविमोहितः॥ ३७॥

शाकंकारः २

आढ्यं संपन्नं अशोभतेति शेषः॥ क्वापि कदाचित् न्यविशत् इति शेषः॥ स्वस्य नृपधार्तितादि ज्ञापकेन॥ मानी साहंकारः॥ किरीटं च मा
ला च विद्येते यस्य सः॥ न्यविशत विवेश॥ क्षिपन् वास्यादीनधिक्षिपन्॥ तत्र स्थले वस्त्रांतम भ्यगृह्णात् आकुंचितवान्॥ कुतः न

मनिमानं २ लोपदी ४

श्री कृष्ण ७१

देवरान्पतिभ्रातॄन्।उतसखीन्सखीनपि।इतीति॥उदकेनोदनवर्मयंत्रेरमलधियांकामिनां।क्रियाभिरंगक्रियाभिःक्रतुरा
डूराजसूयइव॥पत्नीसंयाजोयागविशेषः।अवभृथसंबंधिचावभृथ्यं।तेऋत्विजश्चरित्वातामनुष्ठायेत्यर्थः।अहतेनूत

सकुलेवर्मपत्रे:१ पुंश्चलिः२:२ देव कौपीनः२ जगत् देवीराजसूयइव२

कौमिनं वामदेवोवइ तादेवरानुतसखीन्सिषिचुर्दृतीभिःक्लिन्नांबराविवृतगात्रकुचोरुमध्याः॥औत्सुक्यमुक्तकबरच्यवमानमाल्याःक्षोभंदधु
र्मलधियांरुचिरैर्विहारैः॥१८॥ससंम्राड्रथमारूढःसदश्वंरुक्ममालिनं॥व्यरोचतस्वपत्नीभिःक्रियाभिःक्रतुराडिव॥१९
पत्नीसंयाजावभृथ्यैश्चरित्वातेतमृत्विजः॥आचांतंस्नापयांचक्रुर्गंगायांसहकृष्णया॥२०॥देवदुंदुभयोनेदुर्नरदुंदुभि
भिःसमं॥मुमुचुःपुष्पवर्षाणिदेवर्षिपितृमानवाः॥२१॥सस्नुस्तत्रततःसर्वेवर्णाश्रमयुताजनाः॥महापातक्यपियतः
सद्योमुच्येतकिल्बिषात्॥२२॥अथराजाहतेक्षौमेपरिधायस्वलंकृतः॥ऋत्विक्सदस्यविप्रादीनानर्चाभरणांबरैः॥२३॥
बंधून्ज्ञातीन्नृपान्मित्रसुहृदोन्यांश्चसर्वशः॥अभीक्ष्णंपूजयामासनारायणपरोनृपः॥२४॥सर्वेजनाःसुररुचोमणि
कुंडलस्रगुष्णीषकंचुकदुकूलमहार्घहाराः॥नार्यश्चकुंडलयुगालकवृंदजुष्टवक्त्रश्रियःकनकमेखलयाविरेजुः॥ कृप देवकृतानयः
२५॥अथर्त्विजोमहाशीलाःसदस्याःब्रह्मवादिनः॥ब्रह्मक्षत्रियविट्शूद्राराजानोयेसमागताः॥२६॥देवर्षिपितृभूतानि
लोकपालाःसहानुगाः॥पूजितास्तमनुज्ञाप्यस्वधामानिययुर्नृप॥२७॥हरिदासस्यराजर्षेराजसूयमहोदयं॥नैवातृप्यन्प्रशं

पुंश्चलिःस्य

ने।आनर्चअर्चितवान्॥सुराणामिवरुक्कांतिर्येषांते॥मणिकुंडलैःसहिताःस्रगुष्णीषादयोयेषांते।कुंडलयुगेनालकवृं
देनजुष्टावक्त्रश्रीर्यासांताः॥

श्री० भा० द० उ० ७२ 72 तथेति प्रतिज्ञाय गिरिशेनादिष्टः अयस्मयं लोहमयं पुरं सौभसंज्ञं निर्माय रचयित्वा प्रादात्। तमसोंधकारस्य धाम आश्रयं
अन्यैर्दुरासदं दुःप्रापं॥ प्रासादा गृहाः। अट्टालास्तदुपरिगृहाः। तोलिकाः तत्पर्यंतकुड्यानि ताः विहारान् क्रीडा

नामर विलोहमयं २ शाल्वः १ नगरं १ अंधकारमयं २ दुःप्रापं २ पीड्यमाना ४

शाल्वः ३ देवासुरमनुष्याणां गंधर्वोरगरक्षसां॥ अभेद्यं कामगं वव्रे स यानं वृष्णिभीषणं॥६॥ तथेति गिरिशादिष्टो मयः परपु
रंजयः॥ पुरं निर्माय शाल्वाय प्रादात्सौभमयस्मयं॥७॥ स लब्ध्वा कामगं यानं तमोधाम दुरासदं॥ ययौ द्वारवतीं शाल्वो वैरं
कृष्णकृतं स्मरन्॥८॥ सगोपुराणि द्वाराणि प्रासादाट्टालतोलिकाः॥ विहारान् स विमानाग्र्यान्निपेतुः शस्त्रवृष्टयः॥ ९॥ पानेन
मरे ४ शिलाद्रुमाश्चाशनयः सर्पा आसारशर्कराः॥ प्रचंडश्चक्रवातोभूद्रजसाच्छादिता दिशः॥१०॥ इत्यर्द्यमाना सौभेन कृष्णस्य न
स्कंधे ५ गरी भृशं॥ नाभ्यपद्यत शं राजन् त्रिपुरेण यथा मही॥११॥ प्रद्युम्नो भगवान्वीक्ष्य बाध्यमाना निजाः प्रजाः॥ माभैष्टेत्यभ्य
धाद्वीरो रथारूढो महारथः॥ सात्यकिश्चारुदेष्णश्च सांबो क्रूरः सहानुजः॥ हार्दिक्यो भानुविंदश्च गदश्च शुकसार
१३ णौ॥ अपरे च महेष्वासा रथयूथपयूथपाः॥ निर्ययुर्दंशिता गुप्ता रथेभाश्वपदातिभिः॥ ततः प्रववृते युद्धं शाल्वानां यदुभि
:सह॥ यथासुराणां विबुधैस्तुमुलं लोमहर्षणं॥ ताश्च सौभपतेर्माया दिव्यास्त्रै रुक्मिणीसुतः॥ क्षणेन नाशयामास नैशं तम

व्याकुलं रौद्र क्रुधाः २ शाल्वस्य प्रद्युम्नः तेन १

स्थानानि च सवनं जो किंचा विमानाग्र्यात्तस्माद्वस्त्रवृष्ट्या हयः पेतुः॥ आसारशर्कराः धारासंपातजलोपलाः शं सुखं ना श्रीकृष्ण
भ्यपद्यत॥ तुमुलं व्याकुलं रोमहर्षणं रौद्रं नैशं निशिभवं तमः उष्णगुः सूर्य इव॥ ॥ ॥ ॥ ॥ ७२

भुवो भारं जिहीर्षुरितिस्त्र्यद्य संपादितेन कलहवीजेन कुरूणां संहारं करिष्यामीति मत्वेति ॥ किंच ॥ यस्य दृशा दृष्टिमात्रेण दुर्यो
धनो भ्रमति स्म भ्रांतिं प्राप ॥ मयमायातु निमित्तमात्रं सः भूभारहरणवीजं दुर्योधनस्य भ्रमं भीमादिहास्येन च पराभवं विधाय तत्
स्मीमासीदित्यर्थः ॥ ॥इति दशमे पंचसप्ततितमः ॥ ॥ततः षट्सप्ततितमे त्वसि शाल्वमहामृधे ॥ द्युमज्जदाप्रहारेण रणात्स्वद्यक्तने
दुर्योधनः३ स्थल२ दुर्योधनः स्त्रीतः १
जहास भीमस्तं दृष्ट्वा स्त्रियो नृपतयो परे ॥ निवार्यमाणा त्वप्यंगराज्ञा कृष्णानुमोदिताः ॥ सं व्रीडितो वाग्वदनो रुषा ज्वलन्निष्क्र
म्य तूष्णीं प्रययौ गजाह्वयं ॥ हाहेति शब्दः सुमहानभूत्सतामजातशत्रुर्विमना इवाभवत् ॥ बभूव तूष्णीं भगवान्भुवो भरं समु
जिहीर्षुर्भ्रमति स्म यद्दृशा ॥ एतत्तेभिहितं राजन्यत्पृष्टोहमिह त्वया ॥ सुयोधनस्य दौरात्म्यं राजसूये महाक्रतौ ॥ ॥
इति श्रीभागवते महापुराणे दशमस्कंधे दुर्योधनमानभंगः पंचसप्ततितमोऽध्यायः ॥ ॥श्रीशुक उवाच ॥ ॥अथान्यद
पि कृष्णस्य शृणु कर्माद्भुतं नृप ॥ क्रीडानरशरीरस्य यथा सौभपतिर्हतः ॥ शिशुपालसखः शाल्वो रुक्मिण्युद्वाह आगतः ॥
यदुभिर्निर्जितः संख्ये जरासंधादयस्तथा ॥ शाल्वः प्रतिज्ञामकरोच्छृण्वतां सर्वभूभुजां ॥ अयादवीं क्ष्मां करिष्ये पौरुषं मम
पश्यत ॥ इति मूढः प्रतिज्ञाय देवं पशुपतिं प्रभुं ॥ आराधयामास नृपः पांशुमुष्टिं सकृद्ग्रसन् ॥ संवत्सरान्ते भगवानाशुतोष उमा
पतिः ॥ वरेण छंदयामास शाल्वं शरणमागतं ॥ ॥टीका॥ निर्गमः ॥ संपाद्य धर्मराजस्य राजसूयमहोदयं ॥ निष्क्रमे सौभराज
दीनयौ पारमद्व्युतः ॥ प्रसह्य हं सकृत्पांशुमुष्टिमेकां ग्रसन्भक्षयन्संवत्सरांत इति ॥ सत्वाशुतोषोपि भगवानुमापतिः श्रीकृष्णवि
द्वेषिशाल्ववरस्य वैकल्यं मन्यमानो न शीघ्रं प्रादुरभूत् ॥ तस्मात्तिनिर्वंधमालक्ष्य संवत्सरान्ते च वरेण छंदयामास इत्यं कारितवा

श्री० अपोवाह॥ अमतोनिनाय॥ मत्तमेत्तोविना। त्वं वंचितं यस्मात्तेन त्वया सूतेन॥ पितरौ रामकेशवौ। अभिसंगम्य तत्सामर्थ्यं
भा० द० गत्वा ताभ्यां स्पृष्टः स्वयोग्यं किंतु वक्ष्यामीति॥ आलजामयो भ्रातृभार्या निश्चितं मम वेत्त्यं एवं कथयिष्यंतीति तत्कथनम
उ० नुकरोति॥ कथं कथयामिनि। विमोहं समर्थो। एतदवसर्पणं धर्म माहृस्तस्त इति। अपोवाहितः॥ अपनीतः उपसृष्टः
७२

दो०ं४ अमत्र नैनाय१ सा१थि१

मूर्च्छितः २ प्रद्युम्नंगदयाशुर्स्सिवक्षस्यलमरिंदमं॥ अपोवाहरणात्सूतो धर्मविद्दारुकात्मजः॥२७॥ लब्धसंज्ञो मुहूर्त्तेन का
मंत्रः ३ ष्र्णिः सारथिमब्रवीत॥ अहो असाध्विदं सूत यद्रणान्मेपसर्पणं॥२८॥ न यदूनां कुले जातः श्रूयते रणविच्युतः॥
ता०मां०१ को०१ विनामत्तं त्वं वंचितेन सूतेन प्राप्त किल्विषं॥२९॥ किं तु वक्ष्येभिसंगम्य पितरौ रामकेशवौ॥ युक्तं किं कथ्यतां मृधे
स्पष्टम् त्वात्मनः क्षमं॥३०॥ व्यक्तं मे कथयिष्यंति हसंत्यो भ्रातृजामयः॥ क्लैव्यं कथं कथं वीरतवान्यैः कथ्यतां मृधे॥
शत्रुणा पीडितत्वा ३१॥ सूत उवाच॥ ॥धर्मं विजानतायुष्मन्कृतमेतन्मया विभो॥ सूतः कृच्छ्रगतं रक्षेद्रथिनं सारथिं रथी॥३२॥
त्स्तस्य६ एतद्विदित्वा तु भवान्मयापोवाहितो रणात्॥ उपसृष्टः परेणेति मूर्च्छितो गदया हतः॥३३॥ ७६ ॥इति श्री भागवते
मूर्च्छितः२ महापुराणे दशमस्कंधे शाल्वसुत्रामवधे षट्सप्ततितमोध्यायः॥७६॥ ७७॥ श्रीशुक उवाच॥ ॥स उपस्पृश्य सलिलं
प्रतिरुध्य दंशितो धृतकार्मुकः॥ नय मां द्युमतः पार्श्वं वीरस्येत्याह सारथिं॥१॥ विधमंतं स्वसैन्यानि द्युमंतं रुक्मिणीसुतः॥
प्रतिहत्य प्रत्यविध्यन्नाराचैरष्टभिः स्मयन्॥२॥ चतुर्भिश्चतुरो वाहान्सूतमेकेन चाहनत्॥ द्वाभ्यां धनुश्च केतुं च शरेण
पीडि१

उपसर्गं पीडां प्राप्त इति कृत्वा॥ यतः परेण शत्रुणा गदया हतः सन् मूर्च्छितो निःसंज्ञतां गतो भवानिति॥ ॥इति दशमे षट्
सप्ततितमः॥ ॥सप्तमुके सप्ततितमे नाना मायाविचक्षणः॥ हत्वेनागत्य शाल्वस्तु हतः सौभं च चूर्णितं॥१॥ दंशितः सन्न
द्धः॥ विधमंतं नाशयंतं॥ प्रतिहत्य प्रतिरुध्य॥ अष्टाभिर्विनियोगमाह॥३॥ ॥ ॥ ॥ ॥ श्री कृष्ण ७२

किंच। विद्याधेति॥ स्वर्णमयानि पुंखानि एष्टप्रांता येषांतैः। अयोलोहं तन्मयानि पुंखान्यग्राणि येषां तैः। ध्वजिनीपा
लं सेनान्यं। सन्नतानि मग्नानि पर्वाणि ग्रंथयो येषां तैः॥ सैनिकान्भटान् नेतॄन्सारथीन्॥ स्वपरसैनयोर्वर्त्तमानाः सर्वे
पूजयामासुः॥ संमानितवंतः॥ कदाचिद्बहुरूपं कदाचिदेकरूपं॥ क्वचिन्न दृश्यते क्वचिन्न दृश्यते च॥ एवं दुर्विभाव्यमभवित

सारथीन् २ पानं ३ सैन्यं १ मग्नं ग्रंथिः १

प्रधान २ विद्याधरः पंचविंशत्या स्वर्णपुंखैरयोमुखैः॥ शाल्वस्य ध्वजिनीपालं शरैः सन्नतपर्वभिः॥ १९॥ शतेनाताडयच्छाल्वमेकैकेना प्रद्युम्नं २
स्य सैनिकान्॥ दशभिर्दशभिर्नेतॄन्वाहनानि त्रिभिस्त्रिभिः॥ २०॥ तदद्भुतं महत्कर्म प्रद्युम्नस्य महात्मनः॥ दृष्ट्वा तं पूजय
मासुः सर्वे स्वपरसैनिकाः॥ २१॥ बहुरूपैकरूपं तद्दृश्यते न च दृश्यते॥ मायामयं मयकृतं दुर्विभाव्यं परैरभूत्॥ २२॥ क्वचि शाल्वः ४
द्भूमौ क्वचिद्व्योम्नि गिरिमूर्ध्नि जले क्वचित्॥ अलातचक्रवद्भ्राम्यत्सौभं तद्दुरवस्थितं॥ २३॥ यत्र यत्रोपलक्ष्येत ससौभः दुःसहैः ५
वृष्णिवीरैः शाल्वैः २ सहसैनिकः॥ शाल्वस्ततस्ततोऽमुंचञ्छरान्सात्वतपुंगवाः॥ २३॥ शरैरग्न्यर्कसंस्पर्शैराशीविषदुरासदैः॥ पीड्यमानपु २ पुंरं २
रानीकः शाल्वोऽमुह्यत्परेरितैः॥ २४॥ शाल्वानीकपशस्त्रौघैर्वृष्णिवीरा भृशार्दिताः॥ न तत्यजू रणं स्वं स्वं लोकद्वयजिगी
पादगाः षवः॥ २५॥ शाल्वामात्यो द्युमान्नाम प्रद्युम्नं प्राक्प्रपीडितः॥ आसाद्य गदया मौर्व्या व्याहत्य व्यनदद्बली॥ २६॥ ॥

प्रहत्य १ मंत्री १

दृश्यमभवत् किंच। क्वचिदिति॥ एवं दुरवस्थितं॥ अनवस्थितं चाभवत॥ अग्निवद्दाहकः अर्कवत्स्युगपत्प्रवर्तिः संस्पर्शो येषां तैः
॥ आशीविषवदेकदेशस्पर्शमात्रेणमारकत्वाद्दुरासदैः दुःसहैः। पीड्यमानं पुरं अनीकानि च यस्य सः परैर्यदुभिः ईरितैर्मुक्तैः॥
भृशार्दिता अपि स्वं स्वं रणं स्वांस्वां युद्धभूमिं॥ मौर्व्या कार्ष्णायसमय्या व्याहत्य प्रहृत्य॥ २६॥ ॥ ॥

श्री० भा० द० उ० ७४

तं च शाल्वं शरमंदोहैः शरजालैः खं सूर्य इव रश्मिभिरिति । सुनीलत्वादिभिराकाशोपमा सौभस्य । अचिंत्यवेगत्वबाहुल्यादिभिः शराणां रश्मिसादृश्यं । अयत्नेनैव रश्मिवच्छरजालप्रसारणात् ॥ सूर्यतुल्यः श्रीकृष्ण इति ॥ टी० ह ऽत्ते ॥

शाल्वं तं च घोरशरैर्वीरो विद्ध्या सौभं च खे भ्रमत् ॥ अविध्यच्छरसंघातैः खं सूर्य इव रश्मिभिः ॥१४॥ शाल्वः शौरेस्तु दोः सव्यं सशार्ङ्गं शार्ङ्गधन्विनः ॥ बिभेद न्यपतद्धस्ताच्छार्ङ्गमासीत्तदद्भुतं ॥१५॥ हाहाकारो महानासीद्भूतानां तत्र पश्यतां ॥ विनद्य सौभराडुच्चैरिदमाह जनार्दनं ॥१६॥ ॥शाल्व उवाच॥ ॥यत्त्वया मूढ नः सख्युर्भ्रातुर्भार्या हृतेक्षतां ॥ स प्रमत्तः सभामध्ये त्वया व्यापादितः सखा ॥१७॥ तं त्वाद्य निशितैर्बाणैरपराजितमानिनं ॥ नयाम्यपुनरावृत्तिं यदि तिष्ठेर्ममाग्रतः ॥१८॥ ॥श्रीभगवानुवाच॥ ॥वृथा त्वं कत्थसे मंद न पश्यस्यंतिकेंतकं ॥ पौरुषं दर्शयंति स्म शूरा न बहुभाषिणः ॥१९॥ इत्युक्त्वा भगवान् शाल्वं गदया भीमवेगया ॥ तताड जत्रौ संरब्धः स चकंपे वमन्नसृक् ॥२०॥ गदायां सन्निवृत्तायां शाल्वस्त्वंतरधीयत ॥ ततो मुहूर्त आगत्य पुरुषः शिरसाच्युतं ॥२१॥ देवक्या प्रहितोस्मीति नत्वा प्राह वचो रुदन् ॥ कृष्ण कृष्ण महाबाहो पिता ते पितृवत्सल ॥२२॥ बद्ध्वापनीतः शाल्वेन सौनिकेन यथा पशुः ॥ निशम्य विप्रियं कृष्णो मानुषीं प्रकृतिं गतः ॥२३॥ विमनस्को घृणी स्नेहाद्बभाषे प्राकृतो यथा ॥ कथं राममसंभ्रांतं जित्वाजेयं सुरासुरैः ॥२४॥ शाल्वेनाल्पीयसा नीतः पिता मे बलवान्विधिः ॥ इति ब्रुवाणे गोविंदे सौभराट् प्रत्युपस्थितः ॥ वसुदेवमिवानीय कृष्णं चेदमुवाच सः ॥२५॥ ॥ दशवान्२ ॥ जीवः २ ॥ ॥

सख्युः शिशुपालस्य ईक्षतामस्माकं प्रमत्तः अनवहितः व्यापादितः निहतः ॥ अपराजितोहमिति मानवंतं ॥ अपुनरावृत्तिं मृत्युं ॥

७४

सौभेयाः। सौभस्थाः ॥ नवानां रात्रीणां समाहारो नवरात्रं त्रयाणां नवरात्राणां समाहारस्त्रिणवरात्रं। सप्तविंशत्यहोरात्राणी
त्यर्थः। तुमलं व्याकुलं उल्बणं घोरं। परमत मुपलस्यति ॥ इंद्रप्रस्थं गत इति ॥ आह चेति ॥ स्वगतमेव पार्थिवं चिंताविजृंभि
आक्रान्नहीता२ शाल्वसैन्यं१ हत्समापुरेर२ यानस्था१ रुधः
गद्र सात्यकि सांबाद्या जघ्नुः सौभपतेर्बलं। पेतुः समुद्रे सौभेयाः सर्वे संछिन्नकंधराः॥४॥ एवं यदूनां शाल्वानां निघ्नतामितरे
तरं ॥ युद्धं त्रिणवरात्रं तदभूत्तुमलमुल्बणं॥५॥ इंद्रप्रस्थं गतः कृष्ण आहूतो धर्मसूनुना॥ राजसूयेऽथ निवृत्ते शिशुपाले च
संस्थिते॥६॥ कुरुवृद्धाननुज्ञाप्य मुनींश्च ससुतां पृथां॥ निमित्तान्यतिघोराणि पश्यन्द्वारवतीं ययौ॥७॥ आह चाहमिहा
यात आर्यमिश्राभिसंगतः॥ राजन्याश्चैद्यपक्षीया नूनं हन्युः पुरीं मम॥८॥ वीक्ष्य तत्क
दनं स्वानां निरूप्य पुररक्षणं॥ सौभं च शाल्वराजं च दारुकं चाह केशवः॥९॥ रथं प्रापय मे सूत शाल्वस्यांतिकमाशु वै॥ सं सारथिः
भ्रमस्ते न कर्त्तव्यो मायावी सौभराडयं॥१०॥ ॥श्रीशुक उवाच॥ ॥इत्युक्तश्चोदयामास रथमास्थाय दारुकः॥ विशंतं
ददृशुः सर्वे स्वे परे चारुणानुजं॥११॥ शाल्वश्च कृष्णमालोक्य हतप्रायबलेश्वरः॥ प्राहरत्कृष्णसूताय शक्तिं भीमर
वां मृधे॥१२॥ तामापतंतीं नभसि महोल्कामिव रंहसा॥ भासयंतीं दिशः शौरिः सायकैः शतधाच्छिनत्॥१३॥ ॥
रुधः१
नमाभावयं॥ आर्यमिश्राभिसंगतो बलभद्रसहितः। दुर्निमित्तदर्शनाकुलचित्त एव चिंतयन्द्वारकामागत्य स्वानां कद
नं वीक्ष्य सौभं च शाल्वराजं च वीक्ष्य रामं पुररक्षणं प्रति निरूप्य नियुज्य दारुकं प्राहेत्यन्वयः। तेत्वया। आस्थायस्य गाधि
ष्ठाय। अरुणानुजं ध्वजे वर्त्तमानं गरुडं। हतप्रायस्य बलस्येश्वरः॥ ॥ ॥ ॥ ॥

श्री० भा० द० उ० ७५ टी०

किंच। तस्यपादैसेवयाकर्जितापुष्कला आत्मविघातया अनादिस्त्रासावात्मविपर्ययग्रहश्च अहंकृतेः शोकः सुखीदुःखीत्या
दिलक्षणः नैक्कि चिंतिनाशमतिसंततेः ऐश्वर्यं पदंच ॥ तस्यमतांगतेः कुतोनुमोह इति स्वतोनेतद्वनंसत्य ... मित्यर्थः ॥ किं
तर्हिमत्यं ॥ तदाह। तंशस्त्रपूगैरिति। वर्मकवचं ॥ रुरोज बभंज ॥ लयार्कसंनिभः प्रलयकालीनसूर्यसदृशं ॥ ॥देवगणेरीरि

सुधिकः नाशप्रतीतेः कृतः कृतीकृः स्वमहिमेत्यादि शाल्वकवचे १६। मतो॥ ॥३२॥

यत्पादसेवोर्जितयात्मविद्यया हिन्वंत्यनाद्यात्मविपर्ययग्रहं ॥ लभंत आत्मीयमनंतमैश्वरं कुतोनुमोहः परमस्य सद्गतेः ॥३२॥ तंशस्त्र वर्मत्र २
पूगैः प्रहरंतमोजसा शाल्वं शरैः शौरिरमोघविक्रमः। विध्वापितच्छर्म्मधनुःशिरोमणिं सौभंचशत्रोर्गदया रुरोज ह ॥३३॥
सौभं तत्कृष्णहस्तेरितया विचूर्णितं पपाततोयेगदयासहस्रधा ॥ विसृज्यतद्भूतलमास्थितोगदामुद्यम्य शाल्वोच्युतमभ्यगा चक्रं
शाल्वस्य४ द्रुतं ॥ आधावतः स गदं तस्यबाहुं भल्लेनछित्वाथ रथांगमद्भुतं ॥ वधाय शाल्वस्य लयार्कसन्निभं बिभ्रद्बभौ सार्क इ ईष्टः
चक्रेणैव वोदयाचलः ॥३५॥ जहारतेनैवशिरः सकुंडलं किरीटयुक्तं पुरुमायिनो हरिः ॥ वज्रेण वृत्रस्य यथा पुरंदरो बभूवहा
शाल्वे २ हेतिवचस्तदानृणां ॥३६॥ तस्मिन्निपतितेपापे सौभेचगदयाहते। नेदुर्दुंदुभयो व्योम्नि दिविदेवगणेरिताः ॥ ॥
उ०५२ सखीनामपचितिं कुर्वन् दंतवक्रो रुषाभ्यगात् ॥३७॥ ॥इति श्रीभागवते महापुराणे दशमस्कंधे सौभवधः सप्तसप्ततित
मोध्यायः ॥ ॥श्रीशुक उवाच ॥ ॥शिशुपालस्य शाल्वस्य पौंड्रकस्यापि दुर्मतिः ॥ परलोकगतानांच कुर्वन्पारोक्ष्यसौहृदं
॥१॥ एकः पदातिः संक्रुद्धो गदापाणिः प्रकंपयन् ॥ पद्भ्यामिमां महाराज महासत्वो व्यदृश्यत ॥ २ ॥ ॥ ॥

सखी

नामकिंच सखीनामिति ॥ ॥इति दशमे सप्तसप्ततितमः ॥ ॥ततोष्टसप्ततितमे दंतवक्त्रविदूरथौ ॥ हत्वा हरिः पुरे रेमे श्री०
रामः स्वतंततो वधीत् ॥१॥ सखीनामपचितिं कुर्वन्नित्युक्तं ॥ तदेवाह। शिशुपालस्येति पारोहस्यं परोक्षे करणीयं सुहृत्कार्यं

जनिताजनयिता ईशस्येव तद्वशस्येव ॥ स्वबोधः स्वतःसिद्धज्ञानवानपि स्वजनस्नेहहृतः प्रकृतो मानुषस्वभावे उपप्लुतः निमग्नश्चासे ॥
अतिष्ठत ततस्तत्वमर्थमासुरीमायाबुध्यत मायेयमिति ज्ञानवान् ॥ स्वाप्नं स्वप्नप्रपंचं यथा ॥ एवं परमतमुपन्यस्तं निराकरोति ॥ ए
वमिति ॥ केचके चन । नान्विताः पूर्वापरानुसंधानरहिताः । तदाह ॥ यत्स्ववाचइति ॥ तत्रानुस्मरतीत्यर्थः । अयमभिप्रायः । तावज्ञ

उन्मादकः विस्मारितं राक्षसः । वितरं । मनुष्यस्वभावे निमग्नस्तिष्ठते २

[illegible] २ एष ते जनिता तातो यदर्थमिह जीवसि ॥ वधिष्ये वीक्षतस्तेमुं मीशश्चेत्पाहि बालिश ॥ २६ ॥ एवं निर्भर्त्स्य मायावी खड्गेनान स्तेनात २
कदुंदुभेः ॥ उत्कृत्य शिर आदाय खस्थं सौभं समाविशत् ॥ २७ ॥ ततो मुहूर्तं प्रकृतावुपप्लुतः स्वबोध आस्ते स्वजनानुषंग रले ३
तः ॥ महानुभावस्तदबुध्यदासुरीं मायां स शाल्वप्रसृतां मयोदितां ॥ २८ ॥ न तत्र दूतं न पितुः कलेवरं प्रबुद्ध आजौ समपश्य २ इदप्रज्ञान २
स्वप्नप्रपंचं दच्युतः ॥ स्वाप्नं यथा चांबरचारिणं रिपुं सौभस्थमालोक्य निहंतुमुद्यतः ॥ २९ ॥ एवं वदंति राजर्षे ऋषयः के च नान्विताः ॥ हिताः २
यत्स्ववाचो निरुध्येत नूनं ते न स्मरंत्युत ॥ ३० ॥ क्व शोकमोहौ स्नेहो वा भयं वा येऽज्ञसंभवाः ॥ क्व चाखंडितविज्ञानज्ञानैश्वर्यस्त्वखंडितः

शोकादयः २ परमतं निराकरोति २ कृष्णः । ज्ञितः २

जस्मृयार्थं । रामेण सहागतः श्रीकृष्णः । संकर्षणमनुज्ञाप्येति पूर्वमुक्तत्वात्तदसंभावितं चेत्याह ॥ क्व शोकमोहाविति ॥ भयं वा दु
र्निमित्तकृतं नूनं हन्युः पुरीममेति यदुक्तं ॥ यच्च हत्वा छाङ्गं पतदिति उक्तं तद्भयं वा क्वेति । अज्ञेषु संभवो येषां ते । अखंडितानि
विज्ञानं ज्ञानैश्वर्याणि यस्य सः । तत्र विज्ञानं स्वरूपविषयं ॥ ज्ञानं बाह्यविषयं ॥ ३१ ॥ ॥ ॥ ॥ ॥ ॥

श्री० भा० द० उ० ७६

एवं श्रीकृष्णो महाबलानपि लीलया जयत्येवेति कृत्वा स कदाचिज्जरासंधादिभिर्निर्जित इति पशुदृष्टीनामीयते। नित्यजय एव
तु वः। योगेश्वरः भगवान् जगदीश्वर इति॥ ॥विदूरथांतमामथ्य पूतनादिदनोः कुलं॥ कृष्णस्तु पारमन्वाराद्यामोदत्स्म तत्वल्वलो॥

कृष्ण ३

गदयाभिहतोप्याजौ न चचाल यदूद्वहः॥ कृष्णो पि तमहन् गुर्व्या कौमोदक्या स्तनांतरे॥८॥ गदानिर्भिन्नहृदय उद्वमन् रुधि
रं मुखात॥ प्रसार्य केशबाह्वंघ्रीं धरण्यां न्यपतदसुः॥९॥ ततः सूक्ष्मतरं ज्योतिः कृष्णमाविशदद्भुतं॥ पश्यतां सर्वभूतानां
यथा चैद्यवधे नृप॥ विदूरथस्तु तद्भ्राता भ्रातृशोकपरिप्लुतः॥ आगच्छदसिचर्माभ्यां उच्छ्वसन् तज्जिघांसया॥ तस्य चापततः
कृष्णश्चक्रेण क्षुरनेमिना॥ शिरो जहार राजेंद्र सकिरीटं सकुंडलं॥१४॥ एवं सौभं च शाल्वं च दंतवक्रं सहानुजं॥ हत्वा दुर्विष
हानन्यैरीडितः सुरमानवैः॥१३॥ मुनिभिः सिद्धगंधर्वैर्विद्याधरमहोरगैः॥ अप्सरोभिः पितृगणैर्यक्षैः किंनरचारणैः॥ उपगी
यमानविजयः कुसुमैरभिवर्षितः॥ वृतश्च वृष्णिप्रवरैर्विवेशालंकृतां पुरीं॥१५॥ एवं योगेश्वरः कृष्णो भगवान् जगदीश्वरः॥
ईयते पशुदृष्टीनां निर्जितो जयतीति सः॥१६॥ श्रुत्वा युद्धोद्यमं रामः कुरूणां सह पांडवैः॥ तीर्थाभिषेकव्याजेन मध्यस्थः
प्रययौ किल॥ स्नात्वा प्रभासे संतर्प्य देवर्षिपितृमानवान्॥ सरस्वतीं प्रतिस्रोतं ययौ ब्राह्मणसंवृतः॥१८॥ पृथूदकं
बिंदुसरस्त्रितकूपं सुदर्शनं॥ विशालं ब्रह्मतीर्थं च चक्रं प्राचीं सरस्वतीं॥१९॥ यमुनामनु यान्येव गंगामनु च भारत॥
जगाम नैमिषं यत्र ऋषयः सत्रमासते॥२०॥

तत्प्रसंगमाह॥ श्रुत्वेति॥ प्रतिस्रोतं प्रतिलोमं॥ सुदर्शनतीर्थं यमुनामनुगानि तीर्थानि गंगामनु च यानि तानि सर्वाणि श्री कृ० ७६
गत्वा नैमिषारण्यं जगाम॥ ॥

प्रत्यघात प्रतिकूरोध॥ मुकुंदं प्राह दुर्म्मद दूसादेराधि द्वेपपरतासु टैव॥ परमार्थमिक्त। गतमदः प्राह॥ मुकुंदं तृतीये जन्मनि
मुक्तिदानार्थमागतं॥ अयेति जन्मत्रयेऽन्विष्यमाणोऽघ ब्रह्मशापावसाने भवान् मम स्वामी दृष्टिपथमागतः प्राप्तः।
एतर्हि दृष्ट्वा भद्रं भद्रं। अतिहर्षवीप्सा। किंच॥ हे कृष्ण त्वमस्माकं मातुलेयो बंधुः एवमपि मित्रध्रुक् मित्राणि घातितवान्
मां चाजिघांससि। तस्मादस्माकं त्वत्तो मृत्युः सनकाद्यनुग्रहशापो दुर्न्निवारः अतस्त्वां एतावन्मात्रमहं याचे। किं तदा
ह। हे कृष्ण मंद सर्व्वसहन मम पदद्वात्र धर्म्मेण सेवितुं गदया त्वां हनिष्ये प्रहरिष्यामि तामेकवारं सहस्वेति॥ ननु वज्रतुल्यां

दंतवक्र १

= तं तथायांतमालोक्य गदामादाय सत्वरः॥ अवप्लुत्य रथात्कृष्णः सिंधुं वेलेव प्रत्यधात्॥ आगदामुद्यम्य कारूषो
मुकुंदं प्राह दुर्म्मदः॥ दिष्ट्या दिष्ट्या भवानद्य मम दृष्टिपथं गतः॥४॥ त्वं मातुलेयो नः कृष्ण मित्रध्रुक् मांजिघांस
सि॥ अतस्त्वां गदया मंद हनिष्ये वज्रकल्पया॥५॥ तर्ह्यानृण्यमुपैम्यज्ञ मित्राणां मित्रवत्सलः॥ बंधुरूपमरिं ह
त्वा व्याधिं देहचरं यथा॥६॥ एवं रूक्षैस्तुदन्वाक्यैः कृष्णं तोत्रैरिव द्विपं॥ गदयाताडयन्मूर्ध्नि सिंहवद्व्यनदच्च सः॥७॥

त्वत्प्रहारं को वा सहेत॥ नैवमित्याह। अवज्रकल्पयापि उत्पलमालावदतिकोमलयेत्यर्थः। नन्वेवं हनने कस्तव पुरुषार्थस्तम
ह। तर्हीति। अज्ञ न विद्यते ज्ञो यस्मात्तत्संबुद्धिरज्ञेत्यर्थः परमार्थतः स्वामिनं एतद्देहसंबंधेन बंधुरूपं ब्रह्मशापेन तु शत्रुत्वेन
प्रतीतं त्वां हत्वा मित्राणामानृण्यमुपैमि। विशेषेण आधीयते मनसि चिंत्यत इति व्याधिः देहे अंतर्यामितया चरतीति तं यथा तमीश्व
रं हत्वा। त्वात्र धर्म्मेणाराध्य। हंतेर्गत्यर्थस्य ज्ञानार्थत्वात् ज्ञात्वेति वा तेन [illegible]यापि त्रादीनामानृण्यमुपयातीति तद्वदिति कृ

श्री० भा० द० उ० ७७

लोकोप्येवं वर्तिष्यति २

ब्रह्मवधे पि किं न मे ईश्वरस्येति॥ चेदिदं सत्यमेव। तथापि प्रायश्चित्तं कर्त्तव्यमित्याशयेनाहुः॥ योगेश्वरस्येति सार्द्धेन। आम्नाये ब्राह्मणेन हतेन भइत्यादिलक्षणेः। तथाप्येतस्य ब्रह्महत्यायाः पावनं प्रायश्चित्तं हे लोकपावन॥ अनन्यचोदितः स्वयमेव भवान् यदि करिष्यति नर्हि लोकसंग्रहो भविष्यति नान्यथेति॥ वधस्य निर्वेशे प्रायश्चित्तं प्रथमे कल्पे मुख्यकल्पे विधीयतां उपदिश्य तां किंच। वत हे मुनयः। एतस्य दीर्घमायुः सत्वं बलं इंद्रियं तत्पाटवं। अस्य च यद्वा अंगिरा आशासितमपेक्षितं तं तत्सर्वं ब्रूत॥ अस्य दानं सत्यतां यथा भवेत्। अस्माकं च वचः समं यथा भवेत्तथा विधीयतामित्यर्थः॥ तथा संपादयन्नाह॥ आत्मा वा इति॥ अं

आत्मलोमहंतव्य इति वेदः तथापि ... प्रायश्चित्तं हे मुख्ये

योगेश्वरस्य भवतो नाम्नायो पि नियामकः॥ पूर्वैष्ठेत ब्रह्महत्यायाः पावनं लोकपावन॥ ३३॥ चरिष्यति भवाल्लोकसंग्रहो नान्यचोदितः॥ उपदिष्टं तां २
॥ श्रीभगवानुवाच॥ ॥ करिष्ये वधनिर्वेशं लोकानुग्रहकाम्यया। नियमः प्रथमे कल्पे यावान् स तु विधीयतां॥ दीर्घमा ३३

आयुर्बलं सत्व

युर्वतैतस्य सत्वमिंद्रियमेव च॥ आशासितं यत्तद्ब्रूत साधवो योगमायया॥ ३४ ऋषय ऊचुः॥ ॥ अस्त्रस्य तव वीर्यस्य मृ

रामः

त्योरस्माकमेव च। यथा भवेद्वचः सत्यं तथा राम विधीयतां॥ ३५॥ श्रीभगवानुवाच॥ ॥ आत्मा वै पुत्र उत्पन्न इति वेदानुशास
नी। तस्मादस्य भवेद्वक्ता आयुरिंद्रियसत्ववान्॥ ३६॥ किं वः कामो मुनिश्रेष्ठा ब्रूताहं करवाण्यथ। अजानतस्त्वपचितिं यथा मे उपाय
चिंतयतां बुधाः॥ ३७॥

उत्पन्नः पुत्रः बलं

प्रायश्चित्तं हे

अंगादंगात्संभवसि हृदयादधिजायसे॥ आत्मा वै पुत्रनामासि संजीव शरदः शतमित्यादि वेदानुशासनं तस्मादस्य रोमहर्षण
स्य पुत्र उग्रश्रवाः भवतां पुराणप्रवक्ता भवेत् स च आयुरादिमांश्च भवेत् अतः साक्षाद्वंजीवनादिस्त्वस्य मृत्यो श्च सत्यता पुत्र रू श्रीकृष्ण
पेण वायुरादिसिद्धेः मुष्मद्वचनस्यापि सत्यता स्यादिति भावः॥ प्रथमं तावदपेक्षितं कथयताहं करिष्यामीत्याह। किं वः कामः इ ७०
ति। किं विषयो वः कामो वर्तते। तद्ब्रूतेति॥ अथानंतरं ब्रह्मवधे दंडं गृहीत्वा अपचितिं निःकृतिं मजानतो हे विबुधाः यथा वश्चिंत्यतामपचितिरिति॥

अभिप्रेत्य श्रीराम इति ज्ञात्वा ॥ महर्षेर्व्यासस्य ॥ सूतः प्रतिलोमजः न कृतं प्रह्वणमंजलिश्च येन तं। अध्यासीनं च तान् उच्चेभ्यो
पुच्चैरासीनमित्यर्थः ॥ अजानन्नध्यास्त इति चेन्नैवमित्याह। ऋषेरिति ॥ ननु बहुज्ञः कथमेवं कुर्यात्तत्राह। अदांतस्येति
गुणाय यथोचितानुष्ठानाय। विप्रानध्यास्ते तां। अन्यद्वा किंचित्करोतु किं न वेति चेदत आह ॥ एतदर्थमिति ॥ धर्मध्व

तावत् १ सूतं २ आसन्य ४ ...   ... उच्चैः ३ ... सूतः ३

रामं १ — तमागतमभिप्रेत्य मुनयो दीर्घसत्रिणः ॥ अभिनंद्य यथान्यायं प्रणम्योत्थाय वार्चयन् ॥ २१ ॥ सोर्चितः सपरीवारः कृ — उच्चैः २
तैः सह २ — तासनपरिग्रहः ॥ रोमहर्षणमासीनं महर्षेः शिष्यमैक्षत ॥ २२ ॥ अप्रत्युत्थायिनं सूतमकृतप्रह्वणांजलिं ॥ अध्या
सीनं च तान् विप्रान् चुकोपोद्वीक्ष्य माधवः ॥ २३ ॥ कस्मादसाविमान् विप्रानध्यास्ते प्रतिलोमजः ॥ धर्मपालांस्तथै — सत्रं दत्तं ५
४ कारणात् — वास्मान् वधमर्हति दुर्मतिः ॥ २४ ॥ ऋषेर्भगवतो भूत्वा शिष्योऽधीत्य बहूनि च ॥ सेतिहासपुराणानि धर्मशास्त्राणि सर्व
तः ॥ २५ ॥ अदांतस्याविनीतस्य वृथा पंडितमानिनः ॥ न गुणाय भवंति स्म नटस्येवाजितात्मनः ॥ २६ ॥ एतदर्थो हि लोके
स्मिन्नवतारो मया कृतः ॥ वध्या मे धर्मध्वजिनस्ते हि पातकिनोऽधिकाः ॥ २७ ॥ एतावदुक्त्वा भगवान्निवृत्तोऽसद्वधादपि ॥ — रामं २
भावित्वात्तं कुशाग्रेण करस्थेनाहनत्प्रभुः ॥ २८ ॥ हाहेतिवादिनः सर्वे मुनयः खिन्नमानसाः ॥ ऊचुः संकर्षणं देवमधर्म्म
स्ते कृतः प्रभो ॥ २९ ॥ अस्य ब्रह्मासनं दत्तमस्माभिर्यदुनंदन ॥ आयुश्चात्माक्लमं तावद्यावत्सत्रं समाप्यते ॥ ३० ॥ अजानतैवा

देहस्य न खेदो यत्र
त्वया १

जिनः उत्तमलिंगधारिणः भावित्वादिति न हि भवितव्यं केनापि परिहर्तुं शक्यत इत्यर्थः। अहननं ते त्वया। अधार्म्मिकं प्रतिलो
मजवधः कोयमधर्म्म इति चेत्तत्राहुः। अस्येति। पुराणप्रवचनाय आत्मनः शरीरस्य नास्ति क्लमो यस्मिन् तदायुश्च दत्तमिति ॥
॥ यावदयं ब्रह्मसमाप्तिर्न भवेत्तावत्पुराणवक्तापि दत्तः ॥ १ ॥ — आयुषि १

श्री० भा० द० उ० ७८ संद्रम३

किं तत्सरस्तदाह ॥ यतइति ॥ अस्रवत ॥ अगात ॥ अनुस्रोतेन आनुलोमतः पुलहाश्रमं हरिक्षेत्रं ॥ गोमत्यां गंडक्यां विपाश

रामः १ हरिक्षेत्रं २ अनुलोमतः १

अथैतैरभ्यनुज्ञातः कौशिकीमेत्य संद्विजैः ॥ स्नात्वा सरोवरमगाद्यतः सरयुरास्रवत् ॥ ९ ॥ अनुस्रोतेन सरयूं प्रयागमुप सप्तगो२

गम्य सः ॥ स्नात्वा संतर्प्य देवादीन् जगाम पुलहाश्रमं ॥ १० ॥ गोमतीगंडकीं स्नात्वा विपाशां शोण आप्लुतः ॥ गयां गत्वा पि

तृनिष्ट्वा गंगासागरसंगमं ॥ ११ ॥ उपस्पृश्य महेंद्राद्रौ रामं दृष्ट्वाभिवाद्य च ॥ सप्तगोदावरीं वेणीं पंपां भीमरथीं ततः ॥ १२ ॥

स्कंदं दृष्ट्वा ययौ रामः श्रीशैलं गिरिशालयं ॥ द्रविडेषु महापुण्यं दृष्ट्वाद्रिं वेंकटं विभुः ॥ १३ ॥ कामकोष्णीं पुरीं कांचीं कावे

परावधिः ॥ २१ ॥ एकस्मिन्नेव स्थाने आरामो येषां तेऽपि किं कालं सृष्ट्यादिकारणं ईश्वरं नियंतारं ॥ २३ ॥ एतत्सदृष्टांतमाहुः ॥ यथेति शयानः स्वप्नान् पश्यन् गुणतत्त्वदृक् स्वप्नविषयेषु तत्त्वदृष्टिः नाममात्रेंद्रियेण मनसा आभातं तं सिंहव्याघ्रादिरूपमात्मानं वेद। तं इति तं परं देवदत्तादिरूपमात्मानं न वेद तद्वत् ॥ २४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अतः साधून् भवत्सदृशान् विहाय अन्यत्र आत्मादिबुद्ध्या भजमाना अतिमंदा इत्याह ॥ आत्मबुद्धिः अहमिति बुद्धिः त्रयो धात
वो वातपित्तश्लेष्माणः प्रकृतयो यस्मिन् तस्मिन् कुणपे शरीरे । स्वधीः स्वीय इति बुद्धिः । भौमे भूविकारे इज्यधीः ॥ देवताबु
द्धिः उदके यस्य तीर्थमिति बुद्धिः । अभिज्ञेषु तत्त्ववित्सु यस्य तां बुद्धयो न संति स एव गोखरः । गो घ पि खरः दारुणः । अत्यविवेकी
यद्वा । गवां तृणादिभारवाहकः खरो गर्दभ इति ॥ दुरन्वयं अननुरूपं । भ्रमंती अनवस्थिता बुद्धिर्येषां ते तूष्णीं तु संबभूवुः ॥
ईश्वरस्येशितव्यतां । अनीश्वरतां कर्माधिकारितां ॥ चिरं विमृश्य विचार्य इह संतः जनसंग्रहमात्रमित्यूचुः ॥ अनन्वयं विज्ञ एवं त
दाहुर्द्वाभ्यां ॥ तत्त्ववित्सु उत्तमा अपि वयं यन्मायया विमोहिताः । को सौ मायया विमोहिताः । तामाहुः । यदिति । यस्मात् ईहया गू

अहमिति ॥ शरीरे   स्वीय इति बुद्धिः ।   देवताबुद्धिः । यस्य ।   [illegible]

यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः ॥ यत्तीर्थबुद्धिः सलिले न कर्हिचिज्जनेष्वभिज्ञेषु स एव गो
खरः ॥१३॥ ॥ श्रीशुक उवाच ॥ ॥ निशम्येत्थं भगवतः कृष्णस्याकुंठमेधसः ॥ वचो दुरन्वयं विप्रास्तूष्णीमासन् भ्रमद्धियः ॥
॥१४॥ चिरं विमृश्य मुनय ईश्वरस्येशितव्यतां ॥ जनसंग्रह इत्यूचुः स्मयंतस्तं जगद्गुरुं ॥ ॥१५॥ कृष्ण ऊचुः ॥ ॥ यन्मायया
तत्त्वविदुत्तमा वयं विमोहिता विश्वसृजामधीश्वराः ॥ यदीशितव्यायति गूढ ईहया अहो विचित्रं भगवद्विचेष्टितं ॥१६॥
अनीह एतद्बहुधैक आत्मना सृजत्यवत्यत्ति न बध्यते यथा ॥ भौमैर्हि भूमिर्बहुनामरूपिणी अहो विभूम्नश्चरितं विडंबनं ॥१७॥

स्वरूपमात्रेण १   अनीश्वरवच्चेष्टते २   परिपूर्णस्य जन्मादि   [illegible]

ईहचेष्टितेन नरचेष्टितेन गूढः सन् ईशितव्यायति । अनीश्वरवदाचरति भवान् । न त्वहमीश्वरस्तेश्वर इत्येवमाचरेयत आहुः ॥
अहो इति भगवंस्तव चेष्टितं विचित्रमवितर्क्यं भगवच्चेष्टितं त्वमेवाह ॥ अनीह इति ॥ अनीहः अक्रिय एव आत्मना स्वरूपमात्रेण
बहुधैतत्सृजत्यत्ति न बध्यते । अत्र दृष्टांतः । यथा भौमैरिति भौमैर्घटादिविकारैः रूपलक्षिता । वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति
श्रुतेः ॥ ननु कथमहं जगत्स्रष्ट्रादिकर्ता वसुदेवसुतत्वादिति चेत् तत्राहुः ॥ अहो इति । विभूम्नः परिपूर्णस्य तवेदं जन्मादिच
रितं विडंबनमात्रं न तु तत्त्वतः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

जनस्य

अभिज्ञेषु यः

तत्त्ववित्सु यस्य सा
य देवता यस्य ती
र्थबुद्धिर्नास्ति स एव
गर्दभः ॥१॥ जन
का कृ कः १
यस्य तव ३
अवितर्क्य २

श्री०
भा० द०
श०
८३

श्रीक्लेशैर्भेदकत्वादिमानो विद्याविजृंभित इत्याह ॥ यस्यानुभूतिर्ज्ञानं कुतश्चिदपि न रूध्यति न नश्यति। कालेन कल्पादिकादिफल वत्। अस्याविश्वस्य लयोत्पत्त्यादिनापि स्वतश्चाविद्धादिव। अन्यस्मात्तु मुद्गरादेर्घटवत्॥ गुणतो रूपाद्यंतरोत्पत्त्यैवं पूर्व रूपादिनादेहादितमेवं कुतश्चिदप्यहतानुभावं॥ तमेवं कुतश्चिदपि क्लेशादिरव्याहतानुभवं॥ तत्र क्लेशा रागादयश्च तत्पूर्वका णि कर्माणि च॥ तत्परिपाके सुखदुःखे च सत्वादिगुणानां पुनःपुनःप्रवाहस्तैः प्राणादिभिः स्वविभवैः स्वस्वकार्यैः॥ अत्र दृष्टांतः॥ मेघादिमोपरागैः॥ अभ्रतुषारराहुभिः स्वविभवैः सूर्यमिव॥ अतएवेश्वरं। किंचाद्वितीयमस्यं। अन्यथा कृतः॥ उपरदं अत्रं म

ः। गो० २ अगतः। सुसकार्थैः रूदं तव ३ ४ ५ नश्प० १ कलै १

यस्यानुभूतिः कालेन लयोत्पत्त्यादिनास्य वै। स्वतोन्यस्माच्च गुणतो न कुतश्चन रिष्यति॥ ३२॥ तं क्लेशकर्मपरिपाकगुणप्रवा हैरव्याहतानुभवमीश्वरमद्वितीयं। प्राणादिभिः स्वविभवैरुपगूढमन्यो मन्येत सूर्यमिव मेघहिमोपरागैः॥ ३३॥ अथोचुर्मुन यो राजन्नाभाष्यानकदुंदुभिं। सर्वेषां शृण्वतां राज्ञां तथैवाच्युतरामयोः॥ ३४॥ ऋषय ऊचुः॥ कर्मणा कर्मनिर्हार एष साधु निरूपितः॥ यच्छ्रद्धया यजेद्विष्णुं सर्वयज्ञेश्वरं मखैः॥ ३५॥ चित्तस्योपशमोयं वै कविभिः शास्त्रचक्षुषा॥ दर्शितः सुगमो योगो धर्मश्चात्ममुदावहः॥ ३६॥ अयं स्वस्त्ययनः पंथा द्विजातेर्गृहमेधिनः॥ यच्छ्रद्धयाप्तवित्तेन शुक्लेनेज्येत पूरुषः॥ ३७॥ ॥

तरेः। बस० ३ नेरास० ३ कौ०क० १ मो० ए० १

ने० मतेय धनेना ग०३ १

तुष्पं मन्येत कः क्लेशकर्मादिभिः तत्र कल्मषकिमानोऽविद्याविजृंभित इत्यर्थः। चित्तस्योपशमः। कविभिर्विद्वद्भिः उपशमे हेतुः ॥ योगः मोक्षोपायः॥ शनैरात्ममुदमावहतीति तथा। सुगमः प्रवृत्त्याश्रयत्वात्। धर्मश्चावश्यकः। अन्यथा विहितकरणे मा लिन्यप्रसंगात्॥ अहतानुनकर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरिति श्रुत्यादिना त्यागस्यैव विहितत्वात्कथं क र्मणा मोक्षोपाय इत्याशंक्याद्यादावेवत्यागस्याशक्यत्वादित्याशयेनाहुः। स्वार्द्धे अनुभिः॥ स्वस्ति क्षेमं ईयते नेनेति तथा॥ यत् श्रद्धयानिःकामतया शुक्लेन शुद्धेनाप्तेन वित्तेन पुरुषं ईश्वरं यष्टा नामुदेवं इज्येतेति यत्। एषः पंथाः॥ ॥ ॥

श्री कृ० स०
८३

रत्न

एवं त्वां नाममात्रेषु स्वप्नतुल्यविषयेष्विन्द्रियै[illegible]र्या ईहा प्रवृत्तिः सैव माया तया विभ्रमच्चित्तो न वेद॥ स्मृतेर्विवेकस्योप
प्लवान्नाशात्॥ अघौघस्य मर्षनाशं यत्करोति गंगा सा तीर्थं तस्यास्पदमाश्रयं तेंघ्रिं सुविपक्वयोगैरपि हृदि कृतं केवलं ननु किं
दृष्टं तस्मात्तेंघ्रिं ददृशिम दृष्टवन्तो वयं॥ विकृभिः पुरुषैः॥ अतोऽस्मान् भक्तान् अनुगृहाण। भक्तान् कृत्वा अनुग्रहं कुर्वित्यर्थः॥ ननु किं
भक्त्यायपापूर्वंतप एवत् प्यतां नेत्याह॥ उत्सिक्ता उद्रिक्ता या भक्तिः तया उपहत आशय लक्षणो जीवकोशो येषां त एवं
भूताः॥

लिंगशरीरः २   एवं त्वा वयं

स्वप्नतुल्येषु   नहेष्ट   २८ आ।   ग्रधीकर   नरः१   विवेकनाशात्१

एवं त्वां नाममात्रेषु विषयेष्विन्द्रियेहया॥ मायया विभ्रमच्चित्तो न वेद स्मृत्युपप्लवात्॥ २५॥ तस्याद्य ते ददृशिमांघ्रिमघौघमर्ष-   नाशकं
तीर्थास्पदं हृदि कृतं सुविपक्वयोगैः॥ उत्सिक्तभक्त्युपहताशयजीवकोशा आपुर्भवद्गतिमथानुगृहाण भक्तान्॥ २६॥   मस्थान २
इत्यनुज्ञाप्य दाशार्हं धृतराष्ट्रं युधिष्ठिरं॥ राजर्षेः स्वाश्रमान् गंतुं मुनयो दधिरे मनः॥ २७॥ तद्वीक्ष्य तानु-
श्रीसुक उवाच॥ ॥   ऋात्रुभिरुत्पा
पव्रज्य वसुदेवो महायशाः॥ प्रणम्य चोपसंगृह्य बभाषेदं सुयंत्रितः॥ २८॥ श्रीवसुदेव उवाच॥ ॥ नमो वः सर्वदेवेभ्य ऋषयः
श्रोतुमर्हथ॥ कर्मणा कर्मनिर्हारो यथा स्यान्नस्तदुच्यतां॥ २९॥ नारद उवाच॥ ॥ नातिचित्रमिदं विप्रा वसुदेवो बुभुत्सया॥ श्रेयो
वैराग्यः२
हृदये॥ ३॥
बालं मत्वा भगवंतं यन्नः पृच्छति श्रेय आत्मनः॥ ३०॥ संनिकर्षो ह्यत्र मर्त्यानामनादरणकारणं॥ गांगं हित्वा यथान्यांभस्तत्रत्यो याति शु-
वसुदेवप्रश्नविधाने २

सन्निधः १ कृष्णे

[illegible] दैवतास्ताः
वै भगवज्जतिं प्रापुर्नान्ये॥ उपसंगृह्य चरणौ पाणिभ्यां धृत्वा बभाषे इदमिति॥ सन्धिरार्षः॥ सर्वदेवा ये युतेभ्यः॥ यावती
सर्वा वेदविदि शास्त्रेणैव संती तिष्ठन्तः॥ येन कर्मणा यथा कृतेन वा कर्मणां निर्हारो निरासो यथा भवति तदुच्यतां॥ [illegible] श्रीकृ-
ष्णं हित्वा अस्मान् पृच्छतीति विस्मितान् प्रत्याह॥ नातीति॥ बुभुत्सया बोद्धुमिच्छया॥ ३०॥ तत्रत्यः गंगातीरवासी॥ ३१॥ ॥ ॥

उपस्पृश्य १

श्री० भा० द० उ० ८४

अक्तं नेत्रयो रंजनेन॥अभ्यक्तं सर्वांगेषु नवनीतेन॥४७॥ ताभिः सहितो दीक्षितो विरेजे॥४८॥ वृत्रहणः इंद्रस्य यज्ञे यथा तथा वि
रेजुः॥४९॥ जीवेशो सर्वजीवानामीशो॥५०॥ अनुयज्ञं प्रतियज्ञं आम्नातसर्वांगाः प्राकृताः ज्योतिष्टोमदर्शपौर्णमासादयः॥

वसुदेवं इंद्रस्य वसुदेवः३ ज्योतिष्टोमादिप सूर्यसत्रादिप चंद्रः

नेदुर्मृदंगपटहशंखभेर्यानकादयः॥ननृतुर्नटनर्तक्यस्तुष्टुवुः सूतमागधाः॥४६॥ जगुः सुकंठ्यो गंधर्व्यः संगीतं सह
भर्तृकाः॥तमभ्यषिंचन्विधिवदक्तमभ्यक्तमृत्विजः॥४७॥ पत्नीभिरष्टादशभिः सोमराजमिवोडुभिः॥ताभिर्दुकूलवलयै
र्हारनूपुरकुंडलैः॥स्वलंकृताभिर्विबभौ दीक्षितोजिनसंवृतः॥४८॥ तस्यर्त्विजो महाराज रत्नकौशेयवाससः॥ससद
स्या विरेजुस्ते यथा वृत्रहणोध्वरे॥४९॥ तदा रामश्च कृष्णश्च स्वैः स्वैर्बंधुभिरन्वितौ॥रेजतुः स्वसुतैर्दारैः जीवेशौ स्व
विभूतिभिः॥५०॥ ईजेनुयज्ञं विधिना अग्निहोत्रादिलक्षणैः॥प्राकृतैर्वैकृतैर्यज्ञैर्द्रव्यज्ञानक्रियेश्वरं॥५१॥ अथर्त्विग्भ्यो
ददात्काले यथाम्नातं स दक्षिणाः॥स्वलंकृतेभ्योलंकृत्य गोभूकन्या महाधनाः॥५२॥ पत्नीसंयाजावभृथ्यैश्चरित्वा ते मह
र्षयः॥सस्नू रामह्रदे विप्रा यजमानपुरःसराः॥५३॥ स्नातोलंकारवासांसि वंदिभ्योदात्तथा स्त्रियः॥ततः स्वलंकृतो वर्णा
नाश्वभ्योन्नेन पूजयत्॥५३॥ बंधून्सदारान्ससुतान्पारिबर्हेण भूयसा॥विदर्भकोशलकुरून्काशिकेकयसृंजयान्॥सद
स्यर्त्विक्सुरगणान्नृभूतपितृचारणान्॥५४॥ श्रीनिकेतमनुज्ञाप्य शंसंतः प्रययुः क्रतुं॥ब्राह्मणक्षत्रियविशाय चा
स्वद्द्रष्टुमागताः॥५५॥ टीका॥ तेभ्यश्चादनालिंगादिभिरिति॥ देशप्राप्तांगाः वैकृताः सूर्यसत्रादयः॥ तेः सर्वैः द्रव्यं पु

स्या।

रोडाशादि॥ ज्ञानं मंत्रः तत्क्रिया कर्म तेषामीश्वरं॥५१॥ महामनाः अत्युदारचित्तः॥५२॥ सस्नुः स्नानं चक्रुः॥ चरित्वा उदितेन वि
धिना॥५३॥ आश्वभ्यः श्वपर्यंतेभ्यो॥ ब्राह्मणादीन्वर्णानन्नेनापूजयत॥५४॥ बंधूनादीन्पारिबर्हेण प्रीतिदाने

विरेजे दीक्षितो वृतः ३=

सर्वजीवानामीशो

पत्नीसंयाजावभृथैः वा प ८६

श्री भा० द० ८४

॥यज्ञदानाद्यैर्धनक्षयाद्येत॥यज्ञदानादौ कृते सति धने छोत्सृजेत॥एतजोगार्थं दारसुतादिकं प्राद्ये॥भोग्ये कृते दारसुतादिकं त्यजेत॥स्वर्गादिज्ञोगार्थं स्वर्गादिकं याचेत॥स्वर्गादिज्ञोगे कृते स्वर्गादीछां त्यजेत॥२॥ ॥

स्वस्त्ययनत्वमाहुः॥वित्तैषणामिव॥वित्तफलभूतैः यज्ञैः॥दानैश्च वित्तैषणां वित्तेछां विसृजेत॥गृहैः गृहोचितैर्भोगैः दारसुतैषणां विसृजेत॥तदनुभवेनैव तदोत्सुक्यनिवृत्तेः॥देहे मृते आत्मनः॥स्वर्गादिलोकैषणां च कालेन तया अनुसंधानेन विसृजेत॥देवहे वसुदेव॥यद्वा॥देवकालेन देवानामपि मृत्युनामृत्युहेतुभूतेन त्वर्थः॥अत्र सदाचारं प्रमाणयति॥ग्रामे वर्त्तमाना ये धीराः ते तस्तपोवनं ययुः॥तथा च श्रुतिः॥जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते॥ब्रह्मचर्येण ऋषिभ्यो यज्ञो

भोगैः २ पुत्रदेः ४ स्वर्गादि के एतजोगार्थं देवर्षिपितॄन्

वित्तैषणां यज्ञदानैर्गृहैर्दारसुतैषणां॥आत्मलोकैषणां देव कालेन विसृजेद्बुधः॥३८॥ग्रामे त्यक्तैषणाः सर्वे ययुर्धीरास्तपोवनं॥ऋणैस्त्रिभिर्द्विजो जातो देवर्षिपितॄणां प्रभो॥३९॥यज्ञाध्ययनपुत्रैस्तान्यनिस्तीर्य त्यजन्पतेत॥त्वं त्वद्य मुक्तो द्वाभ्यां वै ऋषिपित्रोर्महामते॥४०॥यज्ञैर्देवर्णमुन्मुच्य निरृणो शरणो भव॥वासुदेव भगवति भक्त्या परमया हरिं॥जगतामीश्वरं प्रार्चः स यद्वां पुत्रतां गतः॥४१॥श्रीशुक उवाच॥इति तद्वचनं श्रुत्वा मूर्ध्ना नत्वा प्रणम्य च॥तानृषीनृत्विजो वव्रे वसुदेवो महामनाः॥४२॥तएनमृषयो राजन् वृता धर्मेण धार्मिकं॥तस्मिन्नयाजयन् क्षेत्रे मखैरुत्तमकल्पकैः॥४३॥तद्दीक्षायां प्रवृत्तायां वृष्णयः पुष्करस्रजः॥स्नाताः सुवाससो राजन् राजानः सुष्ठ्वलंकृताः॥४४॥तन्महिष्यश्च मुदिता निष्ककंठ्यः सुवाससः॥दीक्षाशालामुपाजग्मुरालिप्ता वस्तुपाणयः॥४५॥ ॥ ॥कुरुक्षेत्रे ॥ रा०८४ः१॥ ॥

चन्दनादि कुंकुमादिभिः १

न देवेभ्यः प्रजया पितृभ्यः इत्यादि॥यज्ञाध्ययनपुत्रैः तान् ऋणान् अनिस्तीर्य तेषां ऋणान्यनपाकृत्य अधः पतेत॥तथा च मनुः ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत॥अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः इति॥निरृणः निर्मुक्तऋणः अशरणो भव गृहं त्यक्त्वा व्रज॥किंतु॥अविशुद्धचित्तानामयं क्रमः॥त्वं तु कृतार्थ एवेत्याहुः॥वासुदेवेति प्रार्चः प्रकर्षेणार्चितवानसि॥

प्रवेशोऽस्ति मेत ऋणत्रयं भिक्षेणैव तेन गा नवी॥४॥

श्री० अद्यश्व इति प्रातर्निर्गमने श्वो वा अपराह्णे गम्यतामिति ॥ अपराह्णे निर्गमे श्वो गम्यतामिति पुनः पुनरेवं मानिताः सन्तस्त्रीन् मासान्
भा० द यापितः महता सेनेन प्रस्थापितः ॥ ६९ ॥ यदुदेवस्य वसुदेवस्य महोत्सवं यज्ञादिलक्षणं ॥ सुहृत्संदर्शनादिकं च ॥ ७१ ॥
उ० वसुदेवस्य १ भगवत्सकाशेनवप्रेषितः ४ गंभेदस्य प्रकल्पकार संमोद्यतां नंदः
८५ ॥ श्रीशुक उवाच ॥ ॥ एवं सौहृदशैथिल्यचित्त आनकदुंदुभिः ॥ रुरोद तत्कृतां मैत्रीं स्मरन्नश्रुविलोचनः ॥ ६७ ॥ नंदः सखस
नानाप्रसाद प्रापितः ३ सख्युः प्रियसखं तं विभ्रमाणगोविंदरामयोः ॥ अद्य श्व इति मासांस्त्रीन् यदुभिर्मानितोऽवसत् ॥ ६८ ॥ ततः कामैः पूर्यमाणः सव्र
जः सहबांधवः ॥ परार्ध्याभरणक्षौमनानानर्घ्यपरिच्छदैः ॥ ६९ ॥ वसुदेवोग्रसेनाभ्यां कृष्णोद्धवबलादिभिः ॥ दत्तमादा
यौपचितिं यापितो यदुभिर्ययौ ॥ ७० ॥ नंदो गोपाश्च गोप्यश्च गोविंदचरणांबुजे ॥ मनः क्षिप्तं पुनर्हर्तुमनीशा मथुरां ययुः ॥ ७१ ॥
॥ बंधुषु प्रतियातेषु वृष्णयः कृष्णदेवताः ॥ वीक्ष्य प्रावृषमासन्नां ययुर्द्वारवतीं पुनः ॥ ७२ ॥ जनेभ्यः कथयांचक्रुर्यदुदेवमहो यज्ञादिकं ५
त्सवं ॥ यदासीत्तीर्थयात्रायां सुहृत्संदर्शनादिकं ॥ ७३ ॥ य इदं कीर्तयेन्नित्यं शृणुयाद्वापि भक्तितः ॥ ऋणत्रयविनिर्मुक्तो
गोविंदस्य प्रियो भवेत् ॥ ७४ ॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे चतुरशीतितमोऽध्यायः ॥ ८४ ॥ ॥ शुक उ
क्षमामी २ वाच ॥ ॥ अथैकदात्मजौ प्राप्तौ कृतपादाभिवंदनौ ॥ वसुदेवोऽभिनंद्याह प्रीत्या संकर्षणाच्युतौ ॥ १ ॥ मुनीनां स वचः श्रुत्वा पु वसुदेवः १
त्रयोर्धामसूचकं ॥ तद्वीर्यैर्जातविश्रंभः परिभाष्याभ्यभाषत ॥ २ ॥ टीका ॥ ॥ इति दशमे चतुराशीतितमः ॥ ॥ ॥
प्रसादः १ वचः १ मातापितृत्वं विश्वासः १ संबोध्य १
पंचाशीतितमे रामकृष्णौ संप्रार्थितौ सुतौ ॥ पित्रे ज्ञानमयो मात्रे मृतपुत्रानयच्छतां ॥ नंदयित्वा कुरुक्षेत्रयात्रायां सुहृदो बहून् ॥ तत्वज्ञा श्रीकृष्ण
नं ततः पित्रा रदिशन्मृतसूनुभिः ॥ १ ॥ तत्स्तवकं परिभाष्य संबोध्य ॥ ज्ञानविश्रंभः ॥ उत्पन्नविश्वासः ॥ २ ॥ ॥ ॥ ॥ ८५

तै २

प्रयाणे केषांचिद्विशेषमाह ॥ द्वाभ्यां ॥ अनुजो विदुरः पार्थो युधिष्ठिरभीमार्जुनाः । यमौ नकुलसहदेवौ सौहृदेन लिंगान्या
ण्यारवेत्तांसियेषांते ॥ ५६ ॥ येत्रिपापरायणाः कृतघ्नः येविस्मृपकारापराः स्तेकृतघ्नंच ॥ ५८ ॥ मनोरथो यज्ञविषयः तमेव
महार्णवं ॥ ६० ॥ शूराणां बलेन । योगिनां ज्ञानेनापीत्याह ॥ कुतस्तत्राह ॥ ६१ ॥ कृताज्ञेषु कृतमुपकारमजानत्सु ॥ मत्तमैर्भे

अनुपमेयं मैत्र्यस्तापः कृतोपकारमजानतः प्रत्युपकारदत्त्यापि

धृतराष्ट्रोऽनुजः पार्थो भीष्मो द्रोणः पृथा यमौ ॥ नारदो भगवान्व्यासः सुहृत्संबंधिबांधवाः ॥ ५९ ॥ वंशस्य परिरक्षस्य
दूत्सौहृदालिन्नचेतसः ॥ पृथुर्विरहकृष्णेण स्वदेशांश्चापरेजुनः ॥ ६० ॥ तं कृष्णमहागोपाले ईहत्या पूजयाच्चिंतः ॥ कृ
ष्णरामोग्रसेनाद्यैर्न्यवात्सीद्बंधुवत्सलः ॥ ६१ ॥ वसुदेवोऽजसोत्तीर्य मनोरथमहार्णवं ॥ सुहृद्वृतः प्रीतमना नंदमाह क
रेस्पृशन् ॥ ६२ ॥ श्रीवसुदेव उवाच ॥ ॥ भ्रातरीशकृतः पाशो नृणां यः स्नेहसंज्ञितः ॥ तं दुस्त्यजमहं मन्ये शूराणामपि यो
गिनां ॥ ६३ ॥ अस्मास्वप्रतिकल्पोऽयं यत्कृतोऽज्ञेषु सत्तमैः ॥ मैत्र्यर्पितोऽफलश्चापि तैर्न निवर्त्तेत कर्हिचित् ॥ ६४ ॥ प्रागकल्पाच्च कुशलं भ्रातर्वो नाचराम ते ॥ अधुना श्रीमदांधाक्षा न पश्यामः पुरः सतः ॥ ६५ ॥ मा राज्यश्रीरभूत्पुंसः श्रेयस्काम स्य मानद ॥ स्वजनानुत बंधून्वा न पश्यति ययांधदृक् ॥ ६६ ॥ टीका ॥ बह्विरप्रतिकल्पा अनुपमा मैत्री यमार्पिता अफला

श्रीमदांधः १

पि प्रत्युपकारस्याभावेपि कर्हिचिदस्मान्न निवर्त्तेत । तस्मादीशकृतः पाशो भवतामिति गम्यते ऽफलत्वमेवाह ॥ ६४ ॥ हे भ्रातः अ
कल्पात् असमर्थत्वात् वः कुशलं प्रियं न आचराम कृतवंतो वयं ॥ अधुना श्रीमदेनांधा सन्वर्त्तामिये वोते ॥ ६५ ॥ राज्यश्री
र्माभूत ॥ छांदसोऽडागमः ॥ ॥ ॥ ॥ ॥ श्रीगोपीजनवल्लभाय नमः ॥ ॥

(left margin) असमर्थत्वात् २ कृतवंतो वयं २

(right margin) कृतो मैत्र्यः

श्री० भा० द० उ० ९६

ईश्वरस्यैव प्राणादीनां

ननु प्राणादीनां विचित्रशक्तीनां कारणत्वावगमात्कथं परमेश्वरस्यैव कारणत्वेन सर्व्वात्मकत्वमुच्यत इत्याशंक्य प्राणादि
शक्तयोऽपि तस्यैवेत्याह ॥ प्राणादीनामिति । प्राणः सूत्रं तदादीनां विश्वसृजां विश्वकारणानां याः शक्तयस्ताः परस्य पर
मकारणस्येश्वरस्यैव कुतः पारतंत्र्यात् ॥ यथा वेधशक्तिर्न्न बाणस्य अपितु पुरुषस्य तद्वदित्यर्थः ॥ ननु भगवतः प्राणादिव
र्गस्य चेतनपारतंत्र्यमेव किन्न स्यात् ॥ अत आह ॥ वैसादृश्यात् द्वयोरिति चेतनाचेतनत्वेन विसदृशत्वात् ॥ द्वयोश्चेत
न प्राणादिवर्गस्य चेतनपारतंत्र्यमेव युक्तमित्यर्थः ॥ यद्वा प्राणादिषु द्वयोर्द्वयोरेवंताविद्विसदृशत्वं विरुद्धक्रियाकारि

॥ चेतनाचेतनयोर्वैसादृश्यात् ॥ विरुद्धक्रियावत्वात् ॥ बहूनां कारणत्वकल्प

सूत्रात्मा कारणानां ईश्वरस्यतत्रैव सूत्रादीनां नैगौरवात् लाघवादेकस्यैव कारणत्वमुक्तं ॥ ॥ चेष्टतां प्राणादीनां चेष्टैव न भवति ॥ नोत्पादशक्तिः मतः प्राणादीनामपि सर्वज्ञ...एव...

॥ ॥ प्राणादीनां विश्वसृजां शक्तयो याः परस्य ताः ॥ पारतंत्र्याद्वैसादृश्याद्द्वयोश्चेष्टैव चेष्टताम् ॥ ६ ॥ ॥ रकः

त्वात्किं पुनर्बहूनां तस्मादेकेनैव सर्वशक्तिनाधिष्ठितानामेव विशिष्टकार्यारंभकत्वं युक्तं न स्वतंत्राणामिति तथा चोक्तं ॥
यदैते संहता भावा भूतेंद्रियमनोगुणाः । यदायतननिर्म्माणे न शेकुर्ब्रह्मवित्तम ॥ तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः
सदसत्वमुपादाय चोभयं सस्रजुर्ह्यदः इति तथा नानात्वात्स्वतंत्रानी शाः प्रोचुः प्रांजलयो विभुमित्यादि । ननु प्राणादीनां क्रि
याकारित्वं शक्त्यभावे कुतः स्यादत आह चेष्टैव चेष्टतामिति चेष्टमानानामेषां चेष्टैव न शक्तिः यथा वायोः शक्त्या तृणादीनां
चालनं यथा पुरुषशक्त्या शराणां वेग इति ॥ ६ ॥ ॥ ॥ ॥ ॥

श्री कृष्ण ९६

प्रकेश्वसक्षतंब्रवोः४

अस्यविश्वस्ययत्साक्षात्स्वरूपभूतंयत्कारणंप्रधानपुरुषौनामपरौतयोरपिकारणत्वेनेश्वरौचसाक्षाद्यांयुवामितिज्ञानैन
वारतैः न्विदंविश्वमनेकैःकारकैर्जायमानंकुतःप्रधानपुरुषात्मकं।।कुतस्तरामीश्वरयोस्तत्कारणत्वेनेश्वरत्वंतत्राह।।३।।यत्राधिकर
णेयेनकर्त्राकारणेनच।।यतोऽपादानात्।यस्यसंबंधेनषष्ठ्यर्थस्यकारकत्वेपिनिमित्ततोक्ता।।यस्मैसंप्रदानाय।।यद्यदितिप्र
योऽप्यकर्तृकिंकर्मकारकेदर्शिते।।ननुतयोर्नास्तिभेदः।।यथोक्तं।।करोतिक्रियमाणेननकश्चित्कर्मणाविना।।भवत्यर्थस
कर्त्ताचकरोतिकर्मजायते।।तथा।।करोत्यर्थस्यकर्त्ताचयोभवतिसप्रयोजकःभविता।।तमपेक्ष्यचप्रयोऽप्यत्वंप्रपद्यतइति

अधिकरणादिसर्वं ओमयओंकार युवयोः विश्वस्यकारणं१ ।।जगत।एवमग्रेपि१

कृष्णकृष्णमहायोगिन्संकर्षणसनातन।।जानीवोस्यस्ययत्साक्षात्प्रधानपुरुषेश्वरौ।।३।।यैनवयेनयतोयस्ययस्मैयद्यद्य
क्रियाशक्तिःज्ञा थायदा।।स्यादिदंभगवान्साक्षात्प्रधानपुरुषेश्वरः।।४।।एतन्नानाविधंविश्वमात्मसृष्टमधोक्षज।।आत्मनानुप्रविश्यात्म
नशक्तिःसन्नेत न्प्राणोजीवोबिभर्ष्यजः।।५।।
मेवविश्वंबिभर्षि यंसत्यं।।तथाप्यवस्थानभेदेनभेदोविवक्षितः।।दृश्यतेचावस्थाभेदः।।तंदुलानोदनंपचतिमृदंघटंकरोतीतिवत्।।तदेवंसप्तविभ
क्त्यर्थादर्शिताः।।यथेतियदेतिचक्रियाविशेषणभूतानामन्येषांवाव्ययानामर्थस्यादितिक्रियापदार्थोपलक्षणं।।एवंसर्वप्रपं
चमस्तद्गतकारणंभगवद्रूपतांधत्ते।।इदंसाक्षादिति।।प्रधानंभोग्यंपुरुषोभोक्तातयोरीश्वरोभगवांस्त्वमेवसाक्षादिति।।तयो
रैक्यमभिप्रेत्यैकवचनं।।किंच।।धारणपोषणकर्त्तापित्वमेवेत्याह।।एतदिति।।हेआत्मन्प्राणःक्रियाशक्तिःजीवोज्ञानशक्तिःस्व
मनत्वमेवबिभर्षि।।५।। ।। ।। ।। ।।श्रीगोपीजनवल्लभायनमोनमः।।

श्री० भा० द० ९० ८७

अपि च नश्वरेषु नाशशीलेषु इह एतेषु भावेषु यदनश्वरमवशिष्यमाणं रूपं तत्त्वमसि। द्रव्यविकारेषु मृत्सुवर्णादिकार्येषु घटकुंडलादिषु नश्वरेषु द्रव्यमात्रमनश्वरं यथा तद्वत्॥ २॥ ननु त्रिगुणात्मककार्यरूपोऽपि त्वमित्युक्तत्वात्कथमनश्वरत्वं तत्राह॥ न हि त्तयस्तत्परिणामाश्च महदादयः अद्यासाद्यात्त्वयि परे ब्रह्मणि कल्पिताः न स्मान्न संति॥ ३॥ ननु असत्तां कथं प्रतीतिरत आह॥ यर्हीति॥ यदा विकल्पितास्तदैव प्रतीतिमात्रेण त्वयि संति॥ त्वं चामीषु तदेव कारणतया अनुगतः॥

उत्तरे द्वे पद्ये ॥ तो न संतिर ॥ नश्वरेषु ॥ दैं प्रपंचां ॥ अनश्वरं ॥ देहाभिमानेन ॥ कृतैः कर्मभिः ॥ गुणप्रवाहलक्षणमहदादयः

नश्वरेष्विह भावेषु तदस्ति त्वमनश्वरं॥ यथा द्रव्यविकारेषु द्रव्यमात्रं निरूपितं॥ ३॥ सत्वं रजस्तम इति गुणास्तद्वृत्तयश्च याः॥ त्वय्यद्धा ब्रह्मणि परे कल्पिता योगमायया॥ ४॥ तस्मान्न संत्यमी भावा यर्हि त्वय्येव कल्पिताः॥ त्वं चामीषु विकारेषु ह्यन्यदा व्यावहारिकः॥ ५॥ गुणप्रवाह एतस्मिन्नबुधास्त्वखिलात्मनः॥ गतिं सूक्ष्मामबोधेन संसरंतीह कर्मभिः॥ ६॥ यदृच्छया नृतां प्राप्य सुकल्पामिह दुर्लभां॥ स्वार्थे प्रमत्तस्य वयो गतं त्वन्मायये श्वर॥ ७॥ असावहं ममैवैते देहे चास्यान्वयादिषु॥ स्नेहपाशैर्निबध्नाति भवान्सर्वमिदं जगत्॥ ८॥ स्या ॥ ॥ भ्राता र॥ श्रीगोपीजनवल्लभाय नमो नमः॥ ॥

देहस्य पुत्रादिषु

अन्यदा तु अव्यावहारिकोऽविकल्पः सत्वमेवावशिष्यसे इत्यर्थः॥ ४॥ एवं रूपत्वाज्ज्ञाननिबंधनश्च संसार इत्याह॥ गुणप्रवाह इति॥ सूक्ष्मां तिः प्रपंचां गतिं मबुधाः अविद्वांसः॥ अबुध्येति वा पाठः॥ अबोधेन देहाभिमानेन कृतैः कर्मभिः संसरंतीति॥ ५॥ एवं त्वं योऽस्त्वं निरूप्य तदप्राप्त्या शोचति॥ यदृच्छयेति॥ नृतां मनुष्यतां सुकल्पां पटुतरेंद्रियां॥ ६॥ अहो किमिति भ्रमतोऽसि त्वया बद्धभिः पाशैर्निबद्धत्वादित्याह॥ असावहमिति॥ देहे अस्य देहस्यान्वयादिषु पुत्रादिषु बद्धमेव इति॥ ८॥ ॥ श्रीकृष्ण ८७

त्र्यर्थतो
पारं तं त्वमेव प्रपंचयति पंचभिः॥ चंद्रस्य कांतिः अग्नेस्तेजः अर्कस्य प्रभाः कृत्स्नाविद्युतां॥ सत्तास्फुरणमात्रेण सत्वं॥ तमेव भांतमनुभाति सर्वं तस्य
वस्तुतो भवान्॥ तथा च श्रुतिः॥ न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः॥ तमेव भांतमनुभाति सर्वं तस्य
भासा सर्वमिदं विभातीति स्मृतिश्च॥ यदादित्यगतं तेजो जगद्भासयतेखिलं॥ यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं
॥ ७॥ किंच॥ हे देव अपां तर्पणं तृप्तिजनकत्वं भूमेर्धृतिः धारणत्वेन वर्तनं गंधश्च भवानेव तत्तेवशक्तिरित्यर्थः॥ ७॥ किंच॥ वायोरोजः सहादिति वैवशक्तिः॥ ८॥ दिशामुपाधिकृतावकाशप्रदे
प्राणनं जीवनहेतुत्वं ता आपश्च ता सां रसश्च त्वमेव॥ किंच॥
कान्तिस्तेजः भूमा सत्ता चंद्राग्न्यर्कविद्युतां॥ यत्स्थैर्यं भूभृतां भूमेर्वृत्तिर्गंधो गुणो भवान्॥ ७॥ तर्पणं प्राणनमपां
देव त्वं ताश्च तद्रसः॥ ओजः सहो बलं चेष्टा गतिर्वायोस्तवेश्वर॥ ८॥ दिशां त्वमवकाशोसि दिशः खं स्फोट आश्रयः॥
नादो वर्णस्त्वमोंकार आकृतीनां पृथक्कृतिः॥ ९॥ इंद्रियं त्विंद्रियाणां त्वं देवाश्च तदनुग्रहः॥ अवबोधो भवान् बुद्धे
र्जीवस्यानुस्मृतिः सती॥ १०॥ भूतानामसि भूतादिरिंद्रियाणां च तैजसः॥ वैकारिको विकल्पानां प्रधानमनुशायिनां॥ ११॥
॥ ८॥ नादः पश्यंती॥ ओंकारः
नाम अवकाशः॥ दिशश्च खं च सामान्याकारस्तदाश्रयः स्फोटश्च शब्दतन्मात्रं परा वैखर्याख्या वागित्यर्थः॥ नादः पश्यंती॥ ओंकारस्त्वं
मध्यमा॥ वर्णाश्च आकृतीनां पदार्थानां पृथक्कृतिः पृथक्करणं अभिधानं यस्मात्तत्पदं वर्णपदाद्यात्मका वैखरी च त्वं
मित्यर्थः॥ ९॥ इंद्रियाणामिंद्रियं विषयप्रकाशनशक्तिः देवाश्चेंद्रियाधिष्ठातारः॥ तदनुग्रहस्तेषामधिष्ठानशक्तिश्च त्वं
अवबोधावत्सा पुशक्तिः अनुस्मृतिः प्रतिसंधानशक्तिः॥ १०॥ भूतानां कारणं भूतादिस्तामसो हंकारस्त्वमसि॥ इंद्रिया
णां कारणं तैजसाहंकारस्त्वं विविधं अधिदैवाध्यात्मभेदेन कल्पंत इति विकल्पा देवास्तेषां कारणं वैकारिकः सात्विको हं

श्री० भा० द० टी० ९८

नतुनानाविकारवतां कुतो ब्रह्मत्वं तत्राह ॥ ब्रह्मण एव उपाधिधर्मैः बहुधा प्रतीतिरित्यात्मसृष्टैर्गुणैः कृत्वा तत्कृतेषु भूतेषु बहुधा ईयते ॥ पुनश्च यथाशयं यथोपयोगमाविर्भावतिरोभावा [illegible] रूपेण प्रतीयते न वस्तुतः एको बहुधा स्वयंज्योतिः स्वरूपत्वेन नित्यत्वेन निर्गुणत्वेन सगुणत्वेनेत्यादिबहुधात्वं प्रपंचनीयं ॥२५॥ [illegible] यथा खवादिभूतानि तत्कृतेषु घटादिषु

प्रपंचतः ।   गुणैः कृता ।   पुं० ४   गुण । भूतेषु ।   प्राप्नोति ।

आत्मा ह्येकः स्वयंज्योतिर्नित्योऽन्यो निर्गुणो गुणैः ॥ आत्मसृष्टैः [illegible] तत्कृतेषु भूतेषु बहुधेयते ॥२५॥ खं वायुर्ज्योतिरापो भूस्तत्कृतेषु यथाशयं ॥ आविस्तिरोऽल्पभूर्येको नानात्वं यात्यसावपि ॥२६॥ श्रीशुक उवाच ॥ ॥ एवं भगवता राजन्वसुदेव उदाहृतं ॥ श्रुत्वा विनष्टनानाधीस्तूष्णीं प्रीतमना अभूत् ॥२७॥ अथ तत्र कुरुश्रेष्ठ देवकी सर्वदेवता ॥ श्रुत्वानीतं गुरोः पुत्रमात्मजाभ्यां सुविस्मिता ॥२८॥ कृष्णरामौ समाश्राव्य पुत्रान्कंसविहिंसितान् ॥ स्मरंती कृपणं प्राह वैक्लव्यादश्रुलोचना ॥२९॥ देवक्युवाच ॥ ॥ राम रामाप्रमेयात्मन्कृष्ण योगेश्वरेश्वर ॥ वेदाहं वां विश्वसृजामीश्वरावादिपूरुषौ ॥३०॥ कालविध्वस्तसत्वानां राज्ञामुच्छास्त्रवर्तिनां ॥ भूमेर्भारायमाणानामवतीर्णौ किलाद्य मे ॥३१॥ यस्यांशांशांशभागेन विश्वोत्पत्तिलयोदयाः ॥ भवंति किल विश्वात्मंस्तं त्वाद्याहं गतिं गता ॥३२॥ चिरान्मृतसुतादाने गुरुणा किल नोदितौ ॥ आनिन्यथुः

पातने   पितृस्थानाद्गुरवे गुरुदक्षिणां ॥३३॥

आविस्तिरोभावादियांति ॥ एवं असौ आत्मापि आत्मसृष्टैर्गुणैः कृत्वा तत्कृतेषु देहेषु बहुधा ईयते ॥ सा माभाष्य कृपणं यथा भवति तथा प्राह ॥ वां विश्वसृजां ईश्वरौ जानामि ॥ भूमेर्भारायमाणानां राज्ञां निधनार्थं हे आद्य किलावतीर्णौ ॥ श्रीकृष्ण ९८
३१ ॥ हे आद्य यस्यांशः पुरुषस्तस्यांशो माया तस्या अंशाः गुणास्तेषां भागेन लेशेन विश्वोत्पत्त्यादयो भवंति ॥ तं त्वा त्वां गतिं शरणं गतास्मि ॥३२॥ आनिन्यथुः ॥ आनीतवंतौ ॥ पितृस्थानात ॥३३॥ ॥ ॥ ॥

अहो त्वत्पुत्रयोरावयोः। किमिदमारोप्यते इत्यत आह॥ प्रधानपुरुषेश्वरौ युवां साक्षात्तात नः सुतौ न। किंतु भूभारक्षत्रक्षपणे अ
वतीर्णौ॥ तथाहि निश्चितं त्वं आत्थ कथयसि॥८॥ तत्तस्माद्धे तात ते पदारविंदं अरणं गतोस्मि॥ कथंभूतं प्रपन्नानां शरणं गता
नां संसृतिभयं अपहंतीति तथा तत्॥ ननु त्वमेति सुखी त्वया किं निर्विद्यसे इत्यत आह॥ एतावतेति॥ इंद्रियलालसेन इंद्रि
यार्थतृष्णया यावता इंद्रियलालसेन मर्त्ये शरीरे आत्महंकृत्यात्मेति बुद्धिः। त्वयि च परे परमेश्वरे अपत्यबुद्धिरस्मि॥ तेनो
लं पर्याप्तमिति॥१९॥ ननु कुत एतत्। अहं परमेश्वर इति तत्राह॥ सूतीगृह ननु युगं प्रतियुगं नौ आवयोः यदा चक्षुषपो शरणं१

अवतीर्णः ॥इंद्रियार्थलंपटार कथयसि॥

युवां न नः सुतौ साक्षात्प्रधानपुरुषेश्वरौ॥ भूभारक्षत्रक्षपण अवतीर्णौ तथात्थ ह॥१९॥ तत्ते गतोस्म्यरणमद्यप
आवयोः२ दारविंदमापन्नसंसृतिभयापहमार्त्तबंधो॥ एतावतालमलमिंद्रियलालसेन मर्त्यात्मदृक्त्वयि परे यदपत्यबु
द्धिः॥२०॥ सूतीगृहे ननु जगाद भवानजो नौ संजज्ञ इत्यनुयुगं निजधर्मगुप्त्यै॥ नानातनूर्गगनवद्विदधज्जहासि सम्यग्मन्महे
सर्वगतस्य ति को वेद भूम्न उरुगाय विभूमायां॥२१॥ श्रीशुक उवाच॥ ॥आकर्ण्येत्थं पितुर्वाक्यं भगवान्सात्वतर्षभः॥ प्रत्याह श्रीमान्२
अविभक्तेन२ प्रश्रयानम्रः॥ प्रहसन् श्लक्ष्णया गिरा॥२२॥ ॥श्रीभगवानुवाच॥ ॥वचो वः समवेतार्थं तातैतदुपमन्महे। यन्नः पु ब्रह्मत्वेन विवाचनीयाः१
विषयीकृत्य१ त्रान्समुद्दिश्य तत्वग्राम उदाहृतः॥२३॥ अहं यूयमसावार्य इमे च द्वारकौकसः॥ सर्वेप्येवं यदुश्रेष्ठ विमृश्याः सचराचरं॥२४॥ एवं जगदपि ब्रह्मत्वेन किंचायमि१

समर्थः१ रामः द्वारकास्थाः१

द्विति श्वेति युग्मं अधुना च वसुदेवो देवकी च युग्मं एवं हि प्रतियुगं अज एव अहं संजज्ञे अवतीर्ण इति भवान् नु जगाद नु
नामा चतुर्भुजो देव इति तत्राह॥ नानातनूरिति गगनवदसंग एव त्वां भूम्नः सर्वगतस्याविभक्तस्य निरूपां मायां को वेद॥२२॥
उपमन्महे उपमन्यामहे॥२१॥ समुद्दिश्य विषयीकृत्य॥ तत्वग्रामः तत्वसमूहः। उदाहृतः सम्यक् निरूपितः। इमामेव दृष्टिं
सर्वत्र विधत्स्वेत्याह॥ अहमिति॥ एवं विमृश्याः ब्रह्मत्वेन वाच्या यूयमीयाः किं वा सचराचरं जगदपि॥२३॥ ॥ ॥ ॥

श्री० कृ० दं० उ० ९८

उद्धवैरेण याभक्तिः तया ॥ केचनेति ॥ चैद्यादयः कामतो भक्त्या गोप्यः संनिकृष्टाः तदात्मतां प्राप्ताः ॥ तथा सत्वसंरब्धाः सत्व
विद्या अपि सुरादयो न संनिकृष्टा इति ॥ ननु सात्विकेभ्योपि राजसादयः संनिकृष्टा इति चित्रमित्याह ॥ ४३ ॥ इदमित्यमेवे
ति स्वयं पतत्कृत्स्यमिति विशेषोक्तम् ॥ तदेवं यद्यपि वैरभावेनापि तत्प्राप्तिर्भवेत् तथापि मां सात्विकं कुर्विति प्रार्थयते ॥ ४४
ननु यानः प्रसीद यथा निरपेक्षै रात्तकामैरपि विमृग्यं युष्मत्पादारविंदं तदेव धिषणा माश्रयतु तस्मादन्यद्युज्यते तदेवांधकूप

ददनीत्यस्य ... २ सत्त्वसंरब्धाः २ ... इदमीत्त्वं विधि ... इत्यमेवेति योगीनो पि न जानंति २ मोक्षं २ सन्निकृष्टाः १ गोप्यः

विशुद्धसत्वधाम्न्यद्धा त्वयि शास्त्रशरीरिणि ॥ नित्यं निबद्धवैरास्ते वयं चान्ये च तादृशाः ॥ ४३ ॥ केचनोद्धवैरेण भक्त्या केचन
कामतः ॥ न तथा सत्वसंरब्धाः सन्निकृष्टाः सुरादयः ॥ ४४ ॥ इदमित्थमिति प्रायस्तव योगेश्वरेश्वर ॥ न विदंत्यपि योगेशा यो
गमायां कुतो वयं ॥ ४५ ॥ तन्नः प्रसीद निरपेक्षविमृग्ययुष्मत्पादारविंदधिषणान्यगृहांधकूपात् ॥ निष्क्रम्य विश्वशरणां
घ्र्युपलब्धवृत्तिः शांतो यथैक उत सर्वसखैश्चरामि ॥ साधयस्मान्नृदुष्पारितयेशनि पापान् कुरु नः प्रभो ॥ पुमान् यच्छ्रद्धया

वैरानेः १ वा १ साधुभिः १ देवीवेश २ तिष्ठन्नेोदनायाविमुच्यते ॥ ४७ ॥

तस्मान्निःक्रम्य निर्गत्य विश्वस्य शरणं रक्षिता रोहंत्या तेषामंघ्रिपुरस्त्वत एवगलितैः फलादिभिरुपलब्धा प्राप्ता वृत्तिर्जीवि
का येन सोहं शांतः सन् एक एव चरामि उत अथवा सर्वेषां सखायो ये महांतस्तैः सह यथा चरामीति ॥ कथमल्पपुण्यानामी
दृग्भावः संभवतीति चेत् तर्हि पत्ते तद्रुवे तथास्माननुशिक्षयस्वाह ॥ शाधीति ॥ हेप्रभो ईशितव्याः महद्वीजीवास्तेषामीश
यत्तवानुशासनं श्रातिष्ठन् आश्रयन् चोदनाया विधिनिषेधलक्षणया संकाशाद्विमुच्यते ॥ न खलु लब्धभक्तो विधिकिंकरः
स्यादिति भावः ॥ ४७ ॥

॥ शाधीति ॥ हे सर्वजीवेश ॥ सर्वजीवा विधिनिषेधयोः प्रवृत्ता ॥ विधिनिषेधयोर्भेदः स्वमतदृश्यते ॥ विधिनिषेध
रहितो निष्पापो भवति ॥ अतो स्मान् तथोपदिश यथाश्रयोंतवपादारविंदमाश्रयन्नहं विधिनिषेधतो निष्क्रांतो न वेदमीति ॥ १ ॥ तथापि अन्तकृष्ण: २
धानेचेकाते चमरव संभवतीति भावः ॥ २१ तवाज्ञा

दत्तैः ३ चैत्यादयः १ उद्धव ३ विधिनिषेधतः ३ वने फलादिभिः ४ सल्पपुण्यानां ३ श्रीकृष्ण ९९

भ्राधः स्वपत्नेः जीवनं यस्य ॥ कल्पपुण्यं ३ भक्तु

दैत्यराड्वलिः कथंभूतौ विश्वस्यात्मभूतं दैवं ॥ सान्वयः सपरिवारः सहृदः सपरिजनः ॥ पादौ प्रक्षाल्य मूर्ध्ना दधार ॥ कथं
भूतौ पादौ । यदंबु ययोरवनेजनोदकं आब्रह्म ब्रह्माणमभिव्याप्य जगत्पुनाति विचित्रपदश्चर्त्तते तौ ॥ ३६ ॥ स बलिः आत्मादिविभवै
स्तौ समर्हयामास ॥ ३७ ॥ इंद्रसेनो बलिः प्रेमविभिन्नया प्रेमार्द्रया धिया बिभ्रन्धारयन् गद्गदाक्षरं यथा तथा प्रेम्णा जग

प्रह्लाद्य कंस१ सुतले२ माली शुकः१ बलिः२

तथा मे कुरु तां कामं युवां योगेश्वरेश्वरौ ॥ भोजराजहतान् पुत्रान् कामये द्रष्टुमागतान् ॥ ३४ ॥ श्रीशुक उवाच ॥ ॥ एवं संचोदितौ
मात्रा रामः कृष्णश्च भारत ॥ सुतलं विविशतुर्योगमायामुपाश्रितौ ॥ ३५ ॥ तस्मिन्प्रविष्टावुपलभ्य दैत्यराट् विश्वात्मदैवं सुत
रां तथात्मनः ॥ तद्दर्शनाह्लादपरिप्लुताशयः सद्यः समुत्थाय ननाम सान्वयः ॥ ३६ ॥ तयोः समानीय वरासनं मुदा निविष्टयो
स्तत्र महात्मनोस्तयोः ॥ दधार पादाववनिज्य तज्जलं सवृंद आब्रह्म पुनद्यदंबु ह ॥ ३७ ॥ समर्हयामास स तौ विभूतिभिर्महा
र्हवस्त्राभरणानुलेपनैः ॥ तांबूलदीपामृतभक्षणादिभिः स्वगोत्रवित्तात्मसमर्पणेन च ॥ ३८ ॥ स इंद्रसेनो भगवत्पदांबुजं
बिभ्रन्मुहुः प्रेमविभिन्नया धिया ॥ उवाच हानंदजलाकुलेक्षणः प्रहृष्टरोमा नृप गद्गदाक्षरः ॥ ३९ ॥ बलिरुवाच ॥ नमोऽनंता
य बृहते नमः कृष्णाय वेधसे ॥ सांख्ययोगवितानाय ब्रह्मणे परमात्मने ॥ ४० ॥ दर्शनं वां हि भूतानां दुःप्रापं चाप्यदुर्लभं ॥ रजस्त
मःस्वभावानां यन्नः प्राप्तौ यदृच्छया ॥ दैत्यदानवगंधर्वाः सिद्धविद्याध्रचारणाः ॥ यक्षरक्षःपिशाचाश्च भूतप्रमथनायकाः ॥ ४२ ॥

कार्ह्या

बलिः५

तेः१ तेवे

पुवपोः२

ह्या ॥ ३८ ॥ अनंताय शेषाय बृहते फणैकदेशे जगद्धारणात् तद्बृहत्तस्मै कृष्णाय वेधसे जगद्विधात्रे सांख्ययोगवितानायेत्यादि च
दत्र समैक्यविवक्षया ॥ योगेश्वराणामपि दुर्दर्शौ युवां अस्माभिर्दृष्टौ विस्मेतत्र चित्रमित्याह ॥ ३९ ॥ दर्शनमिति दुःप्रापमपि यु
ष्मत्कृपया केषांचिद्दुर्लभं सुलभमपि भवतीति तदाह ॥ रजस्तमःस्वभावानामिति नो दर्शनं प्राप्तौ ॥ अहो विधिविरोधं सात्त्विकभक्तेभ्योऽपि

श्री० भा० द० उ० १००

मृतानामागमनंनिर्गमंचश्रीकृष्णस्यमायांमेने॥ तेनैवापत्यादिरूपेण रचितं॥ अमृतंकीर्तिर्यस्यतस्यव्याससुतैरितिवक्तुव
चनंपूज्यार्थंजगतःअघंभिनत्तीतितथातत्॥ खलंनिःशेषंयथाभवतितथा॥ नन्वहो आदिवदितितदेवंमोक्षहेतुत्वंपापस्य
यहेतुत्वंचोक्तं॥ तद्भक्तानांतुसत्कर्णपूरंपरमसुखावहं॥ कर्णाभरणमितिस्वयंसुखरूपतामाह॥ किंचभगवतिकृतम
वशितंचित्तंयेनसततथाभूत्वातस्यक्षेमंधामकालादिभयरहितलोकंयातीति॥ ॥इतिदशमेपंचाशीतितमः॥ ॥

सुखवकं २३ रचितं १

तं हस्वादेवकीदेवीमृतानांगमननिर्गमं॥ मेनेसुविस्मितामायांकृष्णस्यचरितांनृप॥५८॥ एवंविधान्यद्भुतानिकृष्णस्य
परमात्मनः॥ वीर्याण्यनंतवीर्यस्यसंत्यनंतानिभारत॥ सूतउवाच॥ ॥य इदमनुशृणोतिश्रावयेद्वामुरारेश्चरित
ममृतकीर्तेर्वर्णितंव्याससुत्रैः॥ जगदघभिदलंतद्भक्तसत्कर्णपूरंभगवतिकृतचित्तोयातितत्क्षेमधाम॥ ॥इतिश्री
भागवतेमहापुराणेदशमस्कंधेमृताग्रजानयनंनामपंचाशीतितमोध्यायः॥ ॥राजोवाच॥ ॥ब्रह्मन्वेदितुमिच्छा
मःस्वसारंरामकृष्णयोः॥ यथोपयेमेविजयोयाममासीत्पितामही॥१॥ ॥श्रीशुकउवाच॥ ॥अर्जुनस्तीर्थयात्रा
यांपर्यटन्नवनींप्रभुः॥ गतःप्रभासमशृणोन्मातुलेयींसआत्मनः॥२॥ दुर्योधनायरामस्तांदास्यतीतिनचापरे॥ तल्ल
द्सुःसयतिर्भूत्वात्रिदंडीद्वारकामगात्॥३॥ ॥

षडशीतितमेदंभात्सुभद्रामर्जुनोहरत्॥ गत्वाचमिथिलांकृष्णोनृपविप्रावनंदयत्॥ पित्रोःस्वज्ञानमादिश्यसुभद्रांफल्गुनाय
च॥ जगाममिथिलांकृष्णःस्वभक्तप्रियकृत्ततः॥ ॥देवकयामृतपुत्रलाभवत्॥ अर्जुनस्यसुभद्रालाभोपिरामभ्रातिकूल्यात्॥ दुर्ध
इतिमन्यमानःप्रसंगात्पृच्छति॥ ब्रह्मन्निति॥ कथमपहरणात्॥ दुर्योधनायेति अपरेवसुदेवादयोनदास्यंतीति॥ तल्लिप्सुः

मो॰ स्मरः १

तद्वृत्तं सर्व्वं मेनुयोद्यं स्वागमनकारणं सप्रपंचं कथयति॥ आसन्निति पंचभिः॥ ऊर्णायां भार्यायां प्रथमेंतरे स्वायंभुव
मन्वंतरे॥ ते देवाः सुतां वाचं जभितुं जग्मुर्मैथुनेन रमयितुमुद्यतं उद्धतं प्रजापतिं जहसुः उपहसितवंतः॥ तेनावद्यकर्म्म
णा पापेन आसुरीं योनिमगन्॥ अधुना तत्त्वं हिरण्यकशिपोर्जाता इत्यर्थः॥ ते च योगमायया ततो नीताः संतो देव

तन्नामेव २ वैध २ बलिना ५ रामकृष्णौ ५ पतंगः मरीचिपुत्राः २ प्रमाणः १ उपकं सन्नको वे न२=

श्रीभगवानुवाच॥ ॥ आसीन्मरीचेः षट्पुत्रा ऊर्णायां प्रथमेंतरे॥ देवाः कं जहसुर्वीक्ष्य सुतां जभितुमुद्यतं॥ ४८॥ तेनासु
रीमगन्योनिमधुनावद्यकर्म्मणा॥ हिरण्यकशिपोर्जातानीतास्ते योगमायया॥ ४९॥ देवक्या उदरे जाता राजन् कंस
विहिंसिताः॥ स तान् शोचत्यात्मजान्स्वांस्त इमेध्यासतेंतिके॥ ५०॥ इत एतान्प्रणेष्यामो मातृशोकापनुत्तये॥ ततः शा
पाद्विनिर्मुक्ता लोकं यास्यंति विज्वराः॥ ५१॥ स्मरोद्गीथः परिष्वंगः पतंगः क्षुद्रभृद्घृणी॥ षडिमे मत्प्रसादेन पुनर्यास्यंति सद्ग
५२ तिं॥ इत्युक्त्वा तान्समादाय इंद्रसेनेन पूजितौ॥ पुनर्द्वारवतीमेत्य मातुः पुत्रानयच्छतां॥ ५३॥ तान्दृष्ट्वा बालकान्देवी पुत्र
स्नेहस्नुतस्तनी॥ परिष्वज्यांकमारोप्य मूर्ध्न्यजिघ्रदभीक्ष्णशः॥ ५४॥ अपाययत्स्तनं प्रीता सुतस्पर्शपरिस्नुतं॥ मोहि
ता मायया विष्णोर्यया सृष्टिः प्रवर्त्तते॥ ५५॥ पीत्वामृतं पयस्तस्याः पीतशेषं गदाभृतः॥ नारायणांगसंस्पर्शप्रतिलब्धात्मद
र्शनाः॥ ५६॥ तेन मस्कृत्य गोविंदं देवकीं पितरं बलं॥ मिषतां सर्व्वभूतानां ययुर्धाम दिवौकसां॥ ५७॥ ॥ ॥

क्या उदरे जाताः हे राजन् नतेच कंसेन विहिंसिताः॥ माचतानात्मजान्मत्वा शोचति॥ ते चेमे तव अंतिके अध्यासते॥ लोकं देव
लोकं॥ स्मरोद्गीथः स्मरसहितउद्गीथः॥ सजातिं माह्यंस्मरस्यैव पूर्व्वकीर्त्तिमानिति नाम॥ अतः कीर्त्तिमंतं प्रथमजं कंसापा
नकदुंदुभिरर्पयामासेत्युक्तं॥ अयच्छतां॥ अर्पयामासतुः॥ अन्ततत्वे तु तः॥ गदाभृतः पीतशेषमिति नारायणांगसंस्प

देवकी २
प्रमाणः
मो॰ कं॰ ४

श्री० भा० द० उ० १०१

मिथिलस्य जनकस्य वंश्यो मैथिलः ॥ १६ ॥ श्रुतदेवश्च यं विदेहान्नृदेशान् प्रययौ ॥ कृष्णो व्यासः रामो भार्गवः अहं शुकः एवमादि
भिः सह ॥ १७ ॥ आनर्त्ताद्यस्मिन्नास्ते दृश्यवर्त्तिनो नृनार्यः ॥ उदारहासां स्निग्धमीक्षणं यस्मिन् तत् वक्त्रं दृशिभिर्नेत्रैः ॥ २० ॥ स्वरी

देशान् २ — देशाः २७ः॥ — द्विजवर्यौ — द्विजरूपको ॥

तयोः प्रसन्नो भगवान् दारुकेणाहृतं रथं ॥ आरुह्य साकं मुनिभिर्विदेहान् प्रययौ प्रभुः ॥ १७ ॥ नारदो वामदेवोऽत्रिः कृष्णो रामोऽसितोऽरुणिः ॥ अहं बृहस्पतिः कण्वो
मैत्रेयश्च्यवनादयः ॥ १८ ॥ तत्र तत्र तमायान्तं पौरा जानपदा नृपाः ॥ उपतस्थुः सार्घहस्ता ग्रहैः सूर्यमिवोदितं ॥ १९ ॥ आनर्त्तधन्व
कुरुजाङ्गलकङ्कमत्स्यपाञ्चालकुन्तिमधुकेकयकोशलार्णाः ॥ अन्ये च तन्मुखसरोजमुदारहासस्निग्धेक्षणं नृप पपुर्दृशिभिर्नृना
र्यः ॥ २० ॥ तेभ्यः स्ववीक्षणविनष्टतमिस्रदृग्भ्यः क्षेमं त्रिलोकगुरुरर्थदृशं च यच्छन् ॥ शृण्वन् दिगन्तधवलं स्वयशोऽशुभघ्नं गीतं दशाने

देशान ३

नृभिरगाच्छनकैर्विदेहान् ॥ २१ ॥ तेऽच्युतं प्राप्तमाकर्ण्य पौरा जानपदा नृप ॥ अभीयुर्मुदितास्तस्मै गृहीतार्हणपाणयः ॥ २२ ॥ दृष्ट्वा
तमुत्तमश्लोकं प्रीत्युत्फुल्लाननाशयाः ॥ कैर्धृताञ्जलिभिर्नेमुः श्रुतपूर्वांस्तथा मुनीन् ॥ २३ ॥ स्वानुग्रहाय संप्राप्तं मन्वानौ तं जगद्गु
रुं ॥ मैथिलः श्रुतदेवश्च पादयोः पेततुः प्रभोः ॥ २४ ॥ निमन्त्रयेतां दाशार्हमातिथ्येन सह द्विजैः ॥ मैथिलः श्रुतदेवश्च युगपत्संहताञ्जली ॥ २५ ॥

मैथिलश्रुतदेवौ — कृष्णं

क्षणेनैव विनष्टतमिस्राः दृग्यो येषां तेभ्यः क्षेमं अभयं ॥ अर्थदृशं तत्वज्ञानं च ॥ २१ ॥ अभीयुः प्रत्युज्जग्मुः ॥ २२ ॥ प्रीत्या उत्फुल्लानि
आननानि आशयाः अन्तःकरणानि च येषां ते कैः शिरोभिः ॥ २३ ॥ ॥ ॥ ॥ ॥ ॥

श्रीकृष्ण १०१

अर्जुने २

स्वार्थसाधकः कन्यां प्रेप्सुः ॥४॥ तमातिथ्येन निमंत्र्य गृहमानीय बलेन पद्मं दयोपहृतं परिविष्टं तेजस्वी सां किलार्जुनो बुभुजे स्मृप्
चयः ॥५॥ भावेन रत्नमभिप्रायेण क्षुभितं मनो दधौ ॥६॥ व्रीडितापांगी सव्रीडकटाक्षा तस्मिन्नेव न्यस्तहृदयमीक्षणं ययास्ता ॥
७॥ तदंतरं हर्तुमवसरं प्रेप्सुः प्राप्तुमिच्छुः ॥ कामेन भ्रमच्चित्तं यस्य सः ॥ शरामादिसमानि मित्रं सुखं वा ॥८॥९॥ आसमंताद्धुधतः

श्री हरे २ | प्रवृद्धकामः कांतिपूतः प्रसन्नोबलभवर | अर्जुनः सेवितः | अतिशयेन प्रवृत्तः | श्री वीराणां २ संबोधने वा २ | अर्जुनः २ | अर्जुनः १

शरकाद्यां परिविष्टे २ | तत्रैव वार्षिकान्मासान्मवात्सीत्स्वार्थसाधकः ॥ पौरैः संभाजितोऽभीक्ष्णं बलेनाजानता यतिः ॥४॥ एकदा गृहमानीय आति | सुभद्रायां २
थ्येन निमंत्र्य तं श्रद्धयोपहृतं भैक्ष्यं बलेन बुभुजे किल ॥५॥ सोऽपश्यत्तत्र महतीं कन्यां वीरमनोहराम् ॥ प्रीत्युत्फुल्लेक्षणस्तस्यां भाव
स्मरणवसरं ४ | क्षुब्धं मनो दधे ॥६॥ सापि तं चकमे वीक्ष्य नारीणां हृदयंगमम् ॥ हसंती व्रीडितापांगी तन्न्यस्तहृदयेक्षणा ॥७॥ तां परं समनुध्याय | अतिशयेन
देवकीवसुदेवयो | न्नंतरं प्रेप्सुरर्जुनः ॥ न लेभे शं भ्रमच्चित्तः कामेनातिबलीयसा ॥८॥ महत्यां देवयात्रायां रथस्थां दुर्गनिर्गताम् ॥ जहारानुम
तः पित्रोः कृष्णस्य च महारथः ॥९॥ रथस्थो धनुरादाय शूरांश्चारुंधतो भटान् ॥ विद्राव्य क्रोशतां स्वानां स्वभागं मृगराडिव ॥
बलचन्द्रः ४ | १०॥ तच्छ्रुत्वा क्षुभितो रामः पर्वणीव महार्णवः ॥ गृहीतपादः कृष्णेन सुहृद्भिश्चान्वशाम्यत ॥११॥ प्राहिणोत्पारिबर्हाणि वरवध्वो
दर्शितमोते ४ | र्मुदा बलः ॥ महाधनोपस्करेभरथाश्वनरयोषितः ॥१२॥ ॥श्रीशुक उवाच॥ ॥कृष्णस्यासीद्द्विजश्रेष्ठः श्रुतदेव इति श्रुतः ॥
॥कृष्णैकभक्त्या पूर्णार्थः शांतः कविरलंपटः ॥१३॥ स उवास विदेहेषु मिथिलायां गृहाश्रमी ॥ अनीहयागताहार्यनिर्वर्त्तित
निजक्रियः ॥१४॥ यात्रामात्रं त्वहरहर्दैवादुपनमत्युत ॥ नाधिकं तावता तुष्टः क्रियाश्चक्रे यथोचिताः ॥१५॥ ॥ ॥

उपनमति

आवरणं कुर्वतः ॥१०॥ पारिबर्हाणि वरवध्वोः प्रीतिदेयानि ॥ अनीहया अनुद्यमेनैवागतं यदाहार्यं भोज्यं तेन निवर्त्तितानि नि | विराजितः १
जाः क्रियाः येन सः ॥१४॥ यात्रामात्रं शरीरादिनिर्वाहमात्रं भोज्यं उपनयति तं प्रत्यागच्छति ॥१५॥ ॥ ॥ ॥

॥निवासस्यात्मने गा कृतैरे भूसुरैश्च मूर्त्तिर्निवसतीति भावः॥३॥

सर्वतीर्थस्यास्पदानि पादरेणवो येषां॥४

श्री० भा० द० ३० १०२

धन्वन् परिश्रमयन्॥३७॥ अवनिजे प्रक्षालितवान्॥३८॥४०॥ फलैरामलकादिभिरर्हणेन॥ उशीरैस्तृणविशेषमूलैः सुवा-
सितैः शिवाम्भैः शिवैः रमृतवत्स्वादुभिरंबुभिः सुरभ्या मृदा कस्तूरीप्रमुखया॥ सपर्यया पूजया॥ यथोपपन्नया अनायासेन
संपन्नया॥ भूतावपुष्टवलबुद्धत्वात्सत्वविवर्द्धनं यदंधः अन्नं तेन च॥४१॥ अस्य कृष्णस्यात्मा मूर्त्तिस्तस्या निकेतैर्भूसुरैश्च सर्वती-
र्थास्पदपादरेणुभिः कृष्णादिभिर्यः संगमः सममकुतोन्वभूदिति॥ अन्विति स्मये॥ यद्वा॥ अ इति वितर्के॥ नु इति विस्मये॥

श्रुतदेवोच्युतं प्राप्तं स्वगृहान्जनको यथा॥ नत्वा मुनीन्सुसंहृष्टो धुन्वन्वासो ननर्त ह॥३८॥ तृणपीठबृसीष्वेतानानीतानु-
पवेश्य सः॥ स्वागतेनाभिनंद्यांघ्रीन्सभार्योवनिजे मुदा॥३९॥ तदंभसा महाभाग आत्मानं सगृहान्वयं॥ स्नापयांचक्र उद्धर्षो
लब्धसर्वमनोरथः॥४०॥ फलार्हणोशीरशिवामृतांभसा मृदा सुरभ्या तुलसीकुशांबुजैः॥ आराधयामास यथोपपन्न-
या सपर्यया सत्वविवर्द्धनांधसा॥४१॥ स तर्कयामास कुतो ममान्वभूद्गृहांधकूपे पतितस्य संगमः॥ यः सर्वतीर्थास्पदपा-
दरेणुभिः कृष्णेन चास्यात्मनिकेतभूसुरैः॥४२॥ सूपविष्टान्कृतातिथ्यान्श्रुतदेव उपस्थितः॥ सभार्यस्वजनापत्य
उवाचांघ्र्यभिमर्शनः॥४३॥ ॥श्रीशुक उवाच॥ ॥नाद्य नो दर्शनं प्राप्तः परं परमपूरुषः॥ यर्हीदं शक्तिभिः सृष्ट्वा प्रविष्टो
ह्यात्मसत्तया॥४४॥ ॥

४२॥ उपस्थितः समीपउपविष्टः भार्याः भर्त्यः स्वजना अपत्यानि च तैः सहितः श्रीकृष्णस्यांघ्रिमभिमृशति संमर्दय-
ती संघ्राभिमर्शनः॥४३॥ यर्हीदं प्रविष्टस्तदैव दर्शनं प्राप्त इति सा एव स्मात्रो द्यतनी भूतस्त्वमित्यर्थः॥ यद्वा नः॥ अस्मान्
प्रत्यैव प्राप्त इति न॥ किंतु तदैव प्राप्तः यर्हीदं विश्वं स्वशक्तिभिः सत्वादिभिः सृष्ट्वा स्वसत्तयानुप्रविष्टस्त्वं॥ दर्शनं तु प-

॥परमपुरुषो नारायणोस्माकमद्यैव न दर्शनं प्राप्तः॥ किंतु यदेदं जगत्सृष्ट्वा प्रविष्टस्तदैव
... स्माकं दर्शनं प्राप्तः॥ ननु तर्हि तद्दर्शनं सर्वेषां सुलभं
स्यात्॥ ... इति॥२॥

॥यदात्थेति॥ हे भगवन् एकांतभक्तान् त्वं यद्वचो ब्रवीति॥ यत् किमा मम यथा भक्ताः प्रियेस यथा संवं धीस्त्री स्रुत अनप्रियः॥ तत्त्व वचः सत्यं कर्तुं भवान् अस्मद्
दृग्गोचरो जातइत्यर्थः॥६॥ ॥

अस्तु मेः२

श्रा१२

तदभिप्रेत्य अंशीकृत्य॥ ततद्वा उभाभ्यामपि ताभ्यां मत्कृतादन्यस्य गेहं यातीत्यलक्षितः अविदितः पद्यः॥ उभाभ्यां रूपाभ्यां त
दलक्षितः ताभ्यामलक्षितइति॥२६॥२७ उद्धर्ष उद्गतहर्षं हृदयं यस्य अस्रैराविलेक्षिते ईक्षणे यस्य सएव सव॥२८॥ ईश्वरा
न् ईश्वरं ईश्वरतुल्यांश्चेत्यर्थः॥२९॥ प्रीणन् प्रीणयन् संस्पृशन् संमर्दयन्॥३०॥ आत्मा चेतयिता साक्षी प्रकाशकः स्वदृक्

भक्तप्रियो माधवइति५ २३:१

भगवांस्तदभिप्रेत्य द्वयोः प्रियचिकीर्षया॥ उभयोराविशद्गेहमुभाभ्यां तदलक्षितः॥२६॥ श्रोतुमप्यसतां दूराज्जनकः स्वगृहा
गतान्॥ आनीतेष्वासनाग्र्येषु सुखासीनान् महात्मनः॥२७॥ प्रवृद्धभक्त्या उद्धर्षहृदयोस्राविलेक्षणः॥ नत्वा तदंघ्रीन्प्र २९
क्षाल्य तदपो लोकपावनीः॥२८॥ सकुटुंबो वहन्मूर्ध्ना पूजयांचक्र ईश्वरान्॥ गंधमाल्यांबराकल्पधूपदीपार्घ्यगोवृषैः॥ वा
चा मधुरया प्रीणन्निदमाहान्नतर्पितान्॥ पादावंकगतौ विष्णोः संस्पृशञ्छनकैर्मुदा॥३०॥ श्रीराजोवाच॥ ॥भवान् हि सतेः५
ब्रवीवि६ सर्वभूतानामात्मा साक्षी स्वदृग्विभो॥ अथ नस्त्वत्पदांभोजं स्मरतां दर्शनं गतः॥३१॥ स्ववचस्तदृतं कर्तुमस्मद्दृग्गोच भक्तानांमसरूपः
रो भवान्॥ यदात्थैकांतभक्तान्मे नानंतः श्रीरजः प्रियः॥३२॥ को नु त्वच्चरणांभोजमेवंविद्विसृजेत्पुमान्॥ निःकिंचनानां शां
ज्ञानदा३ स्त्रैसर२ तानां मुनीनां यस्त्वमात्मदः॥३३॥ योवतीर्य यदोर्वंशे नृणां संसरतामिह॥ यशो वितेने तच्छांत्यै त्रैलोक्यवृजिनापहं॥ न ३४
मस्तुभ्यं भगवते कृष्णायाकुंठमेधसे॥ नारायणाय ऋषये सुशांतं तप ईयुषे॥३५॥ दिनानि कतिचिद्भूमन् गृहान्नो निव प्राप्तवते २
१श स द्विजैः॥ समेतः पादरजसा पुनीहीदं निमेः कुलं॥३६॥ इत्युपामंत्रितो राज्ञा भगवांल्लोकभावनः॥ उवास कुर्वन् कल्याणं मिथि लानरयोषितां ३७॥

ग्रत्ता१२ विड्गृतः१ जन्मन्स्तु प्राप्तवता२ त्वीस्तवते२

स्वप्रकाशकः॥ अपश्रुतः कारणात्॥३१॥ अनंतो वंधकररपि अश्रीर्भार्यापि अजः पुत्रोपि॥३२॥३३॥ तच्छांत्यै संसारोपशमाय
॥ गृहान् गृहे इत्यर्थः॥३६॥३७॥

...स्मै वेति॥ ब्राह्मणे वेदरूपः। श्रीकृष्णरूपः। वेदः प्रमाणं। प्रमाणं देवे
ते मेयाः॥ प्रमेयस्य प्रमाणाधीनत्वाद्वेदमयो विप्रो देवमयादस्मत्तोऽपि श्रेष्ठः। अतो विप्रार्चनं मदर्चनादप्यधिकमिति भावः॥५४॥
देवादयः ३ ब्राह्मणाः २ ॥ दुष्प्रज्ञा ... विप्रं ... आत्मानं ... कुर्वंति ५
स एवंभूतः परमेश्वरस्त्वं नोऽस्मान् स्वभृत्यान् शाधि अनुशिक्षय॥४९॥५०॥ अस्मिन्नादरमधिकं ब्राह्मणेषु मंदमिवालक्ष्य
लोकसंग्रहपरो भगवान् मत्तोऽपि ब्राह्मणेषु श्रद्धातिरेकं कुर्विति स्ववृत्तमनुशास्ति ब्रह्मन्नितिसप्तभिः। मयानुदिश्य ये न॥५१॥
देवादिभ्योऽपि ब्राह्मणाः श्रेष्ठा इत्याह। देवा इति। तेऽपि नः पुनंति॥ एते तु सद्य इति। किंच॥ देवादीनि यत्पुनंति तदप्यर्हत्तमान्
मुनयः ३ मत्ते देवे ३
सत्वं शाधि स्वभृत्यान्नः किं देव करवाम ते॥ एतदंतो नृणां क्लेशो यद्भवानक्षिगोचरः॥४९॥ श्रीशुक उवाच॥ ॥तदुक्तमित्यु
पाकर्ण्य भगवान् प्रणतार्तिहा॥ गृहीत्वा पाणिना पाणिं प्रहसंस्तमुवाच ह॥५०॥ श्रीभगवानुवाच॥ ॥ब्रह्मंस्तेऽनुग्रहा
र्थाय संप्राप्तान्विद्ध्यमून्मुनीन्॥ संचरंति मया लोकान्पुनंतः पादरेणुभिः॥५१॥ देवाः क्षेत्राणि तीर्थानि दर्शनस्पर्शनार्च
नैः॥ शनैः पुनंति कालेन तदप्यर्हत्तमेक्षया॥५२॥ ब्राह्मणो जन्मना श्रेयान्सर्वेषां प्राणिनामिह॥ तपसा विद्यया तुष्ट्या किमु
मत्कलया युतः॥५३॥ न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजं॥ सर्ववेदमयो विप्रः सर्वदेवमयो ह्यहं॥५४॥ दुष्प्रज्ञा अविदि
त्वैनमवजानंत्यसूयवः॥ गुरुं मां विप्रमात्मानमर्चादाविज्यदृष्टयः॥५५॥ चराचरमिदं विश्वं भावा ये चास्य हेतवः॥ मद्रूपाणी
ति मनसि धत्ते विप्रो मदीक्षया॥५६॥ तस्माद्ब्रह्मऋषीनेतान्ब्रह्मन्मच्छ्रद्धयार्चय। एवं चेदर्चितोऽस्म्यद्धा नान्यथा भूरिभूतिभिः
॥५७॥ श्रीशुक उवाच॥ ॥स इत्थं प्रभुणादिष्टः सहकृष्णान्द्विजोत्तमान्॥ आराध्यैकात्मभावेन मैथिलश्चाप सद्गतिं॥५८॥
एवं स्वभक्तयो राजन्भगवान्भक्तभक्तिमान्॥ उषित्वादिश्य सन्मार्गं पुनर्द्वारवतीमगात्॥५९॥ ॥ इति श्रीभागवते म
मैथिलाय। हापुराणे दशमस्कंधे श्रुतदेवजनकानुग्रहो नाम षडशीतितमोऽध्यायः॥८६॥
मी क्षया॥५२॥ मम कलापरिकलनं मुपास्तिस्तया युतः॥५३॥ किंच ब्राह्मणाधीनमेव मम श्रेष्ठमित्याह। नेति। तत्र हेतुमाह। सर्ववेदम
यो विप्र इति। प्रमाणाधीनत्वात्प्रमेयस्य। वेदमयो विप्रो देवमयादस्माद्रूपाच्छ्रेष्ठ इत्यर्थः॥५४॥ असूयया दोषदृष्टयः। इज्यदृष्टयः
पूज्यबुद्धयः॥५५॥ अस्य विश्वस्य हेतवो भावाः महदादयः। मदीक्षया ममैव सर्वत्र दृष्ट्यात्मना॥५६॥५८॥ सन्मार्गं सतां वेदानां विवेकं

यथा ति॥ यथा [illegible] नः पुरुषो [illegible]

ऽः स्वमाया [illegible] सत्वा [illegible] तृणा [illegible] ॥ परं तत्सत्तीव [illegible] स्तत्र पश्यन्ति [illegible] सते। त्वमी [illegible]

नु विशेषे वा व ना स से इति नेद प्रसंग ॥ विद्वे पंचप्राणे ४ ॥ यथा [illegible] तदित [illegible] नजाति। तथा जीवो [illegible] हंकारादि [illegible] तत्वा

तत्मी [illegible] नमा सी [illegible] ॥२ ॥ [illegible] दिके ॥३

मायास्पृष्टिप्रवेशयोरविद्यासृष्टिप्रवेशो हृद्यातनयाह॥ आत्ममायया स्वाविद्यया पेत्यर्थः॥ यद्वा॥ आत्मन स्तेवमायये ति॥ ४५

किंचाश्रृण्वतामिति॥ निसंश्रवणकीर्त्तनादिपराणामेमलात्मनामपि हृदि वत्वं नासि॥ मम नुलोचन गोचरस्त्वं अहो भाग्यमभि

नि मा कु॥ ४६॥ ननु सर्वेषां हृदि स्थितः कथं केषांचिदेव हृदि भासि मि धैः सर्वव तं जीवोपाधिभिरंतरेतत्वादिति यद्यप्येतेन

हिनकेस्यापि भ्रमादिसंत आह॥ ४७॥ कर्मभिर्विद्धि सचेताये यां तेषामात्मशक्तिभिरहंकारादिभिरहंकारादिभिरग्राह्यः

यावहितोपि पेतगुणः आत्मश्रवणकीर्त्तनादिसंस्कारत्रात्मा अंतःकरणं येषां तेषामंतिसमीपेऽप्यवहितस्त्वमित्यर्थः

गदनसंवदनयोर्भेदः २ ॥ हृदीति॥ हृदिस्थो [illegible] चेतसां पुरुषाणाम तिदूरस्थो [illegible] यच तेषाम

[illegible] तेरि ततो [illegible] वसि ॥२॥

यथाशयो जीवनः पुरुषो मनसैवात्ममायया॥ सृष्ट्वा लोकं परं स्वप्न मनुविश्याव भासते॥ ४५॥ श्रृण्वतां गदतां शश्व

दर्चतां त्वाभिवंदतां॥ नृणां संवदता मंतर्हृदि भास्य मलात्मनां॥ ४६॥ हृदिस्थोऽप्यतिदूरस्थः कर्मविद्धि सचे

तसाम्॥ आत्मशक्तिभिरग्राह्योप्यंत्युपेतगुणात्मनां॥ ४७॥ नमोस्तु तेऽध्यात्मविदां परात्मने॥ स्वमायया स्वा

त्मविभक्तमृत्यवे॥ सकारणाकारणलिंगमीयुषे स्वमायया संवृतरुद्धदृष्टये॥ ४८॥ जीवो [illegible] संसार ॥ ॥

समर्पिता संसार ॥ जीवो ॥ १ ॥ [illegible] य नमः

[illegible] एतदेव प्रपंचयन्नमस्यति॥ नमोस्त्विति॥ ते तुभ्यं नमोस्तु॥ अध्यात्मविदां निवृत्त देहाद्यनात्मनैदेहाद्यभिमानि

वाय परत्वेनावप्रकाशमानत्वात॥ स्वात्मनः सकाशात विभक्तः समर्पितः मृत्युः संसारो येन तस्मै॥ कुत एतत्तत्राह॥

रणं महदादिकार्यं अकारणं प्रकृतिः तदुभयं लिंगमुपाधिं नियम्य तया ईशत्वं प्राप्तवते॥ अतः उभयनियंतुः स्वस्मा

शात्तदुभयवश्यायजीवाय विभक्त मृत्यवइत्यर्थः॥ नियंतृत्वनिमित्ताविकारणं वदन्नाह॥ स्वमायया संवृतेति॥ जी

वेभ्यो दर्शित्वात्रियंत्रे तुभ्यं नमः॥ [illegible] येषां रुद्धा आवृता दृष्टिर्येन तस्मै॥ यद्वा॥ स्वमा

श्री०
भा० ट०
७
१०५

...रमात् ॥ गुरुं ... इत्यादीनुपाधीन् जनानामनुशायिनां जीवानां मायाकार्यं प्रभुरीश्वरो सृजत् ॥ मायेत्यनेन मायाविषयाः
... मायाकार्यं भवोजन्मलक्षणं कर्मतत्प्रभृति कर्मकरणार्थमित्यर्थः ॥ आत्मनेलोकांतरगामिने आत्मनः कालांतरे भोगायेत्यर्थः ॥ आत्म
... कल्पनानिवृत्तये मुक्तये इत्यर्थः ॥ अर्थधर्मकाममोक्षार्थमिति क्रमेण पदचतुष्टयस्यार्थः ॥ जनानामित्यादि ... जीवार्थमीश्वरस
... दिपुरुषहानिरिति दर्शयति ॥ प्रभुरितीश्वरस्य उपाधिवश्यताभावेन नित्यमुक्ततां दर्शयति ॥ अयमभिप्रायः भगवन्मे ...
... सर्वदेहस्थं शक्तिं सर्वेश्वरं सर्वनियंतारं सर्वोपास्यं सर्वकर्मफलप्रदातारं समस्तकल्याणगुणनिलयं सच्चिदानंदं ...
... यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः सर्वस्य वशी सर्वस्येशानः यः सर्वाणि भूतानि ... अंतरः सोऽकामय
... तत्तेजोऽसृजत सत्यं ज्ञानमनंतं ब्रह्मेत्याद्याः ॥ तथाभूतेश्वरतां ... मारिणां जीवस्य तन्निवृत्तये तत्त्वमसीत्यादि
... ॥ बुद्धींद्रियमनःप्राणान् जनानामसृजत् प्रभुः ॥ मात्रार्थं च भवार्थं च आत्मने कल्पनाय च ॥ २ ॥ ॥ ॥
... तत्र च तत्त्वंपदयोः सामानाधिकरण्यं प्रतीयते ॥ तच्च प्रकारांतरेण घटमानं ब्रह्मणि पर्यवसानं गमयति ॥ तथाहि ॥
... मिन्नोति वृद्धुभयोरेकार्थाभिधानेन सामानाधिकरण्यं घटते ॥ यथोक्तं ॥ आभिन्नादेवताप्रुक्तावदत्सुवैषतोद्वितः ॥ आ
... भिन्नप्रमाणानि ... तस्य विषयापूर्वाणामिति ॥ कुतः भिन्नार्थत्वात् ॥ न चाजहल्लक्षणया निरूढलक्षणया विशेषणविशेष्यभावेन
नीलमुत्पलमितिवत् ॥ यथा ... व्यावर्त्यते ये न विशेष्यं तद्विशेषणमित्यादि कुतः विरुद्धार्थत्वेन तद्योगात् ॥ न च जहल्लक्षणया
... लक्षणया कुमुमतं ... मागंगेति वत् ॥ कुतः ऐकार्थ्यस्य विवक्षितत्वात् ॥ अतो जहदजहल्लक्षणया सोयं देवदत्त इतिवत्
... त्यागेनानुगत चिदंशेनैकार्थ्येन सामानाधिकरण्येन निर्गुणे पर्यवसानं ॥ ... वाक्यानां तु मायाद्युपाधिनिरसनेन ॥ तथा
... वोपक्रमेत्स्वसत्त्वमिदमापी ... येत्यादि ... आत्मनेति ... यत्फलं ... सर्वतन्निरसनेन भवद्बंधनादुपसं
हरिष्यति ॥ उपासनादिवाक्यानां ... ज्ञानसाधनविधानेन तत्परत्वमित्येषा दिक् ॥ २ ॥ ॥ ॥

समाशीतितमेनारायणोनारदंवादतः॥ वेदेस्तुतिर्गुणातीतो निर्गुणोवर्णितोधिवर्ण्यते॥१॥ ॐ वागीशायस्यवदनेलक्ष्मीर्यस्यचवक्षसि।
यस्यास्तेहृदयेसंवित्तंनृसिंहमहंभजे॥२॥ संप्रदायविशुद्ध्यर्थंस्वीयनिर्बंधयंत्रितः॥ श्रुतिस्मृतिमितेव्याख्यांकरिष्यामियथामति॥३॥
श्रीमद्भागवतंपूर्वैःसारतःसंनिषेवितं॥ मयातुतदुपस्पृष्टमुच्छिष्टमुपचीयते॥४॥ पूर्वाध्यायांतेएवंस्वभक्तयोराजन्भगवान्भक्तभ
क्तिमान्॥ उषित्वादिश्यसन्मार्गंपुनर्द्वारवतीमगात्॥ इत्यत्रसन्मार्गसतांस्वतःप्रमाणभूतानामप्रामाण्यप्रकारणरहितानांवेदानां
मार्गंब्रह्मपरत्वमुपदिश्यप्रभुर्युवानगादित्युक्तं॥ तत्रवेदानांब्रह्मपरत्वमघटमानंमन्वानःपृच्छति॥ ब्रह्मन्निति॥ तत्रतावन्मुख्यलक्षणा
लाभेदेनत्रिधाशब्दवृत्तिः॥ मुख्यापिरूढियोगभेदेनद्विधा॥ रूढिश्चस्वरूपेणजात्यागुणेनवानिर्देश्यार्थवस्तुनिसंज्ञासंज्ञिसंकेतेन

॥ ॥श्रीपरीक्षिदुवाच॥ ॥ब्रह्मन्ब्रह्मण्यनिर्देश्येनिर्गुणेगुणवृत्तयः॥ कथंचरंतिश्रुतयःसाक्षात्सदसतःपरे॥१॥

वर्तते॥ यथाडित्थः॥ गौःशुक्लइति॥ लक्षणाचतेनैवसंकेतेनाभिहितार्थसंबंधिनियथागंगायांघोषइति॥ गौणीचाभिहितालक्षित
गुणयुक्तेतन्निर्देशे॥ यथासिंहोदेवदत्तइति॥ यथाहुः॥ अभिधेयाविनाभूतप्रवृत्तिर्लक्षणेष्यते॥ लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टातुगौ
णतेति॥ योगवृत्तिस्तुएतत्त्रिविधवृत्तिप्रतिपादितपदार्थयोःप्रकृतिप्रत्ययार्थयोर्वायोगेन॥ यथापंकजं॥ अपगवःपाचकइत्यादितत्र
नावद्ब्रह्मणिरूढिप्रवृत्तिर्नसंभवतीत्याह॥ साक्षात्कथंचरंतीति॥ तत्रहेतुः॥ अनिर्देश्यत्वेपिहेतुंवदन्गुणवृत्तिंनिराकरोति॥ निर्गुणेगु
णवृत्तयइति॥ गुणैर्वर्तमानाअपिनिर्गुणेकथंचरंति॥ लक्षणानिर्गुणत्वेचहेतुंवदन्लक्षणांयोगंच [illegible]
निराकरोति॥ सदसदःपरइति॥ कार्यकारणाभ्यांपरस्मि
[illegible] नसंगे॥ केनचिदपिसंबंधाभावात्नलक्षणायोगवृत्ती॥ [illegible] पदार्थत्वात्योगादपद [illegible] त्वाद्योगाच्च॥ श्रुति
[illegible]

॥ यदि देवो यगृहीतगुणं विद्यातदा भव्यपि सौ नं न घा वरणं कुर्यात्॥४॥ येन माया पादं त्वं मानं त्वां वेदः प्रतिपादय

जयजयेति॥ नो ऽजितजयजय डल्कर्षमाविः कुरु। आदरे वीप्साकिन व्यापारेण अगजगदोकसां अगानि स्थावराणि जगंति जंग
मानि तेषां असि शरीराणि ये षां जीवानां तेषामजा मविद्यां जहि ना शयविभूतिगुणवती हि तस्मेत्स त आह। दोषगृभीतगुणां दोषाय
आनंदादि आवरणाय गृहीता गुणा यया तां॥ अग्रहो भेदं छंदसी तिभकारः॥ इयं हि स्वैरिणी वृपरवंतारणायैव गुणान्गृह्णाति। अतो
तमेति। यथान्योपि दांभिको राज्ञा हंतव्यः स्यात्तथा। तर्हि मय्यपि दोषमावहेदिति ममापि तत्र का शक्तिः स्यादत आह॥ त्वमिति। यः
दस्मात्। त्वं आत्मना स्वरूपेणैव समवरुद्धसमस्तभगः। संप्राप्तसमस्तैश्वर्योसि। वशीकृतमायत्वादिति भावः। ननु स्वयमेतौ
नैवेयान्यादिना किं न हंतुः इत्यत आह। अखिलशक्त्यवबोधके इति। तेषां त्वमेव अंतर्यामी सर्वशक्त्यवबोधकः। अतो न तेज्ञानादोषं

॥ श्रुतयऊचुः॥ ॥ जयजयजह्यजामजितदोषगृभीतगुणां त्वमसि यदात्मना समवरुद्धसमस्तभगः॥ ॥
॥ अगजगदोकसामखिलशक्त्यवबोधक ते क्वचिदजयात्मना च चरतोनुचरेन्निगमः॥२४॥ ॥

तं याइति भावः। ननु मम कुं वज्ञानैश्वर्यादिगुणो जीवानां कर्मज्ञानादिशक्त्यवबोधनेनाविद्या हंते तत्र किं प्रमाणमिति चेत्तत्राह श्रुतमेव प्र
माणमित्याह॥ निगमः वेदः। ननु एवं भूते मयि कथं श्रुतीनां प्रवृत्तिः न त्वाह॥ क्वचिदिति। कदाचित्सृष्ट्यादिसमये अजया मायया च
रतः क्रीडतः नित्यं चात्मनि सुसभोगं तया समस्तज्ञानानंतानंदैकरसेनात्मना चरतो वर्त्तमानस्य निगमोनुचरेत्। प्रतिपादयेत्। कर्माणि
हि यतो वा इमानि भूतानि जायंते। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै श
रणमहं प्रपद्ये॥ यच्चात्मनि तिष्ठन् सत्यं ज्ञानमनंतं ब्रह्म। यः सर्वज्ञः स सर्ववित्। यस्य ज्ञानमयं तपः त्वमेवं भूतं प्रतिपादयतीत्यर्थः॥ ॥
जयजयाजितं जह्यगजंगमावृतिमजामुपनीतमृषागुणां॥ न हि भवंतमृते प्रभवंत्यमी निगमगीतगुणार्णवता तव॥२५॥ ॥

नेपोगोविघ पर्यनयोगः प्रेरणा

विचारयंति४

ब्रह्मत्वानादिविशिष्टपरंपरागतत्वात्तत्संदेहेऽसुक्त इत्याह॥ सैवेति सैवाय पोक्तावलंबनाब्राह्मी ब्रह्मपराश्रद्धायाआदरेणैवेतं डिकतत्त्वाभिनिवे
शनयःश्रवणादिनाधारयेत्॥ अत्र किंचन निरस्तदेहाद्युपाधिः सन् परं पदं प्राप्नुयादिति एतदेव सर्वश्रुत्यर्थनिरूपणेन प्रपंचयितुमिति
हासमवतारयति॥ अत्रेति॥ नारायणान्वितां नारायणप्रवक्तृत्वेनान्वितां यस्यां तां गाथामिति तांसंब्रह्मसत्रमिति॥ यथाय यजमाना
एवासमाना ऋत्विगादिरूपेण यत्र कर्म कुर्वंतीति तत्कर्मसत्रं प्रसिद्धं तथा यत्र समाना एव वक्तृश्रोतृभावेन ब्रह्ममीमांसंते तत्तद्ब्रह्मसत्रं॥

॥ यत्र जनलोके वेदाः शेरते ध्वे कुर्वंति तत्र ब्रह्मवादः सूक्ते नारायणं२ तंवादं तस्मै कथितवान्४ ददर्श कलापग्रामं२ कथा१३ प्रश्नः॥६॥

सैषाब्रह्मायस्यपूर्वेषांपूर्वजैर्धृता॥ श्रद्धयाधारयेद्यस्तां क्षेमं गच्छेदकिंचनः॥३॥ अत्र ते वर्णयिष्यामि गाथां नारायणान्वितां॥
नारदस्य च संवादमृषेर्नारायणस्य च॥४॥ एकदा नारदो लोकान्पर्यटन्भगवत्प्रियः॥ सनातनमृषिं द्रष्टुं ययौ नारायणाश्रमं॥५॥ यो
वै भरतवर्षेस्मिन्क्षेमाय स्वस्तये नृणां॥ धर्मज्ञानशमोपेतमाकल्पादास्थितस्तपः॥६॥ तत्रोपविष्टमृषिभिः कलापग्रामवासिभिः
परीतं प्रणतोऽपृच्छदिदमेव कुरूद्वह॥७॥ तस्मा अवोचद्भगवानृषीणां शृण्वतामिदं॥ यो ब्रह्मवादः पूर्वेषां जनलोकनिवासिनां॥
॥८॥ श्रीभगवानुवाच॥ ॥स्वायंभुवब्रह्मसत्रं जनलोकेभवत्पुरा॥ तत्रस्थानां मानसानां मुनीनामूर्ध्वरेतसां॥ श्वेतद्वीपं
गतवति त्वयि द्रष्टुं तदीश्वरं॥ ब्रह्मवादः सुसंवृत्तः श्रुतयो यत्र शेरते॥१०॥ तत्र हायमभूत्प्रश्नस्त्वं मां यमनुपृच्छसि॥ तुल्यश्रु
तशीलतुल्यमित्रारिमध्यमाः॥ अपि चक्रुः प्रवचनमेकं शुश्रूषवोपरे॥११॥ सनंदन उवाच स्वसृष्टमिदमापीय शयानं सह शक्तिभिः
तदंते बोधयांचक्रुस्तल्लिंगैः श्रुतयः परं॥१२॥ यथा शयानं सम्राजं वंदिनस्तत्पराक्रमैः॥ प्रत्यूषेऽभेत्य सुश्लोकैर्बोधयंत्यनुजीविनः

श्रुतयो निमयाकथयं तत्र ज्ञात आह॥ श्वेतद्वीपमिति शश्वरं॥ तत्रस्थं मामेवानिरुद्धमूर्तिं॥ ननु सर्वज्ञास्ते कुतः त्रयं त्वत्ता प्रष्टावा तत्राह
तुल्यश्रुतेति श्रुतादिभिरविशेषात्रयमित्रोदासीनत्वेनानरूपा मकरूणाश्रुतः सर्वप्रवचनयोग्या॥ अपि केनापि कौतुकेन वक्तारं
रहत्वान्येपरे शुश्रूषवः॥ स्वसृष्टमिति लया निर्मितमिदं विश्वं प्रलयसमये आपीय संहृत्य शयानं योगनिद्रामितवर्तमानं
ततस्तेपलयांते तल्लिंगैस्तत्प्रतिपादकैर्वाक्यैः परमीश्वरं॥ सर्गसमये प्रजननिश्वासभूता श्रुतयः प्रबोधयामासुः॥ सुश्लोकैः शोभनाः

...दतिवेविनिर्मितानाम्... तव चिदपि पापस्पर्शो ... नस्त्वं त ... स्तस्य ...

...ते तत्त्वा कवानी । ते तां दुःखपापस्पर्श एव न भवती त्यर्थः ॥ १ ॥

...स्वरूपेण ... ...दिकाः । हे परम ये च ते रूपदे ...नं दानुभवस्व रूपं तं ये ते ...

त्वमेव स... गोचर इति मतां प्रहत्स्या दृढयति ॥ इति तव इति । त्वमेव सर्वकारणत्वेन परमात्मा इति कृत्वा भो त्र्यधिपते त्रिगुण

मायामृगीन तत्किं सूरयो विवेकिनस्तवाखिललोकमलक्षपणकथामृताब्धिमकल्पजनहर्जिनं निरसनहेतुं कीर्त्तिसुधाब्धिं

धाम... गाह्य निबध्य तपांसि तपंतीति । तपांसि पापानि दुःखानि वा जहुः त्यक्तवंतः त्वदीयाकथामात्रेण यदा पापस्याग... तदाखि

सुवत्कर्यं ये पुनः स्वधामविधुताशयकालगुणाः स्वधाम्नात्स्वरूपस्फुरणेन विधुतास्त्यक्ता आशयस्थगुणाः अंतःकरणध

॥ ॥ इति तव सूरयस्त्र्यधिपतेऽखिललोकमलक्षपणकथामृताब्धिमवगाह्य तपांसि जहुः ॥ ॥
॥ किमुत पुनः स्वधामविधुताशयकालगुणाः परम भजंति ये पदमजस्रसुखानुभवं ॥ ३ ॥ ॥

मेरामादयः कालगुणा जरादयश्च यैस्तेन यथा हे परम त्वां जस्रसुखानुभवं अखंडानंदानुभवं पदं स्वरूपं भजंति सेवंते तथा

भूताः दुःखानि त्यजंतीति यथा पुष्करपलाशमापोन श्लिष्यंते एवमेवेवंविदि पापं कर्म न श्लिष्यते । न कर्मणा लिप्यते पापं के

नंतसु... दुःकृते विधुनुते एतं ह वावन तपति । किमहं साधु नाकरवं किमहं पापमकरवमित्यादि श्रुतेरित्यर्थः ॥ सकलदे ॥ ३ ॥ ॥

वगणारितमज्जुणस्त्वमिति सर्वमनीषिजनारतां ॥ त्वयि सुभद्रगुणश्रवणादिभिस्तवपदस्मरणेन गतेक्लमा ॥ ३ ॥

ननु कथं मामेव प्रतिपादयति॥ यतः इन्द्रेय तां वसितस्य राजेत्यादिभिरिन्द्रस्य तो जंगमस्य अवसितस्य स्थावरस्य च राजेति प्रतिपाद्य
तेन तथा अग्निर्मूर्धा दिव इत्यादिभिश्चैवं भूतत्वेनाप्यादयः प्रतिपाद्यंते तत्राह॥ बृहदुपलब्धमिति॥ अयमर्थः॥ एतदुपलब्धं दृष्टमिदं
दिमर्थं एतद् ब्रह्मात्वमित्येवावयंति जानंति किं पूर्वं कृतेऽवयवविशेषतया व्याशिष्यमाणत्वेन कुतः यतो हि ततः सर्वस्योदयास्तमयो उत्पत्ति
लयौ॥ ॥सर्वोपादानत्वात् तर्हि किं विकारित्वं ब्रह्म ततः न अविहतानां विवर्त्ताधिष्ठानत्वेन अविकारादित्यर्थः॥ वा शब्द उपमा
र्थः। यथा घटादेर्विकृतेर्मृदि उदयास्तमयौ तद्वत्॥ वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं॥ सर्वं खल्विदं ब्रह्मेत्यादिभि

॥ ॥बृहदुपलब्धमेतदवयंत्यवशेषतयायत उदयास्तमयौ विकृतेर्मृदि वो विकृतात्॥ ॥
॥ ॥अतरूषयोदधुस्त्वेयिमनोवचनाचरितं कथमयथाभवंति भुवि दत्तपदानि नृणां॥२॥

कथं प्रतिपादनादित्यर्थः॥ अतः कारणादृषयो मंत्रा अस्तद्द्रष्टारो वा त्वय्येव मनोवचनाचरितं दधुः॥ मनसा आचरितं तात्पर्यं व
चनाचरितमभिधानं धृतवंतः॥ न पृथग्विकारेष्वित्यर्थः॥ अत्र निदर्शनं कथमयथेति॥ नृणां भूचराणां यत्र कुत्रापि दत्तानि नि
धानि भुवि कथमयथा भवंति॥ अदत्तानि भवंति॥ अतो यथा मृत्पाषाणेष्टकादिषु दत्तानि पदानि भुवं नाभिचरंति तद्वद्यानि
मापि विकारजातं वदंतो वेदास्त्वामेव सर्वकारणं परमार्थभूतं प्रतिपादयंतीत्यर्थः॥ ॥द्रुहिणवह्निरवीन्द्रमुखामरे राजगंदि
हं न भवत्स्वपृथगुल्लिखितं॥ बहुमुखैरपि मंत्रगणैरजस्त्वमुरुमूर्तिरतो विनिगद्यसे॥ ॥ ॥ ॥ ॥

॥अग्निर्मूर्धा दिवं कतुरिति॥ अपादरेताः॥ ... ॥२॥

[illegible]

एवं तावत् सर्वात्मके परमेश्वरे सर्वश्रुतिसमन्वयेन सर्वजनीयत्वमुक्तं॥ अधुना निंदया च तद्दुर्वहत्वे दानीमनवगाह्ये म
हिमनि अघन्तं तावदुपाध्यालंबनमुपासनमुदरं ब्रह्मेति शार्कराक्षा उपासते॥ हृदयं ब्रह्मेत्यारुणयो ब्रह्मादेवता कुर्वन्ति चो
र्ध्वं सर्पच्छिरोऽश्रयन्त॥ इत्याद्याः श्रुतयो विदधतीत्याह॥ उदरमुपासत इति॥ ऋषिवर्त्मसु ऋषीणां संप्रदायमार्गेषु ये कूर्प
दृशस्ते उदरालंबनं मणिपूरकस्थं ब्रह्मोपासते ध्यायंति॥ शार्कराक्षा इति श्रुतिपदस्य प्रतिपदं कूर्पदृश इति कूर्पशब्दः
[illegible] रजो विधीयते हस्तु श्रुतिषु येषां तपारजं पिहितं दृष्टयः॥ स्थूलदृष्टय इति यावत्॥ उदरस्य हृदयापेक्षया स्थूलत्वात्॥ यद्वा
कूर्पः [illegible] दृश इत्यर्थः॥ तदा हृदयस्थं सूक्ष्ममेवालक्ष्यं तत्त्वावेशाय प्रथममुदरस्थमुपासत इति भावः॥ आरुणयस्तु

॥ उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः परिसरपद्धतिं हृदयमारुणयो दहरं॥ ॥ ॥
तत उदगादनंत तव धाम शिरः परमं पुनरिह यत्समेत्य न पतंति कृतांतमुखे॥ ५ ॥ ॥ ॥

सा[illegible] हृदयस्थं दहरं सूक्ष्ममेवोपासते हृदयविशेषणं परिसरपद्धतिमिति॥ परितः सरंति प्रसर्पंतीति॥ परसरा नाड्यः
तासां पद्धतिं मार्गं प्रसरणस्थानमित्यर्थः॥ विशेषणफलमाह॥ तत इति॥ ततो हृदयात् भो अनंत तव धाम उपलब्धिस्थानं
सुषुम्नाख्यं परमं श्रेष्ठं ज्योतिर्मयं शिरः मूर्द्धानं प्रति उदगात् उदसर्पत्॥ मूलाधारादारभ्य हृदयमध्यात् ब्रह्मरंध्रं प्रसृत
मित्यर्थः॥ कथंभूतं धाम यत्समेत्य प्राप्य पुनरिह कृतांतमुखे संसारे न पतंति॥ तथा च श्रुतिः॥ शतं चैका च हृदयस्य नाड्यः
तासां मूर्द्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवंतीति॥ ५॥ उदरादिषु यः पुंसां चिंतितो
मुनिवर्त्मभिः॥ हंति मृत्युभयं देवो हृद्गतं तमुपास्महे॥ १८॥

श्रीगोपीजनवल्लभाय नमः॥

अन्नमयप्राणमयमनोमयविज्ञानमयआनंदमयइ

॥ अन्नमयकोशः शरीरं स्थूलमेतत् ... प्राणमयमनोमयविज्ञानमये ... आनंदमयः कोशः ॥

॥ हे तात ... सफलजीवनाः संति ॥ यदि ... महदिति ॥ ... प्रविशेन ... शरीरे ... स्वकामादि ... ॥

असुर्या नाम ते लोका अंधेन तमसावृताः ॥ तांस्ते प्रेत्यापि गच्छंति ये के चात्महनो जनाः ॥ तथा न देव वेदीमहती विनष्टिः ॥

इत्याद्याः श्रुतयः पूर्वश्लोकोक्तोभयविधभजनहीनान्निंदंति ॥ इतरथा इवेति असुभृतो नराः यदि तेनुविधा अनुविदधति अनुविधाः अनुवर्त्तिनो भक्ताः इति यावत् ॥ तर्हि स्युः संति जीवंति सफलजीवना भवंति ॥ इतरथा इतरथा इव भस्त्रा इव श्वसंति ॥

साइत्यर्थः ॥ नन्वभक्तानामपि कामादिफलमस्त्येव ॥ न कार्यकारणानुग्राहकत्वेन जीवनहेतोस्तवाभजने हि तद्ग्रानां तदपि न सिध्येदित्याशयेनाह ॥ महदहमादय इति महानहंकारश्च आदिर्येषां ते यदनुग्रहतः यस्यानुप्रवेशेन लब्धसामर्थ्याः संतः अंडं देहं ममस्वि व्यष्टिरूपं समसृजंत ॥ तत्र च पंचापि कोशान् अन्नमयादीनां विशपतः तदाकारः सन् यश्चेतनयते स त्वं तदात्मपुरुषविध इति ॥ पुरुषस्यान्नमयादेर्विधेव विधा आकारो यस्य स तथा ॥ ननु चिदेकरसस्य कथं तत्तदाकारता अत आह

॥ अन्नमयकोशः शरीरं स्थूलमेतत्स्वरूपं भवति ॥ प्राणमयमनोमयविज्ञानमयेति कोशत्रयं ... भवति ॥२॥ ॥ अन्नमयादिकोशाकारता

॥ हेतवयंइवश्वसंत्यसुभृतो यदि तेनुविधा महदहमादयोंडमसृजन्यदनुग्रहतः ॥ पुरुषविधोन्वयोत्र चरमोन्नमयादिषु यः सदसतः

॥ एकपुरुषविध अन्नमयादिषु ... ॥१॥ परं त्वमथयदेष्ववशेषमृतम् ॥१७॥

न्वयो वेति ॥ अन्नमयादिष्वन्वेति तत्र चयः अतस्तत्तदाकारत्वेति ॥ एवं तर्हि सत्यत्वमसंगत्वं च कथं तत्राह ॥ चरमोन्नमयादिषु इति ॥ अन्नमयादिषु पदिश्यमानेषु यश्चरमो ब्रह्मपुच्छं प्रतिष्ठेति पुच्छत्वेनोक्तः स त्वमिति संबंधः ॥ ननु तथाप्यन्नमयादिष्वन्वितत्वेऽसंगत्वं नाहेतिरेवं तत्राह ॥ सदसतः परं त्वमथयदेष्ववशेषमृतमिति ॥ सदसतः स्थूलसूक्ष्मात् अन्नमयादेः परं व्यतिरिक्तं तत्साक्षिभूतं अवशेषं च अवशिष्यत इत्यवशेषमबाध्यं अथ अत एव ऋतं तत्सत्यं ॥ तर्हि किमर्थं तेष्वन्वय उक्तः ॥ शाखाचंद्रवत्सूक्ष्मस्वरूपलक्षणार्थं तथाहि स वा एष पुरुषोन्नरसमय इत्यादि ... वशिरइत्यादिना स्थूलमारभ्य क्रमेण पंचकोशानुपदिश्य तेष्वपि पुरुषविधतामन्वयं पुरुषविधता पुनःपुनः पदेन्वितत्वेनोक्त्वा ब्रह्म पुच्छं प्रतिष्ठेति सर्वेषामाधिभूतस्य रूपनिरूपणमेव ... ॥ ॥ न खलु ... तिपद ... दित्वायि ...

यस्य तं … नवेयोनदति ॥ … एकरण … ॥ … ॥ …
मावेदो … ॥१॥ ॥ … एकरणवरणदिति … ॥ एवं जीवगति … ॥ कवयः … मरण … ॥

श्री०

अपि च कुते … कास्मात … तो देहाद्युपाधिकृत तद्दोषप्रसंग इति ॥ यतोऽविद्याकामकर्मभिः संसरतो जीवस्यापि भगवत्
त्वेनावबोधयत्य … दोषं निषेधयति ॥ संयच्छायं पुरुषोऽयश्चासावादित्ये स एक इत्येवमसौ त्वाद्याः श्रुतयः ॥ ननु … स्यात्मन
रियमीश्वरत्वेन त्रियते न तु तस्येश्वरत्वं बोध्यते । नेतदुच्यते । यतस्तत्त्वं यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता
नकाशंते महात्मन इत्याद्याः श्रुतयः कृतावतारस्य भगवतश्चरणभजनं उपायं वदंतीत्याह ॥ स्वकृतपुरेष्विति ॥ स्वकर्मार्जितेषु
देहेषु नरादिषु भोक्तृत्वेन वर्त्तमानं पुरुषं अखिलशक्तिधृतः सर्वशक्त्याश्रयस्य पूर्णस्य तवांशकृतं वदंति … ॥

देहा लिंगा जीवम्

स्वकृतपुरेष्वमीष्वबहिरंतरसंवरणं तव पुरुषं वदंत्यखिलशक्तिधृतोंऽशकृतं ॥ ॥ ॥
इति नृगतिं विविच्य कवयो निगमावपनं भवत उपासतेंऽघ्रिमभवं भुवि विश्वसिताः ॥२०॥

सर्वकर्मार्पणविषयम् ॥ देहा लिंगा ॥ … तदंशो जीवः … ॥ संसारनिवर्तकमंघ्रिम् ॥

तः … ननु कार्यकारणसंहतस्य कुत एवं भूतत्वं तत्राह । अबहिरंतरसंवरणमिति ॥ बहिः कार्यमंतरं कारणं
तत्संवरणं … स्वत्वादित्यर्थः ॥ इति एवं नृगतिं तु जीवस्य गतिं तत्त्वं विविच्य विशोध्य कवयः अन्यपदं न … श्
नंतः ॥ निगमावपनं निगमोत्कर्षेण आसमंतादुप्यंते यस्मिन्निति पावपनं तत्सर्वकर्मार्पणविषयमित्यर्थः ॥ यत्रार्पितानि कर्म
मुक्तिफलं फलंति ॥ तं भवतोंऽघ्रिं अभवं भवनिवर्त्तकं विश्वसिताः कृतविश्वासा उपासते ॥ अर्चनवंदनादिभिः सेवंते ॥ भुवीति
सर्वलोकेऽपीदमेवोचितमिति दर्शयति ॥ त्वदंशस्य ममेशान त्वन्मायाकृतबंधनं ॥ त्वदंघ्रिसेवामादिश्य परानंद निवर्त्तय ॥२॥ ॥

भवति ॥ स्थितस्य मम ॥ ममबंधनं ॥

॥ यदि जीवे देहादौ प्रविष्टस्तर्हि जीववदधिकं ईश्वरे दोषः स्यादधिक... तत्कर्मकालादि... ईश्वर उपास्य इत्याशंक्य ॥ १ ॥

नन्वीश्वरस्यापि तर्हि जीववदुदरहृदयादि संबंधे तदनुप्रविष्टस्य च तारतम्ये सति केन विशेषेणोपास्यत्वमिति ॥ इमामाशं परिहरंस्तैः ॥ एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेत्याद्याः श्रुतयः स्तुवंतीत्याह ॥ स्वकृत विचित्रयोनिष्विति ॥ स्वयं कृतासु उच्चनीचमध्यमासु योनिषु अभिव्यक्तिस्थानेषु कार्येषु देहादिषु हेतुतया उपादानतया प्रागेव विद्यमानत्वेन सुरम्यप्रवेशो नाम भवान् विशन्निव वर्त्तमानस्तारतमतोऽन्यूनाधिकभावेन चकास्सि अवभाससे ॥ स्वकृता योनीरनुकरोतीति स्वकृतानुकृतिः अनलवत् अग्निर्यथा स्वतस्तारतम्यहीनोऽपि काष्ठानुसारेण तथा ॥

॥ ॥ स्वकृतविचित्रयोनिषु विशन्निव हेतुतया तरतमतश्चकास्स्यनलवत्स्वकृतानुकृतिः ॥ ॥ ॥
॥ ॥ अथ वितथास्वमूष्ववितथं तव धाम समं विरजधियोऽन्वयन्त्यभिविपण्यव एकरसम् ॥ १९ ॥ ॥

"अथेति ॥ तथैव तारतम्याभावादश्रेयान्तेषु देहेषु तव स्वरूपं सत्यं यतः समं विशेषशून्यमतो निर्मलबुद्धयः कर्मफलरहिता जना तव स्वरूपं सत्यमेकरसं च जानंतीत्यतस्त्वं भावः ॥ १ ॥

प्रकाशनेन इत्यर्थः ॥ अथ अतो वितथासु मिथ्याभूतास्वमूषु योनिषु अवितथं सत्यं यतः समं अविशेषं ॥ अतः सत्यं तव धाम स्वरूपं विरजधियो निर्मलमतयः अन्वयंति जानंति नु इति मिथ्याकूपदं वा अन्वेतुः ॥ अभिविपण्यव इति ॥ अभितो विगतः पण्यः पनव्यवहारः इत्यस्य रूपं पण्युरिति ॥ ऐहिकामुष्मिककर्म्मफलरहिता इत्यर्थः ॥ अविशेषत्वादेवैकरसं सन्मात्रं ॥ अतस्त्वमेवोपाधिसंबंधाभावादप्रच्युतैश्वर्यस्योपास्यत्वमिति भावः ॥ ॥ स्वनिर्मितेषु कार्येषु तारतम्यविवर्जितं ॥ सर्वानुस्यूतसन्मात्रं भगवंतं भजाम

आरामं मन्यमानाः [illegible] कश्चन प्रपद्यते ॥ नन्वविद्याधयः [illegible] मा जन्मानो न्यः [illegible] न्वामेकमंतरं [illegible] लोकं हारं [illegible]

प्रासस्त्वं [illegible] तयः स्वेनु कोशं स्पोज जगदात्मनीश्वरे रतिमुपदिशंतीत्याहुः ॥ त्वदनुपथमिति ॥ त्वदनुपाथि [illegible] बो

पयिकमिदं कुलायं कोहाथियं त्वीपत इति शरीरमात्ममुहृत्प्रियवत ॥ आत्मा च सुहृच्च प्रियश्च तद्वच्चरंतीति स्वार्थः ॥ नतथावर्त्त

इत्यर्थः ॥ तथापि त्वयि उन्मुखेहिते प्रिये आत्मनि च अपर्यपर्येचकारः ॥ एवंभूते तु से [illegible] अस्तो क्षमंतरमंतिनस [illegible]

ति ॥ असदुपासनया हेतोः प्रलालनेन आत्महनः प्रमादिनः कुतः यदनु [illegible] स्यामसदुपासनायां [illegible] भांतेषु

रिमंत [illegible] भयेसंसारेभ्रमंति परिवर्त्तते ॥ अतः आत्महन इति भावः ॥ त्वय्यात्मनि जगन्नाथे मन्मनो रमतामिह ॥ [illegible]

त्वदनुपथं कुलायमिदमात्मसुहृत्प्रियवच्चरतितथोन्मुखेत्वयिहितेप्रियआत्मनिच ॥ नवतरमत्यहो असदुपासनया आत्महनो यदनुशयाभ्र

मतुस्भ [illegible] भृतः ॥ २४ ॥ निभृतमरुन्मनोक्षदृढयोगयुजो हृदि यन्मुनय उपासते तदरयोपिययुः स्मरणात ॥ स्त्रिय उरगेंद्रभोगभुज

दंडविषक्तधियो वयमपि ते समाः समदृशोंघ्रिसरोजसुधाः ॥ २३ ॥ [illegible] वृषं संभविष्यति ॥ [illegible] ॥ इदानीमात्मा वा अरे द्रष्टव्यः श्रोतव्यो

मंतव्यो निदिध्यासितव्य इत्याद्याः श्रुतयो ध्यानमुख्यत्वेनोपदिशंतीत्याहुः ॥ निभृतमरुन्मनोक्षदृढयोगयुज इति ॥ मरुत्प्राणः मनश्च अक्षाणीं

द्रियाणि च निभृतानि संयमितानि यैस्ते च दृढं योगं युंजंतीति दृढयोगयुजस्ते तथाभूता मुनयः हृदि यत्तत्त्वमुपासते तदेवारयोपि तव

स्मरणात्तयपुः प्रापुः स्त्रियोपि कामतउरगेंद्रभोगभुजदंडाविषक्तधियः अहीन्द्रदेहसदृशयोर्भुजदंडयोर्विषक्ताधीर्यासां ताः परिच्छिन्नदृष्ट

यः समदृशाः सममपरिच्छिन्नं त्वां पश्यंतो वयं श्रुतयोभिमानिन्यो देवता अपि ते समा एवं रूपो विषयं तेया ॥ अंघ्रिसरोजसुधाः अंघ्रिसरोजं सुधा

धारयंत्यः ॥ अयं भावः इत्थंभूतस्तव स्मरणानुभावः ये योगिनः [illegible] हृद्यालंबनं उपासते याश्च वयं त्वां समं पश्यामः याश्च स्त्रियः कामतः परि

च्छिन्नं ध्यायंति ॥ येच द्वेषेण । सर्वानपितांस्त्वामेव प्रापयेति ॥ चरणस्मरणं प्रेम्णा ते वदेव सुदुर्लभं ॥ यथा कथंचिन्नृहरे मम भूयादहर्निशं ॥ २४ ॥

वनेधृति। किं तु मे क्रिरसो सन्तु सर्वेन पर्णाः मेते सर्वेचरणकमले समकुलसंगेन प्राप्नुवन्ति सर्वमपि तेते तीर्थाः॥ २॥

भक्तिरंन्यं साधनमितिवचनमनुचितमिति मन्वानो भक्तिं गुरूकरोति॥ दुरवगमेति॥ भोईश्वर दुर्वोधं यदात्मतत्वं तस्य निगमा
यन्ज्ञापनाय तवात्ततनोराविःकृतमूर्तेः चरितमहामृताब्धिपरिवर्त्तपरिश्रमणाः चरितमेव महानमृताब्धिः तस्मिन्परिवर्त्तो विश्र
मस्तेन परिश्रमणाः परिवर्ज्जनार्थः। श्रमणं श्रमः गतश्रमा इत्यर्थः॥ अपवर्गमपि केचिन्नपरिलषंति नेच्छंति कुतोन्यत्॥ केचि
दिति एवंभूतो भक्तिरसिका विरला इति दर्शयति॥ न केवलमन्यन्नेच्छंति। किंतु तेनैव सुखेन पूर्णाः संतः पूर्वसिद्धगृहादिषु सु

दुरवगमात्मतत्वनिगमाय तवात्ततनोश्चरितमहामृताब्धिपरिवर्त्तपरिश्रमणाः॥ ८॥
न परिलषंति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसंगविसृष्टगृहाः॥ ॥२१॥

खमेव तिष्ठंतीत्याह॥ तव चरणसरोजहंसकुलसंगविसृष्टगृहा इति तव चरणसरोजे हंसा इव रममाणास्तेषां कुलं तेन
संगस्तेन विसृष्टगृहा येस्ते तथा॥ अनेन श्रवणकीर्त्तनेदार्शितिः श्रुतिश्च मुक्तेरप्याधिक्यं भक्तेर्दर्शयति॥ यथाहुः सुर्हं देवान
मंतिमुमुक्षवो ब्रह्मवादिनश्चेति॥ व्याख्यातं च सर्वज्ञैर्भूयिष्ठक्लिष्टिः मुक्ताप्यपिलीलाविग्रहं कृत्वा भजंते इति॥ त्वत्पादाम्बुजपा
योधौ विहरतां मत्तां मुदे॥ कुर्वंति कृतिनः केचिच्चतुर्वर्गं तृणोपमम्॥ ८॥

द्वैतोपि नेड्ज्ञानं सुकरं तु पदिशाता मपि भ्रमवाकुला दित्याह ॥ जनिमंसतइति ॥ असतो जगतो जनिं उत्पत्तिं ये वैशेषिकादयो वदंति ॥ तत्र असतएव ब्रह्मणो (स्यो)त्पत्तिं ये च पातंजलादयः सतएव के विंशति प्रकारस्य दुःखस्य नाशं मोक्षं वदंति ये नैयायिका उ तत्र ॥ ते सर्वे आरूपिते श्वि ... सांख्यादयः आत्मनि भिदां भेदं ये च मीमांसका विपणं कर्मफलं स्व ... तेरं ... वदंति ॥ ते सर्वे आरोपितैः ... रोपितैर्धर्मैरेवोपदिशंति ॥ न तत्वं हृ ... सदेव सौम्येदमग्र आसीत ॥ ब्रह्मैव सत् तत् ब्रह्म ... प्येति ... विद्या ... मंतरे वर्त्तमानाः ... एकमेवाद्वितीयं ब्रह्म ॥ एकधा ... स्वयं धीराः पंडितंमन्यमानाः अपि यांति मूढाः अंधेनैव नीयमाना यथांधाः ॥

अवोधात् २ अवोधः २

॥ ॥ जनिमसतः सतो मृतिमुतात्मनि ये च भिदां विपणं मृतं स्मरं तु पदिशंति ते आरूपितैः ॥ ॥

॥ ॥ त्रिगुणमयः पुमानिति भिदा यदवोधकृता त्वयि न ततः परत्र स भवेदवबोधरसे ॥ २५ ॥ ॥

॥ पुरुषस्य त्रिगुणमयत्वं यदि न वेत्तर्हि ... पुरुषस्य त्रिगुणमयत्वे

... तिविरोधमत ॥ किंच ॥ वस्तुतः पुरुषस्य त्रिगुणमयत्वे सर्वमिदं संगच्छे ... नतु तदस्तीत्याह ॥ ... त्रिगुणमयः पुमानित्यनेन हेतुना या भिदा उपलक्षणमेतत् ... त्रिगुणमयः पुमानिति भिदा यदवोधकृता त्वयीति ॥ तर्हि किम ज्ञानमस्ति ॥ वस्तुतः पुंसि नैवेत्याह ॥ ततः अवोधात् परत्र परे त्वयि विषये अवोधकृता ॥ त्वद्विषयाज्ञानविजृंभिता ॥ ... संगे अवबोधरसे ज्ञानघने सः अवोधो न भवेत् ... नीत्यर्थः ॥ ॥ मिथ्यातर्ककर्कशेरितमहावादांधकारांतरभ्राम्यन्मंद मतेरमंदमहिमंस्त्वज्ञानवर्त्म स्फुटं ॥ श्रीमन्माधव वामनत्रिनयन श्रीशंकर श्रीपते गोविंदेति मुदा वदन् मधुपते मुक्तः कदा स्यामहं ॥ २५ ॥

॥वायुरन्यान्‌धावतोतिक्रामति।अस्मिन्नप आनवतीति श्रुतेः।जलानिदधाति॥२॥

यतोवाचोनिवर्त्तन्तेअप्राप्यमनसासह।कोअद्धावेदकइहप्रवोचत्कुतआयाताकुतइयंविसृष्टिः।अर्वाग्देवाअस्यविसर्जनेनैजदेकंमनसोजवीयोनैनंदेवाआप्नुवन्पूर्वमर्शत्।तद्धावतोऽन्यानत्येतितिष्ठत्तस्मिन्नपोमातरिश्वादधातीत्याद्याश्रुतयः॥भगवंस्तत्त्वंदुर्ज्ञेयंवदन्त्योभक्तिमेवोपदिशन्तीत्याहुः।कइहनुवेदेति।बतअहोभगवन्इहजगतिअग्रसरंपूर्वसिद्धंत्वांअवरजन्मलयः अर्वाचीनोत्पत्तिनाशवान्कोनुपुमान्वेदजानाति।ईश्वरस्यपूर्वसिद्धत्वेनस्यअर्वाचीनत्वेप्रमाणंवदन्ज्ञानेकारणाभावमाह।यतउदगादिति।यतःत्वत्तःऋषिर्ब्रह्माउत्पन्नः।यंब्रह्माणमनुउभयेअध्यात्मिकाआधिदैविकादेवगणाउत्पन्नाः।ततोऽर्वाचीनाःसर्वेयदात्वंअनुशायिनांजीवानांज्ञा

कइहनुवेदबतावरजन्मलयोऽग्रसरंयतउदगादृषिर्यमनुदेवगणाउभये।तर्हिनसन्नचासदुभयंनचकालजवःकिमपिनतत्रशास्त्रमवकृष्यशयीतयदा॥२४॥

नसाधनंनास्ति॥यतःतदानसत्स्थूलंआकाशादिनचासत् सूक्ष्मंमहदादिनचउभयंसत्स्थूलमारब्धंशरीरं॥नचकालजवः॥तन्निमित्तभूतंकालवैषम्यं॥एवंसतितत्रतदानकिमपिइन्द्रियप्राणादिपिनचज्ञापकंशास्त्रमपि॥अयमभिप्रायः।अर्वाचीनसृष्टिगतानांदेहाद्युपाधिकृतानांशरीराणांकालवशेनचमर्हतिमसत्त्वान्नतावद्भगवन्नामर्थ्यं।तथाचश्रुतिः।नतंविदाथयइमाजजानान्यद्युष्माकमन्तरंबभूवनीहारेणप्रावृताजल्प्याचासुतृपउक्थशासश्चरन्ति।यदात्वंप्रलयसमयेनैवाद्धतरमात्मनिसर्वमवकृष्यशयीतशेषे।तदापिज्ञानसाधनाभावात्त्वंभगवद्ज्ञानंअतस्त्वदेकशरणानांआश्रवणकीर्त्तनादिभक्तिरेवसुकरेति॥॥कोहंबुद्ध्यादिसंकटबहुचर्मन्वयहंस्तव॥दीनंवैधोदयासिंधोभक्तिंमेवर्हरेदिशौ॥२१॥

[illegible]

नतुमत्वं ब्रु...नमनंतं ब्रह्मनेह नानास्ति किंचन ॥ मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ इत्यादिश्रुतिभिरेवंभूतस्य भगवतः प्र
तिपादनात्तस्य ज्ञानं सुकरमेवेति कृते ... भक्त्या अत आह ॥ नवपरियेचरंतीति ॥ त्वेति कर्मणि षष्ठी ॥ त्वां ये परिचरंति
... सिध्यवहितास्वेति यच्छब्देनव्यवधानमदोषः ॥ केन रूपेण अखिलसत्वनिकेततया ॥ अखिलानि सत्वानि निकेतो यस्य
... स्वभावस्तत्तातया ॥ सर्वभूतावासतयेत्यर्थः ॥ उत एव त्वं विगणय्य तिरस्कृत्य तत एव निर्दहतेर्मृत्योः शिरः मूर्धानं पद
देनाक्रमंति मृत्योर्मूर्ध्नि पदं दधति तरंति मुचंते इत्यर्थः ॥ ये पुनर्विमुखा अभक्तास्तान् गिरा वाचापशूनिव ...
पशूनिव बध्नासि ॥ काम्यकर्मप्रतिपादनशब्देन ॥ कुतः ॥ त्वयि कृतसौहृदाः ॥ कृतं सौहृदं प्रेम यैस्ते ॥ खलु निश्चितं पुनंति प

॥ ॥ तं ये परियैचरंत्यखिलसत्वनिकेततया तउत पदाक्रमंत्यविगणय्य शिरो निर्ऋतेः ॥ ॥ ॥
॥ ॥ परिवयसे पशूनिव गिरा विबुधानपि तांस्त्वयि कृतसौहृदाः खलु पुनंति न ये विमुखाः ॥ २७ ॥
॥ ये विमुखास्ताननु ... पशूनिव बध्नासि ॥ ये त्वयि कृतसौहृदास्ते पुनंति । ये विमुखास्ते न पुनंति ॥ १ ॥ ॥

विश्वयंति ॥ आत्मानं अन्यानपीति शेषः ॥ नेतरे ॥ तथा च श्रुतिः ॥ तस्य वा कुतंतिर्नामानि दामानि तदस्येदं वाचा तंत्या नामभिर्दामभि
भिः सर्वं सितमिति ॥ अयमभिप्रायः सत्यमेवंभूतमात्मानं श्रुतयः प्रतिपादयंति ॥ तत्र च यद्यपि वस्तुनोऽपरोक्षत्वादपरोक्षमेवज्ञा
नमुत्पद्यते तथाप्यसंभावना विपरीतभावनातिरस्कृत्वान्मलिनचित्तेषु परोक्षमिव भवतीति नापरोक्षसंसारभ्रमनिवृत्तिस्सम
र्थं भगवत्परिचर्यया तु सम्यग्गमलचित्तानां त्वत्प्रसादेन लब्धापरोक्षज्ञानानामयं मनस्तत एव ... कालितो मोक्षः इति ॥ तथा च श्रु
तिः ॥ देवत्वा ते देवः परं ब्रह्म तारकं व्याचष्टे ... तेनेनलभ्यः यस्य देवे परा भक्तिरित्यादयः ॥ तपंतु तापैः प्रपतंतु पर्वता
दटंतु तीर्थानि पठंतु चागमान् ॥ यजंतु यागैर्विवदंतु वादैर्हरिं विना नैव मृतिं तरंति ॥ १४ ॥ ॥ ॥ ॥ ॥

मनो हि ... पुरुषस्य नवपत्र ... मैतेहृदयम् ... पुरुषस्यापप ... एवमुक्ते ... सत्वात् ... प्रपंचपुरुष ...
कथं स्यात् । नैव स्यात् । अतः प्रपंचपुरुषमात्मनः ... इति वा ... ॥१॥ ॥ ॥सदिवेति ॥ मनसैव स्फुरितं विश्वम् ... यथा मनः ...
... प्रतीतिर्माया स्फुरिते ... ॥ आत्मविदः ... विश्वमात्मैव ... सदिति ... ॥ कुंडलं स्वर्णस्वरूपमेवेति ... स्वर्णविकारं कुंडलं स्वर्णं ... ॥१॥ ॥

ननु यद्यसन्नोत्पद्यते यदि च त्रिगुणमयः पुरुषो न भवति तर्हीदं प्रपंचजातं पुरुषश्चाप्ययं नास्तीत्युक्तं स्यात् ॥ कथं तर्हि तयोः स
त्वेन प्रतीतिरित्यत आह ॥ सदिवमनइति ॥ मनः मनोमात्रविलसितमिदं त्रिवृत् त्रिगुणात्मकं प्रपंचजातं यत् सदेव सदिव विभाति ॥
कथमिति चेत्तत्राह ॥ त्वयीति ॥ त्वयि अधिष्ठाने अधिष्ठानसत्तया सद्वत्प्रतीयते इत्यर्थः ॥ न केवलमिदं कौशास्पदं किंतु आत्मानुजात्म
नुजः पुरुषः अभिविधावाकारः पुरुषमभिव्याप्येति पुरुषस्यापि इत्थं सत्वप्रतीतिर्मायामनोमात्रविलसितेत्यर्थः ॥ तथा च श्रु
तिः ॥ असतोऽधि मनोऽसृजत ॥ मनः प्रजापतिमसृजत ॥ प्रजापतिः प्रजा असृजत ॥ यद्वा ॥ इदं मनस्येव परमं प्रतिष्ठितं यदिदं कि
मायाधिष्ठितः पुरुषः १

=५ २ १ विश्वं २ ६ ५ २ ३ ४ ५ ६ ३ २ २ विश्वं ४
॥ ॥सदिवमनस्त्रिवृत्त्वयि विभात्यसदामनुजात्सदभिमृशंत्यशेषमिदमात्मतयात्मविदः ॥
॥ ॥न हि विकृतिं त्यजंति कनकस्य तदात्मतया स्वकृतमनुप्रविष्टमिदमात्मतयावसितं ॥ २६ ॥ ॥विश्वमात्मैवेत्यालात ... २
स्वर्णार्थिनः कुंडलादिकं स्वर्णस्वरूपमेव १ निश्चितं

चेति ॥ नन्वात्मविदामपि विश्वं सदेव स्फुरति ॥ अतः कथमसत्त्वं पादत [illegible] आह ॥ सदभिमृशंतीति ॥ आत्मविदस्त्वशेषमिदं भो
क्तृभोग्यात्मकं विश्वं आत्मतयैव सदभिमृशंति ॥ सदिति जानंति ॥ आत्मकार्यत्वान्न पृथगित्यर्थः ॥ तदा ... पुरुषादानं
त्कार्यमभिवनितं तेनैव रूपेण प्रतीयते ... उपादीयते तल्लोकाचारेण दर्शयति ॥ न हि विकृतिमिति ॥ कनक ... कुंडला
दिकं कनकार्थिनो न हि त्यजंति ॥ अत्र हेतुः ॥ तदात्मतया कनकरूपत्वेनेत्यर्थः ॥ अतः स्वेन कृतमिदं विश्वमनुप्रविष्टं च पुरुषरूपं च आ
त्मतयैवावमितं निश्चितं ॥ ॥यत्सत्त्वतः सदाभाति जगदेतदसत्स्वतः ॥ सदाभासमसत्यस्मिन्भगवंतं भजाम तं ॥ ३ ॥ ॥

... पुरुषरूपं विश्वं प्रविशति ... स्वर्णकारणत्वात् ... विश्वं पुरुषरूपं भवति । विश्वमात्मैवेत्यालात ... निश्चितमित्यर्थः २
॥ असत् ... सत्त्वतः सत् आभाति ... अस्मिन् ... सदाभासं तं भगवंतं भजाम इत्यर्थः ॥१॥ ॥

सदिवभाति ४
... प्रकाशात्स्थूल ... कोऽजाते १

प्रपंचपुरुषयोः ... नाम प्रपंचस्य ... स्यासत्त्वेऽनेन ... सदिवभाति ॥ ३
॥ विश्वमनसा ... प्रतीतं ॥ ... इममनस्येव प्रतीत ...
... कार्यस्वकारण ... स्वस्वरूपं जातं २

...कथं तत्तस्य तवा ... स्य ... तस्य ... गोचरस्य ... कथं तत्तस्य तवा अपदस्य वा ज्ञानमनोगोचरस्य ॥ अत एव
शून्यशून्यस्य ... गोचरत्वं ... ॥ २१५ ॥

॥ ईश्वरत्वजननेंद्रियप्रवर्त्तकत्वमेवनकारणं १ ॥ जीवानां ... श्वरः ... श्रुतयो वदंति १

श्री०
ना० द०
उ० वल्ली
११२

तदेवं करणप्रवर्त्तकमीश्वरं करणपरं तं चानराभजंतीत्युक्तं तत्केवलमिदमेव कारणं ॥ ततउत्पन्नं ... त्वादिति वदंति ॥
यथाग्नेः क्षुद्राविस्फुलिंगाव्युच्चरंति ॥ एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एव आत्मनो व्युच्च-
रंतीत्यादिश्रुतपदं तस्मात् ॥ स्थिरचरजातयइति हि विमुक्तनिःसमुक्तं यदितवैर्जयामायया विदरः विहारः क्रीडा भवति तदा स्थि-
रचरजातयः स्थिराश्चराश्च जातयः जात्यालिंगिता देहा येषां ते जीवाः स्युः भवेयुः ॥ कथंभूतं तस्यं ततोजातं परस्य दूरे वर्त्तमानस्य
... स्य संसोत्पर्थः ॥ कथं विहारः उदीक्षयाईक्षणलेशेन ॥ ननु मयि लीनानां कथं जन्म स्यात्तत्राह ॥ उत्पनिमित्तयुज इति ॥ ईक्षयेव
... आविर्भूतानि निमित्तानि कर्म्माणि तद्युक्तानि लिंगशरीराणि वा ॥ तैर्युज्यत इति तेन यो ॥ ननु किंनिमित्तोत्थाने न मदिक्षण

जीवाः १ कर्म १ क्रीडा भवति १ जीवात् १

॥॥ स्थिरचरजातयः स्युरजयोत्थनिमित्तयुजो विहर उदीक्षया यदि परस्य विमुक्ततत तः ॥ ॥ तवेत्यस्य विशेषणं २
॥ न हि परमस्य कश्चिदपरो न परश्च भवेद्वियतइवापदस्य तवशून्यतुलां दधतः ॥ २५ ॥

वाङ्मनसोरगोचर शून्यसाम्यं भजत तस्य वा १
स्य १

जीवाः १ ते
वभवंतु ॥ न त्वयि वैषम्याभावात् विषमसृष्टेर्योगादित्याह ॥ परमस्येति ॥ तव परमस्य उत्तमस्य परमकारुणिकस्य वियत इवाका- ईश्वरात् २
शस्येव आकाशसदृशस्येत्यर्थः ॥ कश्चिदपरः स्वीयः परो स्वीयश्च न भवेन्न संभवतीत्यर्थः ॥ असदा इदमग्र आसीत्ततो वै सदजायत
तदेव ... ॥ शून्यतुलां दधतः शून्यसाम्यं भजतः तदेवं दर्शयितुं पुनर्हि शिन- श्रीक ... स्य
साधीः अत्मनः शून्यपूर्वकत्वमिवेप्रतीयते तदर्थं पुनर्विशिनष्टि ॥ ११२
अपदस्येति ॥ न पद्यत इति अपदः तस्य वाङ्मनसयोरगोचरस्येत्यर्थः ॥ ॥ त्वदीक्षणवशक्षोभमायावोधितकर्म्मभिः ॥ जा-
तान्संसरतः खिन्नान्नित्यं हरे पाहि नः पितः ॥ ६ ॥ ॥ अतस्त्वं उत्पन्नानां जीवानां तव जनन मावश्यकमितिभावः ॥ १ ॥ ॥ शून्यसमलमेवर
असमान् १ अपदस्य ईक्षा

एसंबंधात्क इति नोक्तं। दिकं नवक्तव्यं। किं त्वं वे घाताश्च तम तो जीवानाम् ... तत्तुल्यत्वमिति विशेषाभावात् स्वीकृतीव यो सेव्यसेवकत्वं न स्यादित्याशंका।।२।।
।। त्वमिति।। हे भगवन् त्वं चक्षुरादिकरणरहितः एव सर्वप्राणीन्द्रियशक्तिप्रवर्त्तकोसि। यतः स्वराट्। स्वयंप्रकाशस्वरूपत्वादेव। पवमंडलेशाः स्वप्रजादत्तबलिं गृह्णाति। सर्वप्रतेर्बलिं ददाति
तथा विश्वसृजो ब्रह्मादयो देवा मनुष्या दत्तं बलिं तुभ्यं ददति। तव च बलिं वहंति। अतो देवा त्वदाज्ञानुकूलाः त्वत्तो भीता एव सेवंते।। अत एव यस्मिन् कर्मणि त्वया देवा नियुक्तास्ते तत्कर्म त्वत्तो भी
तास्संतः कुर्वंति।। अतोऽनंतवसमः कश्चिदितित्वं सर्वैः सेव्य इति निरवद्यम्।।१।। ।। ।।

।। तथा त्वं। संबंधात्क इति वनं। त्वं भगवतो न व। तइति चेत।।१।।

ननु यदि अखिलसत्वनिकेतत्वेन भगवतः सेव्यत्वमुच्यते तर्हि तत्तत्करणसंबंधात्कर्तृत्वभोक्तृत्वे प्रसज्येयातां।। न च भक्ततस्तथात्वमिति चे
त्तर्हि जीवानामपि तत्तुल्यत्वमिति केन विशेषेण पुनः सेव्यसेवकत्वमिति तामिमामाशंकां परिहरंत्यः।। अपाणिपादो जवनो ग्रहीता पश्य
त्यचक्षुः सुशृणोत्यकर्णः।। स वेत्ति वेद्यं न च तस्यास्ति वेत्तातमाहुरग्र्यं पुरुषं महांतमित्याद्याः श्रुतयः स्तुवंति त्वमकरण इत्या
दि। त्वं करणैः संबंधरहितः एव अखिलकारकशक्तिधरः अखिलानां प्राणिनां यानि कारकाणि इंद्रियाणि तेषां शक्तीः धारयति प्रव
र्त्तयतीति तथा।। कुतः स्वराट् यतः स्वेनैव राजसे दीप्यसे।। न हि स्वतः सिद्धज्ञानशक्तेरिंद्रियापेक्षेत्यर्थः।। अतस्तव बलिं उद्वहंति

।। ।।त्वमकरणः स्वराडखिलकारकशक्तिधरस्तव बलिमुद्वहंति समदंत्यजयानिमिषाः।। ।।
।। ।।वर्षभुजोऽखिलक्षितिपतेरिव विश्वसृजो विदधति यत्र ये त्वधिकृता भवतश्चकिताः ।।२८।।

पूजां कुर्वंतीति।। अजया अविद्यया सहिताः तया आहता इत्यर्थः।। अनिमिषा देवा इंद्रादयः तत्स्रष्टारो विश्वसृजो ब्रह्मादयोपि। यथा स
स्वीकाएव किंकराः स्वामिनं सेवंते तथा अविद्यायुक्ता देवादयस्त्वामिति लोकोक्तिः।। समदंति च मनुष्यैर्दत्तं हव्यकव्यादिलक्षणं ब
लिं भक्षयंति अत्र दृष्टांतः। वर्षभुजोऽखिलक्षितिपतेरिवेति। यथा वर्षभुजः खंडमंडलपतयोऽखिलक्षितिपतेर्म्महीमंडलेश्वरस्य
स्वप्रजादत्तबलिभुजो बलिं उद्वहंति तद्वदिति।। कथं बलिं वहंतीति। तदाह। विदधति यत्र ये त्वधिकृता भवतश्चकिता इति।। त्वत्तो भीताः
संतो यस्मिन् कर्मणि येन नियुक्तास्तेन तत्कुर्वंतीति।। त्वदाज्ञापालनमेव बलिवहनमित्यर्थः।। तथा च श्रुतिः।। भीषास्माद्वातः पवते
भीषोदेति सूर्यः।। भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति।। ।। अनिंद्रियोपि यो देवः सर्वकारकशक्तिधृक्।। सर्वज्ञः सर्वक
र्त्ता च सर्वसेव्यं नमामि तं।।१५।।

[illegible] नेत्यवसंयोगतः परिणामपरिलक्षित विकारस्य जीवस्य नियामकं भवेदिति वक्तुं श[illegible]

[illegible] विकार [illegible] नियमरे॥ [illegible] विकारे घुञ्जीते घुनु स्मृतमित्यर्थः॥ [illegible]

[illegible] ईश्वरा [illegible] विज्ञात [illegible] ईश्वरं

[illegible] मतं [illegible] नीम इति वद [illegible]

कथं यन्मयं [illegible] यद्विकारशायं जीवाख्यं अजनि [illegible] मत्यादिश्रुतिवलाद् विकारस्य नियतं नियामकं भवेत्। अविमुच्यकारणं तया॥

अपरिलक्ष्य। किं नत॥ ममं मनुस्मृतं॥ ननु किं यत्तत्त्वं दृग्गीयते चेदुच्यते इदं तदिति॥ अत आह॥ अनुजानतां यदमतमिति जानीमह

तिवदतां यदमतमविज्ञातप्रायं अविषयत्वात॥ तथा च श्रुतिः॥ यस्यामतं तस्य मतं मतं यस्य न वेद सः॥ अविज्ञातं विजानतां विज्ञा

तमविजानतां॥ अवचनेनैव प्रोवाचेत्यादि॥ किंच मनस्यज्ञातस्य दुष्टतया दोषश्रवणात॥ तथा च श्रुतिः॥

तो दोषश्रवणादित्यर्थः॥ ईश्वरं जानीमह इति वदतामीश्वरोऽविज्ञातप्राय इत्यत्र श्रुतिं प्रमाणयति॥ यस्यामतमिति॥ यस्य जीवस्येश्वरास्वंत्रमविज्ञातप्रायं न भवति त

स्य तदमतं ज्ञातप्रायं न भवति॥ यो ब्रूते हमीश्वरं न जानामीति तस्येश्वरज्ञानं न भवतीत्यर्थः॥ यस्य च जीवस्येश्वरारूपं मतं ज्ञातप्रायं स ईश्वरं न वेद। यो ब्रूते हमीश्वरं जा

"ईश्वरं जानामीत्येवमीश्वरज्ञानविशिष्टस्य दोषश्रवणादित्यर्थः॥

॥ ॥ अजनि च यन्मयं तदविमुच्य नियंतृ भवेत्सममनुजानतां यदमतं मतदुष्टतया॥२७॥ ॥

नामीति तस्येश्वरज्ञानं न भवतीत्यर्थः॥ एतदेवाह॥ अविज्ञातं विजानतामिति॥ यो ब्रूते हमीश्वरं जानामीति तस्य दोषप्रतिपादिकां श्रुतिमाह। यदि मन्य

से इति॥ हे जीव अहमीश्वरं सम्यग्वेदेति त्वं यदि मन्यसे तदा सूक्ष्ममपि त्वं वेत्थ। अस्य ब्रह्मणो वेदेषु यद्रूपमक्तं तदपि त्वं वेत्थ जानीहि॥ सूक्ष्मब्रह्मरूपाज्ञान

नमेव जानामीति वकुर्दोष इति भावः॥ ॥ ॥

यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं यदस्य त्वं वेदेष्वित्यादि॥ तस्माद्यत्तेष्टाद्वौ वद्योत्यमतत्तं किमपि सद्दृष्टिनु

स्मृतत्वेन समनियंतृ भवेदित्यर्थः॥ ॥ अन्तर्यामी सर्वलोकस्य गीतः श्रुत्यायुक्त्या चैवमेवावसेयः॥ यः सर्वज्ञः सर्वशक्तिर्नृसिं

हः श्रीमंतं तं चेतसैवावलंबे॥२७॥ ॥ ॥ ॥श्रीगोपीजनवल्लभाय नमः॥ ॥

॥अतो जीवा नियम्याः। ईश्वरो नियामक इति सिद्धम्॥२॥

यन्मयं तदिति ३३

एवं तावत्परमात्मनः सकाशादविद्यातत्कार्योपाधयस्तदंशा एव जीवा जाताः संसरंतो भजंतीत्युक्तं। तत्र यद्येकाविद्या तदा जीवस्यापेक्षत्वात् एकमुक्तौ सर्वमुक्तिप्रसंगः। अथ नानाविद्यास्तर्हि तस्यैवांशांतरेण संसारानपगमाद्दनिर्मोक्ष इत्यादितर्कबलेनैव स्तु तएव नानात्मानः तत्र च तेषामणुत्वे देहव्यापि चैतन्यं न स्यात्। देहपरिमाणत्वे च मध्यमपरिमाणेनां सावयवत्वेनानित्यत्वं स्यात्। अतः सर्वगता नित्याश्चेति केचन मन्यंते। तत्र नतावदुक्तदोषप्रसंगः। अविद्याभेदेन तच्छक्तिभेदेन वा बद्धमुक्तव्यवस्थासंभवात्। ईश्वर

मनः प्रतिबिंबसलाञ्जेला कूं प्रतिबिंबस्यैव तत्र विद्यायां प्रतिबिंबितं चैतन्यं जीवः। स चैक एव। ननु जीवस्यैक्ये बंधमोक्षौ कथमिति चेद्बूमः। अंतःकरणानां नानात्वेन प्रमातृणां नानात्वात् तत्तज्ज्ञानेनैकस्मिन्मुक्तमाने तत्तज्ज्ञानरहितो न्यो बद्ध एवेति। अथ मतांतरं। अज्ञानं नाना। तत्तत्समष्ट्युपहितं चैतन्यमीश्वरः। तद्व्यष्ट्युपहितं चैतन्यं जीव इति। अन्ये तुकारणीभूताज्ञानोपहितं चैतन्यमीश्वरः। अंतःकरणोपहितं चैतन्यं जीवः। कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इति वचनादित्याहुः॥ ॥

॥ ॥अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगतास्तर्हि न शास्यतेति नियमो ध्रुव नेतरथा॥ ॥

अनंताः १ नित्याः जीवाः व्यापकाः जीवानां १ एताः

॥सर्वपदैर्नश्वरस्य संसारेण नवृत्तिः१ जीवा अनंतास्तिस्याः सर्वगताश्चेति पक्षं१ ॥अस्य पक्षस्य पदे व्याप्तिः एवैकाद्यैर्ज्ञाता ते दोषाः यं पदोक्तं सिद्धत्वमिदं॥१॥ एवमप्यताः२

स्यातु न केनाप्यंशेन संसारांशं के सुक्तमेवं प्रसिद्धं चात्मैक्यं सर्वश्रुतिषु। किंचेमं पक्षमंतर्यामिब्राह्मणमपि न सहत इत्याह। अपरिमिता इति। वस्तुत एवानंताः ध्रुवाः तेनैवरूपेण नित्याः सर्वगताश्च तनुभृतो जीवाः यदि स्युः तर्हि तेषां समत्वात् शास्यतानैव घटत इति कृत्वा हे ध्रुव नियमो नियमनं त्वया न स्यात्। इतरथा चाल्यते॥ ॥ ॥श्रीगोपीजनवल्लभाय नमः॥ ॥

॥जीवानां तस्मानकार्यकारिता तेषां नियामकत्वं तवेश्वरस्य न स्यात्। पचमदुतिं॥ ॥ नियामकत्वे त्रिकालांतं ते एवं संभवति। तदेवाह॥१॥ जीवानां ॥ एको जीवः उपदेष्टा स एव उपदेष्टा न तु न वसिद्धलोकप्रसिद्ध न स्यात्२

॥अहरहः संध्यामुपासीत ... लोकः विधिपादे वलोकः॥ दर्श ...
दित्यादिशते जीवा नियम्याः ईश्वरः ... जीवा नियम्याः। दृ ...
... जीवा नुपदिशति॥ यथा यथा कर्म जीवः करोति तथा तथा फलं मीश्वरो
... जीवानां ... व्यापकानुस्यूतस्य तत्तस्य ... स्यात्॥ ...

वमेकमेवावृणोति ॥ अजामेकां त्वं व [illegible] शीवाश्रयं यमात्मेत्यादिश्रुतिबलात् उत्पत्तिमत्वाज्जीवानामौपाधिकमेव जन्मनस्वतइत्यर्थः ॥
उपाधिलयेन परमात्मनि पुनर्लयश्च तस्मादपि न वास्तवं जन्मेत्याह ॥ त्वयि तइति ॥ त्वयि कारणात्मनि तइमे जीवाः तत इति यतोनवा
स्तवजन्मानस्तस्मात् विविधनामगुणैरनेकप्रकारकार्योपाधिभिः सह लिल्युः ॥ लीनाबभूवुः ॥ तत्र सुषुप्तिप्रलययोः मधुन्य
शेषरसा इवलीयंते ॥ यथा मधुनि सकलकुसुमरसा विशेषतोनुपलक्ष्यमाणा अपि सामान्येनोपलभ्यंते ॥ एवं स्वापादौ विशेष
मात्र [illegible] तत्कारणस्य विद्यमानत्वात् सामान्यतो वर्तते ॥ मुक्तौ तु कारणस्यापि लयात् त्वयि परमेनि [illegible] रितइत्यर्थः
[illegible] तिविवेकः ॥ तथा च श्रुतिः ॥ यथा सौम्य मधु मधुकृतो निस्तिष्ठंति नानात्ययानां वृक्षाणां रसान् समवहारं
[illegible] एकतां गमयंति ॥ ते यथा न विवेकं लभंते अमुष्याहं वृक्षस्य रसोस्म्यमुष्याहं वृक्षस्य रसोस्मीत्येवमेव खलु सौम्येमाः [illegible]
संति [illegible] न विदुः ॥ सति संपद्यामहइति ॥ यथा नद्यः स्यंदमानाः समुद्रेस्तं गच्छंति नामरूपे विहाय ॥ तथा विद्वान्नामरूपाद्विमुक्तः
पर [illegible] पुरुषमुपैति दिव्यमित्याद्याः ॥ ॥ यस्मिन्नुद्यद्विलयमपि यज्ज्ञाति विश्वं लयादौ जीवोपेतं गुरुकरुणया केवलात्मावबो
धे । [illegible] पैतांतं व्रजति सह मा सिंधुवत्सिंधुमध्ये मध्ये चित्तं त्रिभुवनगुरुं भावयेतं नृसिंहं ॥ २७ ॥ ॥ ॥ ॥ ॥

[illegible] ॥ अग्नेरापः ॥ अद्भ्यः पृथिवी जायते ॥ इमान्यपंचीकृतानि तन्मात्राणि त्रिगुणमायाकार्याणि ॥ यद्यपि तन्मात्रेषु गुणानोपलभ्यंते तथापि तत्कार्येषु गुणदर्शनात् तेष्वपि सत्वादिगुणा अनुमातव्याः ॥ [illegible]

नतु च यदि परमात्मनो जीवा जायंते इति नियंतृनियम्यभाव उच्यते। तथा सति जीवानामनित्यत्वप्रसंगेन प्रतिदिनं कृतनाशाकृ-
ताभ्यागमनप्रसंगः स्यात्। किंच। तदा मोक्षो नाम जीवस्य स्वरूपहानिरेव स्यात्। न चैतद्युक्तं॥ स्वप्रकाशानंदात्मनोऽविद्याकृता-
नर्थनिवृत्तिमात्रस्य मोक्षत्वाभ्युपगमादित्याशंक्योपाधिजन्मनैव जन्म जीवानामुच्यते॥ न स्वतो घटनादित्वात्॥ न घटत इति॥
तत्र किं प्रलये तेषां जीवरूपेणावस्थानं स्यात् पुरुषस्य वा उभयोर्वा द्वयोर्हि जीवानां जडत्वापत्तिः द्वितीये पुरुषस्य विकारित्वप्रसंगः। अ-
त एवं न तृतीयं द्रष्टा श्रायते नो। प्रकृतिपुरुषयोरुभयोर्न घटत इति श्रुत्या जत्वप्रतिपादनादपीत्याह॥ अजयोरिति॥ तथा च श्रु-
तिः। अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः जनयंतीं सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इति

शुक्लः १

॥ ॥न घटत उद्भवः प्रकृतिपुरुषयोरजयोरुभययुजो भवेत्सुभृतो जलबुद्बुदवत्॥ ॥

॥ ॥त्वयि त इमे ततो विविधनामगुणैः परमे सरित इवार्णवे मधुनि लिल्युरशेषरसाः॥३१॥

... समानाधिकरणकृतेः कारणत्वम्।

उभययुजोऽनुभवंति। भवंति च तद्युज्यत इति युक्तं संवदं परस्परास्पृष्टमितियावत्। तेन असुभृतः प्राणोपाधयो जीवा जायंते
इत्यर्थः। जलबुद्बुदवदिति॥ यथा केवलेनानिलेन सलिलेन वा जलबुद्बुदा न भवंति। किंतु मिलिताभ्यां तद्वत्॥ तत्र च यथानिलो
निमित्तं जलमुपादानं एवमत्रापि प्रकृतिर्निमित्तं पुरुष उपादानं तस्माद्वा एतस्मादात्मन आकाशः संभूतः सोऽकामयत बहु स्यां प्र-
जायेयेत्यादि॥ यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एते आ-
त्मनो व्युच्चरंतीत्यादि श्रुतिषु चेतनाचेतनप्रपंचस्य परमात्मोपादानत्वश्रवणात्। न च विकारित्वं परिणामानंगीकारात्॥ केचित्तु
नः परिणामभंगी ... नोदिकर्तायेया विपरीतं निमित्तोपादानभावमिच्छंति। सर्वथापि तावाप् ... ह्यति पुरुषेवराः ...

॥ विजितेंद्रियैर्वशीकृतेंद्रियप्राणैरपि दुर्दांतं मनस्तुरंगं वशीकर्तुं ये यतंते ते गुरुचरणमनाश्रित्य उपायखिदः संतः व्यसनाकुलाः संसारार्णवे दुःखमेव यांति ॥
॥ अकृतकर्णधारा वणिज इव ते सीदंति ॥ अतो गुरुचरणाश्रयणमावश्यकं गुरुचरणसेवयैव मनो वशं भवतीति भावः ॥

॥ ते अजा ॥ २॥ ॥ करतलामलकवद् ... समीपगमनं ... उपकारपालिः

सत्त्व भगवति भावो मनो नियमयति भवेत् सोऽपि गुरुप्रसादनादिति गुरूपसदनं विदधतीति तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः
श्रोत्रियं ब्रह्मनिष्ठं आचार्यवान्पुरुषो वेद नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठेत्याद्याः श्रुतय इत्याह। विजितहृषीक
वायुभिरिति। विजितानि हृषीकाणीन्द्रियाणि वायवः प्राणा यैस्तैरपि अदांतं मनस्तुरगं अदांतमदमितं मन एव तुरगः दुर्दमत्वसाम्यात्
अनाश्रित्य उपायेषु खिद्यंत इति उपायखिदः सं
तः ते यंतुं नियंतुं प्रयतंते। अतिलोलं अतिचंचलं। गुरोश्चरणं समवहाय अनाश्रित्य संसारसमुद्रे सीदंति तिष्ठंति दुःखमेव प्राप्नुवंतीत्यर्थः। हे अज अकृतकर्णधरा अस्वी
नः व्यसनशतान्विताः वणिज इव अनाकुलाः

॥ ॥विजितहृषीकवायुभिरदांतमनस्तुरगं य इह यतंति यंतुमतिलोलमुपायखिदः॥ ॥
॥ ॥व्यसनशतान्विताः समवहाय गुरोश्चरणं वणिज इवाज संत्यकृतकर्णधरा जलधौ॥२०॥

कृतकर्णधारिका वणिजो यथा तद्वत्॥ उक्तं च॥ नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं मयानुकूलेन नभस्वतेरितं
पुमान्भवाब्धिं न तरेत्स आत्महा॥ प्राकृतैः संस्कृतैश्चैव गद्यपद्याक्षरैस्तथा॥ देशभाषादिभिः शिष्यं बोधयेत्स गुरुः स्मृतः॥
गुरुणोपदर्शितभगवद्भजनसुखानुभूतौ तु स्वत एव मनो निश्चलं भवति नान्यथेति भावः॥ ॥ यदा परानंदगुरो भवत्पदे पदं मनो
मे भगवँल्लभेत॥ तदा निरस्ताखिलसाधनश्रमः श्रयेय सौख्यं भवतः कृपातः॥२०॥ ॥ ॥ ॥ ॥ ॥

श्री० भा० द० उ० ११५
श्रीकृष्ण ११५

॥ नृषु तु इति ॥ हे भगवन् अतो बुधाः जीवेषु तव मायया संसारं भ्रममवगत्य त्वयि अनुवृत्तिं कुर्वन्ति ॥ कथं भूतं भ्रमं पुनः पुनः संसारप्रदं ॥ त्वय्यनुवर्त्तन फलमाह
कथमिति ॥ अनुवर्त्तितां त्वामेव शरणं कुर्वन्तां जीवानां संसाररूपभयं जन्ममरणादिदुःखं कथं भवेत् नैव भवति ॥ यतस्तव भ्रूकुटिरूपस्त्रिनेमिः कालो ऽभक्तेषु जन्ममरणादिरूपं भयं करो-
ति अतः संसारनिवृत्त्यै धीरास्त्वयि भावं कुर्वन्तीत्यर्थः ॥१॥ ॥ ॥ प्रथमभक्तो नृत्वीभ्यां जनादीनि परीत्य ज्ञानी सत्त्वस्वरूपात्मानं स्वरूपं स्वस्वपे प्रविशन्ति ॥२॥ ॥

ज्ञानादि॰२ संसारभ्रम॰१

एवं तावत्परमेश्वराज्ञीवाज्ञायंतेतच्छेषेणकर्माणि कुर्वंति पुनस्तत्रैव लीयंत इति संसारभ्रमणमुक्तं ॥ इदानीं तन्निवृत्त्य-
पेपरीत्य भूतानि परीत्य लोकान्परीत्य सर्वाः प्रदिशो दिशश्च ॥ उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेशेत्याद्याः भ-
गवदनुवृत्तिं विदधतीत्याह ॥ नृषु तवेति ॥ नृषु जीवेषु मायया भ्रममुक्तलक्षणमवगत्य ज्ञात्वा सुधियः भृशं त्वयि
अभवे भवनिवर्त्तके भावमनुवृत्तिं दधति कुर्वंति ॥ अनुप्रभवं प्रभवमनु प्रभवो यस्मिन् [illegible] तं धर्मं नैतैः किं मतं अत आह ॥ कथमिति
॥ नमविशेषणं । वारंवारं जन्म यस्मिन् ॥१॥

॥ ॥ नृषु तव मायया भ्रमममेष्ववगत्य भृशं त्वयि सुधियो ऽभवे दधति भावमनुप्रभवं ॥ ॥
॥ ॥ कथमनुवर्त्ततां भवभयं तव यद्भ्रुकुटिः सृजति मुहुस्त्रिनेमिरभवच्छरणेषु भयं ॥२८॥ ॥

तां भजतां । यतः ।

जन्ममरणादिभयरूपं

अनुवर्त्तमानानां त्वामेव शरणं भजतां भवभयं संसारभयं कथं भवेन्न कथंचिदपीत्यर्थः ॥ कुतः यद्यस्मात्तव भ्रूकुटिः
भ्रूभंगरूपस्त्रिनेमिस्त्रिस्त्रो नेमयः इवांवच्छेदाः शीतोष्णवर्षाकाला यस्य संवत्सरात्मकस्य कालस्य सः अभवच्छरणेषु न भवा-
नृ शरणं रक्षको येषां तेषु एव भयं जन्ममरणादिलक्षणं [illegible] सृजति करोति ॥ अत एवं भूतं संसारमाकलय्य तन्निवृत्तये सुधि-
यस्त्वयि भावं विदधतीति ॥ ॥ संसारचक्रक्रकचैर्विदीर्णमुदीर्णनानाभवतापतप्तं ॥ कथंचिदापन्नमिह प्रपन्नं त्वमुद्धर-
श्रीनृहरे नृलोकं ॥२८॥ ॥ ॥ श्लोकं ॥ ॥ ॥ श्रीगोपीजनवल्लभायनमः

श्री० भा० द० मा० २६

॥ संसारे भगवद्भजनेन सारा... तत्सर्वं मे मा... तैः सारासारविवेकेन भगवद्भजनं सर्वतः सारत्वेन ज्ञातं ॥१॥ ॥ भुवीति ॥ हे भगवन् ते तव ये ब्रह्मक...
... [illegible] ... तेषां सेवंते ॥ बाधितं भगवद्भजनेन ... मानां तेनाऽपि सेवंते अत...
... [illegible] ... सेवंते ॥ नित्यसुखेऽत्मनि ... मनो दधति ... नैवं ...
न मे ... भावः ॥ ... ॥१॥ ॥
... [illegible] ... संगमावश्यकं ... भावः ॥१॥ ॥

एवं गुरूप... [illegible] ... सारविवेकेन च समर्थतो निर्विघ्नतं देव महत्संगे नापद्यंते ॥ भुवि पुरु पुण्यतीर्थसद्
नानि मुनयः पर्यटंतीति मंतव्यम् इत्यादि श्लोकद्वयमाह ॥ भुवि पुरु पुण्यपतीति ॥ ते उक्तलक्षणा मुनयो विमदा निरहंकाराः ॥ यतो
वत्पदांबुजं हृदये येषां ते ॥ अतः स्वयमेव अघभिदंघ्रिजलाः अघभिदंघ्रिजलं येषां ते ॥ उत अपि तथाविधा
पि पुरूणि बहूनि तीर्थानि सदनानि क्षेत्राणि तान्येवापासंते सेवंते ॥ प्रायस्तत्रैव महत्संगो भवतीति ॥ अघबहुरु अधिकं
भगवद्भजनलक्षणं पुण्यं येषां तानि तीर्थानि च गुरवः महांत इत्यर्थः ॥ तेषां सदनानि आश्रमान् ॥ यथाहामरसिंहः ...

॥ ॥ भुवि पुरुपुण्यतीर्थसदनान्यृषयो विमदास्त उत भवत्पदांबुजहृदोऽघभिदंघ्रिजलाः ॥ ॥
॥ ॥ दधति सकृन्मनस्त्वयि य आत्मनि नित्यसुखे न पुनरुपासते पुरुषसारहरावसथान् ॥२२॥

यस्मिन् पि... जले गुराविति ॥ न पुनः पुरुषसारहरान् आवसथान् उपासते ॥ पुरुषाणां सारं विवेकधैर्यक्षमाशांति सुखं हरंतीति त
थाते च ते आवसथा गृहाः ताञ्च न च तेषां गृहादिभवकुत्सितसुखापेक्षा स्यात् ॥ दधति सकृन्मनस्त्वयि आत्मनि नित्यसुखे इति ॥
सकृदपि कदापि त्वयि ये मनो दधति ते पि गृहाद्यासक्ता न भवंति ॥ किं पुनरेवंभूता इत्यर्थः ॥ ॥ भुंचन्नंगं तदंगसंगमं निशं त्वामेव सं
चिंतयन्न् संतः शंति यतो य लोगत... नानाश्रमान् आवसन् ॥ नित्यं त्वन्मुखपंगजाद्विगलितं त्वत्पुण्यगाथामृतस्रोतः संप्लवसंप्लुतो
नरहरेन स्वामहं देहभृत् ॥२२॥ ॥ ॥ ॥ ॥ श्रीगोपीजनवल्लभाय नमः ॥ ॥

॥ भुंचन्निति ॥ हे अंग नरहरे श्रुतिमुखकमलाद्विनिःसृतं ... त्वत्पुण्यगाथामृतस्रोतः ... न स्यामहं ... किं कुर्वन् ... तदेतच्छरीरसंगंत्य
जन् ॥ पुनः किं कुर्वन् ... त्वामेव संध्यायन् ॥ पुनः किं कुर्वन् ... संति तान् आश्रमान् आवसन्न् इत्यर्थः ॥२३॥ ॥

श्रीकृष्ण
११६

परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । इति मोक्षः कर्मणा कृतेन ॥ तथा यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः

॥ अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इत्याद्याः वैराग्यमंगं विदधतीत्याह ॥ स्वजनसुतेति ॥ आत्मा देहः धामगृहं असुः प्राणः स्वजनादिभिः किं सर्वरसे सर्वे रसाः सुखानि विद्यन्ते यस्मिन् तस्मिन् त्वयि परमानंदे एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेः ॥ अयतः ॥ त्वां सेवमानस्य पुंसः ॥ आत्मनि सति नृणां तुच्छैरेतैः किं क उपयोगः ॥ इति तत्सर्वं परमार्थसुखमजानन्तीति

॥ स्वजनेति ॥ हे भगवन् सर्वसुखवति परमानंदस्वरूपे त्वयि सति अयतः त्वां सेवमानस्य पुंसः स्वजनसुतादिभिः किं भवति । न किमपि ॥ परमानंदे आत्मनि सति नृणां तुच्छैः सुतादिभिः क उपयोगः । न कोऽपि ॥ इति एवं तत्त्वं ...

॥ स्वजनसुतात्मदारधनधामधरासुरथैः ॥ त्वयि सति किं नृणां श्रयतः आत्मनि सर्वरसे ॥ ॥

॥ ॥ स्वजनसुतात्मदारधनधामधरासुरथैः ॥ त्वयि सति किं नृणां श्रयत आत्मनि सर्वरसे ॥ ॥

॥ ॥ इति सदजानतां मिथुनतो रतये चरतां सुखयति को न्विह स्वविहते स्वनिरस्तभगे ॥ २१ ॥ ॥

आनंदरूपः ३

अजानतश्चरतः पुरुषान् ॥ केतां स्त्रीपुमांसौ एवं मिथुनतः स्त्रियामिथुनी भूय रतये मायासुखाय चरतां प्रवर्त्तमानानां कर्माणि षष्ठी ॥ अजानतश्चरतः पुरुषान् ॥ को न्विह स्वतएवनश्वरे स्वनिरस्तभगे स्वतएव गतसारे ॥ पातु अर्थं सुखयति आनंदयति न कोऽपीत्यर्थः ॥ इह संसारे कथंभूते स्वविहते स्वतएव नश्वरे स्वनिरस्तभगे स्वतएव गतसारे ॥ स्वविहते अज्ञानेनाहते ॥ स्वतएव सुखांतरेतु स्वविहते ॥ नन्वात्मा चिदानंदस्वरूपः तर्हि विषयासंगेऽपि किं न तथा न भवतीत्यत आह ॥ स्वविहते अज्ञानेनाहते ॥ अतस्त्वजनमेवोचितमित्यर्थः ॥

निरस्तभगे ॥ सुष्ठु निरस्तो भगो ज्ञानानंदस्वरूपं यस्य तस्मिन् ॥ कृत्यस्यैतद्विशेषणद्वयं ॥ अतस्त्वभजनमेवोचितमित्यर्थः ॥ ॥ २२ ॥ ॥ ॥ ॥

॥ ३४ ॥ भजतोऽहि ... आत्मानंदवित्त्वनः ॥ आत्मैव किं मतः क्व त्वं तुच्छदारगृहादिभिः ॥ ... अज्ञानाद तत्त्वादेवात्मनि निरस्तभगे सति कः सुखयतीति ...

॥ आत्मनि अज्ञानेनाहते सति कः सुखयति ॥

क्ष॰ हरि ए॰ कर्णिकः स्यात्स एकोऽपदेके पिच॥
तद्दत्तत्त्वेनेन२

२० वि॰ १२७

...मवस्तुनः सत्यभावेनास्त्येवसतः उपादानत्वं॥ एवं भूतस्य चनवस्तु
त्वाशंक्य। तत्तुल्यमात्रापातिदूषयति॥ नतयोभयथुगिति॥ अयमर्थः॥ अत्राप्यविद्याद्युक्तस्यैवसतः उपादानत्वं॥ एवंभूतस्य चनवस्तु
सत्त्वं॥ ...पादानत्वमोसिद्धमितिनवस्तुसत्त्वं प्रपंचस्येति॥ ननुमाभूदनेनहेतुना प्रपंचस्य सत्यत्वं॥ हेत्वंतरेणतुसाधया
मः॥ तथाहि॥ मादिदं अर्थक्रियाकारित्वात्तन्मदेवं नतदेवं॥ यथाशुक्तिरजतमिति॥ तत्राह॥ व्यवहृतयेविकल्प इतिव्यवहा
रायचअर्थक्रियार्थविकल्पः भ्रमः॥ इषितः॥ इष्टएवकूटकार्षापणादिनापिक्वचिद्व्यवहारदर्शनात्॥ नन्वेकत्र सत्ताभ्रमारो
पोभ्रमः प्रसिद्धः अत्यंतासत्यकल्पेऽपि प्रपंचभ्रमः स्यात्॥ सत्वेवनोभ्वेतसिद्धिउक्तंचभेदैः॥ अयमस्यतेरवपुष्पत्वमसत्कल्पमव
स्तुनि॥ प्रज्ञानगुणसत्ताकमध्यारोप्यतवानवतिनेत्याह॥ अंधपरंपरयेति॥ अंधपरंपरयायोविकल्पइत्यर्थः॥ अयंभा
वः॥ संस्कारजन्योभ्रमः संस्कारसिद्धयेपूर्वप्रतीतिमात्रमपेक्षतेनवस्तुसत्वंप्रतीतौसत्यांवस्तुसत्वाभावेनभ्रमव्याति रे
कादर्शनात्॥ अतोअनादित्वात्॥ पूर्वपूर्वभ्रमदृष्टस्योत्तरोत्तरआरोपोभविष्यति अंधपरंपरान्यायेनचव्यावहारः॥ से
व्यती प्रयोजकोहेतुरिति॥ नन्वक्षय्यंहवैचातुर्मास्यस्ययाजिनःसुकृतंभवति॥ अपामसोमममृतत्वावरइत्यादिभिःक
र्मफलस्यानित्यत्वप्रतिपादनाद्दमत्वंनघटतेनहिनित्यंवस्तुत्रसंभवति॥ तस्माद्वेदप्रतिपादितार्थत्वेनसदेवस्याशंक्याह॥
सनयतीति॥ हेभगवन्तेतवभारतीवेदलक्षणाउरुवृत्तिभिर्वक्रीभिर्गौणलक्षणादिवृत्तिभिः॥ उरुधजडान्कर्मश्रद्धाभ्र
ांतमंदमतीन्भ्रमयतिमोहयति॥ अयंभावः॥ नहिवेदः कर्मफलस्यानित्यत्वमभिप्रैति॥ किंतुलक्षणयाप्राशस्त्यमात्रंवि
धेयवाक्यत्वात्॥ अन्यथावाक्यभेदत्वात्प्रसंगात्॥ तद्यथेहकर्मजितोलोकः॥ क्षीयतेएवमेवामुत्रपुण्यजितोलोकःक्षी
यतइतिन्यायोपबृंहितश्रुत्यंतरविरोधाच्च॥ अतः कर्मजडानामिदंभ्रममात्रमिति॥ एतेनैवतस्माद्वाएतस्मादात्मनआकाशः
संभूतइत्यादीनामप्यन्यपरत्वंदर्शितंभवति॥ उद्धृतंभवतः सतोपिभुवनंसन्नेवसर्पः स्रजंकुर्वन्कार्यमितिविकूटकनकंवेदो
पिनैवंपरः॥ अद्वैतंतवसत्यंपरंतुपरमानंदपदंतन्मुदावंदेसुंदरमिंदिरानुतहरेमामुंचमामानतं॥ २३॥ ॥ ॥ ॥ ॥
...यथा...सर्पमिवकार्यं कुर्वन्स्रजउत्पन्नसर्पःसन्नैवासितथा
॥ हेभगवन्...नवतस्तवसतउत्पन्नमुर्वनंसदनैवनभवति॥ स्रजउत्पन्नःसर्पइव॥ ...सर्पमिवकार्यं... कुर्वन्स्रजउत्पन्नसर्पः सन्नैवासि॥ तथा
...एवंपरःप्रपंचसत्यपरोनभवति॥ हेभगवन्नत
...सदनैवनभवतीत्यर्थः॥ इतिहेतोरक्षय्यमित्यादिवेदोपि
...स्यास्तुतेनमस्यति... समंतातनतंनम्रंमांतंमासजेत्यर्थः॥२॥
...सर्पवत्...यथा...कार्यं कुर्वन्...
...तदैतंसदसत्परंतुसेव्यसेवकभावेनतत्सिद्धंसुंदरंतवपरमानंदपदं...

श्रीहरि
१२७
मनोसाद

सनदनादि

त्वाम्नायस्यक्रियार्थत्वादानर्थक्यमतदर्थानां ॥ तदात्मकमेवहृष्टं ॥ यथाकनकादुत्पन्नं कुंडलादितदात्मकं ॥ तद्वदिति ॥ तत्रय
दिसदभेदः साध्यतेतदापादानत्वनिर्देशेनैवभेदप्रतीतेर्विरुद्धोहेतुरित्याह ॥ ननुतर्कहतमिति ॥ ननुनाभेदं ॥ साधयामः किंतुतद्रूप
त्वेनैवकुंडलादिवद्भेदंप्रतिषेधामः ॥ ततश्चभेदएवस्यादित्याशंक्याह ॥ अनेकांतिकत्वेनदूषयति ॥ तन्नूतानां
क्रियार्थेनसमन्वयः इति ॥ तत्रतत्रजैमिनिनावेदस्यक्रियापरत्वाभिधानादुपनिषदामपितदेवयुक्तं ॥ यथोक्तं
तंत्रवार्त्तिककृता ॥ एतेनक्रत्वर्थकर्तृप्रतिपादनेनोपनिषदांनैराकांक्ष्यंव्याख्यातमिति न ॥ एकमेवाद्वितीयंब्रह्म ॥ विज्ञानमानंदं
तद्दुर्वचोवमित्येवंतद्विपरीतात्मप्रतिपादनात्नहिद्वितीयपरमानंदरूपस्यकर्मागत्वंयुज्यते ॥ अननुमतंचैतद्वार्त्तिककृतः ॥ वक्ष्यं

॥ ॥ सतइदमुत्थितंसदितिचेन्ननुतर्कहतंव्यभिचरतिक्वचक्वचमृषानतथोभययुक् ॥ ॥
॥ ॥ व्यवहृतयेविकल्पदूषितोंधपरंपरयाभ्रमतिभारतीतउरुवृत्तिभिरुक्थजडान् ॥ ३६ ॥

सर्वत्रैवहिविज्ञानंसंस्काररत्वेनगम्यते ॥ परांगंचात्मविज्ञानादन्यत्रेत्यवधार्यतामित्येतेनैवोक्तत्वात् ॥ एतदर्थमेवमननायमुनयः
पर्यटंतीत्युक्तं ॥ तत्रतावत्द्वैतस्यमसत्वेभवेदप्येवं ॥ तदेवतुनसंभवतीतिप्रश्नोत्तराभ्यांमननेनतत्वावधारणप्रकारमाह ॥ इदंविश्वं
धर्मिसदितिसाध्योधर्मः सतउत्पन्नत्वात्यत्यत्उत्पन्नंनामतदुपादानत्वंनतुतन्निमित्तत्वं अतोनानैकांतिकत्वंइत्याशंक्यदूषयति ॥
क्वचमृषेति ॥ सुते द्दानस्यापिदर्शनोनगुणत्वंकिंतुमिथ्यात्वंअन्यथाकुंडलादि व ॥ घटसंगात् ॥ अतः पुनरप्यनैकांतिक
त्वमेवेतिभावः ॥ ननुनूनकेवलंगुणमात्रंप्राणिनउपादानंकिंतुत्रविद्यासुक्तंतथान्तस्यवावगतत्वायुक्तंफाणानामिथ्यात्वमि

श्री०
भा० द०
३० ०
१२८

ननु यद्यप्य... नास्य वन चासत्तातेन चे... स्य स्पर्शं वंधगंधोपितारः किमपर ...जीवेन यतो यं संसरति किं वा व कुतश्च
जीवेश्वरस्य ... नित्तु कः । किं विषयं च तत्राह ... इत्यपेक्ष्यायां जीवेश्वर विशेषं ॥ द्वासुपर्णा सयुजा सखाया समानं वृ
क्षं परिषस्वजाते ॥ तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥ अजामेकां लोहितशुक्लकृष्णां इत्यादि श्रुतिर्वदंतीत्य
र्थः ॥ स यदजया त्वजयाति ॥ स तु जीवः यद्यस्मादजया मायया । अजां अविद्यामनुशयीत ॥ आलिंगेत ॥ ततो गुणांश्च देहेंद्रियादी
ननुषजन् सेवमान आत्मतया ऽध्यस्यन् तदनुतदनंतरं सरूपतां तद्धर्मयोगं भजते ॥ अपेतभगः गपि हितानंदादिगुणः सन् मृत्यु
संसारं भजति ॥ प्राप्नोति ॥ तेन द्विषयमेव च कर्मकांडमिति भावः ॥ त्वमीश्वरो जहासि तामजां मायां ॥ ननु सा मय्येवाकिं

॥ हे भगवन् यस्मात् जीवो मायया अविद्यामालिंगते आलिंगनाद्देहेंद्रियादीन् सेवमानः स्पृहो... सामा... याध्यस्यन्... ध्यासानंतरं देहादिजन्ममरणादि धर्मसे
वमानत्वात्... सन् जीवः
... प्राप्नोति ॥ ॥ स यदजया त्वजामनुशयीत गुणांश्च जुषन्भजति सरूपतां तदनु मृत्युमपेतभगः ॥ श्री श्री ॥
॥ ॥ त्वमुत जहासि तामहिरिव त्वचमात्तभगो महसि महीयसेऽष्टगुणितेऽपरिमेयभगः ॥ ३८ ॥
॥ त्वं प्राप्तैश्वर्य ईश्वरस्तु मायां त्वचमहिरिव त्यजसि ॥ अपरिमितैश्वर्यस्त्वमणिमाद्यष्टविभूतिमति परमैश्वर्ये विराजसे ॥ इति जीवात्तत्त्व विशेष इत्यर्थः ॥ १ ॥

कथं त्यागस्तत्राह ॥ अहिरिव त्वचमिति ॥ अयं भावः ॥ यथा भुजंगः स्वगतमपि कंचु ... कं गुणं बुद्ध्या नाभिमन्यते ॥
तथा त्वमजां ॥ नहि निरंतराज्ञादिमां विल्काम धेनुहृदपतेरजयाच्छत्वमिति ॥ तामुपेक्षस इति ॥ कुतः आत्तभगः नित्य
प्राप्तैश्वर्यः ॥ महसि परमैश्वर्ये अष्टगुणिते अणिमाद्यष्टविभूतिमति महीयसे पूज्यसे विराजसे ॥ कथं भूतः ॥ अपरिमेय
भगः ॥ अपरिमितैश्वर्यः ॥ नह्यन्येषामिव देशकालादिपरिच्छिन्नं तवाष्टगुणितमैश्वर्यं ॥ अपि तु परिपूर्णस्वरूपानुबंधित्वा श्रीकृष्ण
दपरिमितमित्यर्थः ॥ ॥ नृत्यंती तव वीक्षणांगणगता कालस्वभावादिभिर्भावान् सत्वरजस्तमोगुणमया नुन्मीलयंती
बहून् ॥ मामाक्रम्य पदा शिरस्यतिभरं संमर्दयंत्यातुरं मायाते शरणं गतोऽस्मि नृहरे त्वामेव तां वारय ॥ २५ ॥ ॥ ॥ १२८

॥ नृत्यंती ... तवीक्षणांगणगता ... कालस्वभावादिभिः सत्वरजस्तमोमयान्भावान्दर्शयंती ... मां पदा शिरसि अतिभरं आ
क्रम्य मर्दयंती तव माया मां ... ॥ २ ॥ १ ॥ वहून्

॥ लोहमणिना एकेन लोहं यो गके सर्वं ते न स्से ५॥

देवं प्रपंचस्य सत्वे साधकं नास्तीत्युक्तं ॥ इदानीमसत्वे सृष्टेः प्राक् पश्चात् यतो वा इमानि भूतानि जायंते इत्याद्या श्रुतिर्मूलं चानुमानं प्रमाणमित्याह ॥ नयदिदमिति ॥ यत् यस्मादिदं विश्वं अग्रे सृष्टेः पूर्वं नासत् नासीत् ॥ सदेव सोम्येदमग्र आसीत् आत्मा वा इदमेक एवाग्र आसीदिति ते ॥ न च निधनात् प्रलयादनु अनंतरं भविष्यत् भविष्यति ॥ नासदासीन्नो सदासीत्तदानीमित्यादिश्रुतिः ॥ अतः कारणादंतरा मध्येपि एकरसे केवले त्वयि मृषा मिथ्यारूपमेव विभातीति मतं निश्चितं यतएवं अतः रूपाद्द्रविणजातिविकल्पपथैः ॥ द्रविणजातीनां द्रव्यमात्राणां मृदादीनां कार्यस्वरूपाणां विकल्पा भेदाः घटकुंडलादयः तद्दृष्टांतो मार्गप्रकारः ॥ तैरुपमीयते अस्मद्दृष्टांततया निरूप्यते ॥ यथा तत्र कार्यकारणयोर्नामधेयमात्रता ॥ कारणं मृदा

॥ नयदिदमग्र आसन्नभविष्यदतो निधनादनुमितमंतरा त्वयि विभाति मृषैकरसे ॥ ॥ परमानंदरसे १

॥ अतउपमीयते द्रविणजातिविकल्पपथैर्वितथमनोविलासमृतमित्यवयंत्यबुधाः ॥३७॥

लोहशक्तेरिति

देव तु सत्यं ॥ तथात्राप्याकाशादीनां नाममात्रता ब्रह्मैव सत्यं ॥ तथा एकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात् ॥ तथा एकेन नखनिकृंतनेन सर्वं कार्ष्णायसमित्यादि ॥ तस्मादस्य सत्वे प्रमाणाभावादसत्वे प्रमाणस्य विद्यमानत्वाद्वितथं मनोविलासं ऋतं सत्यमिति ॥ ये अवयंति जानंति ते अबुधाः अज्ञा इत्यर्थः ॥ अत्रैवं प्रयोगः ॥ विवादाध्यासितं न सत् ॥ आद्यंतयोरविद्यमानत्वात् विकारित्वात् ॥ दृश्यत्वाच्च ॥ शुक्तिरजतादिवत् आत्मवच्चेति ॥ ॥ मुकुटकुंडलकंकणकिंकिणीप्रमितं तं केन रूपेण परमार्थत ॥ मरुदहं कृतिरपंच अनुस्वरं तथा नरत्वेन परं परमार्थत ॥ २४ ॥ ॥ ॥ ॥

...तेनातीतं प्रारब्धमेव दुःखसुखोपभोगेन क्षिप्यते। यतस्तु सुखदुःखयोरीहितं वेतासाम्यनिष्ठाप

॥ ननु यतीनामप्रयतेप्यसुखमितःधुं ... ॥ त्वदिति॥ यत्तु लोके याद्दशं सदसत्फलमीश्वरो ददाति तत्फलात्तत्तारेण तत्त्व

ज्ञानां नगवेऽज्ञानिनां दुःखसंबंधेपि विषयासक्तिनायते ... ये नाम ॥ हे सगुण। सर्वैश्वर्यवीर्यचयशः श्रीज्ञानवैराग्यं चेत्येषं षट्क्लेश्वर्यपुक्त कर्मफलदानुर्भव ...

लोत्मादर्कं ताहशं गुणपापात्मकं सदसत्प्रारब्धकर्मप्रकटीभवतीति ज्ञेयम्॥ ... तदेव ज्ञानवानात्मानात्मानाति। तदा देहाभिमानेनाविधिनिषेधस्पार्शी ... मावेन

तयोः पुण्यपापरूपयोः प्रारब्धकर्मणोः फलमेतानसुखदुःखसंबंधान्त्वदज्ञानेवान् ...

ननु यतेर्नं किमपि फलमस्ति प्रारब्धमेव दुःखसुखोपभोगेन क्षिप्यते॥ अतः किमिति हद्यारोप्यते॥ उभयतोप्यसुखमिति स्त्र

प्रतीतेः एव नित्योमहिमाब्राह्मणस्य॥ न कर्मणा वर्धते नो कनीयानित्यादि॥ तत्राह॥ त्वदवगमीति॥ हे सगुण षड्गुणैश्वर्ययु

त्वं त्वदवगमी त्वत्तत्त्वज्ञानवान्‌ भवदुत्थयशुभाशुभयोर्भवतः सकाशात्फलदातुरीश्वराद्दुत्तोत्पन्नयोः प्राविर्भूतयोः शुभाशुभयोः

पापपुण्ययोः पुण्यकर्मणोः फलभूतान्गुणविगुणान्वयान्सुखदुःखसंबंधान्न वेत्ति॥ नानुसंधत्ते॥ तर्हितदानीं चेदेह

जातांदेहाभिमानिनां प्रवृत्तिनिवृत्ति क्रियागिरः॥ विधिनिषेधलक्षणा न वेत्ति॥ विगतदेहाभिमानतया कार्याबाधाभावात्रनि

सुखदुःखसंबंधान्

॥ ॥त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयांस्तर्हि देहभृतां च गिरः॥ ॥ न वेत्ति ज्ञानी १

॥ ॥अनुयुगमन्वहं सगुणगीतपरंपरया श्रवणभृतो यतस्त्वमपवर्गगतिर्मनुजैः॥ ४० ॥ भवति १

॥ प्रतिदिनं गुरुपरम्परागतोपदेशपरंपरया॥२॥

युज्यत इत्यर्थः॥ युक्तं चैतत्॥ यतः कारणान्मनुजैः अन्वहं श्रवणभृतः॥ अनुदिनं श्रवणभृतः श्रवणेन चेतसि धृतस्त्वं तेषां

अपवर्गगतिः अपवर्गरूपा गतिर्भवति॥ कथं श्रवणभृतः॥ अनुयुगं प्रतियुगं या गीतपरंपरा उपदेशसंततिः तया सत्त्वं अपवर्ग

पानुसारेणेत्यर्थः॥ एतदुक्तं भवति॥ ये तावत्तत्त्वज्ञानिनः न तेषां कर्मो विकारशंकापि॥ ये चान्ये वरं तं त्वत्कथाश्रवण

निष्ठाः तेषामप्यासन्नभवत्सदानीं न विधिनिषेधबाधः॥ इतरेषां तु योगच्छलेनेन्द्रियलालनलोलसीनां उभयतोप्यसु

खमिति॥ ॥अवगमं न मे दिश माधव स्फुरति यन्न सुखासुखसंगमः॥ श्रवणवर्त्मनि भावमथापि वा नेहि भवामि यथा।

॥ हे माधव तव यज्ज्ञानं तज्ज्ञानं मह्यं मा दिश यद्यस्माज्ज्ञानात् ... दुःखसंयोगो न स्फुरति ... ॥ हे माधव

भवद्वर्णन ... ॥१२७॥

